802

સૂર્યમન્દોચ્ચં	ભૌમસ્ય	બુધસ્ય	ગુરો:	શુક્રસ્ય	શનેઃ
૨	૪	૭	૫	૩	૮
૧૮	૦	૦	૦	૦	૦
૦	૦	૦	૦	૦	૦
૦	૦	૦	૦	૦	૦

ચન્દ્રસ્ય પૈશાચાનાં કાશ્મીરે ૫૯-કા., ૪૦-વિ., સૈવ ધનમ્

અહર્ગણાદિ સાધનમ્

શકોઽબ્ધીન્દ્રો ૧૪૪૨ વિનિઘ્નાત્ દ્વ્યાહૃતફલં ચાક્ર-
કાખ્યં રવિ ૧૨ હતશેષો વકં જુ યુતમ્ ।
ચૈત્રાદ્યૈ: પૃથગમુત: સદ્ઘ્નચક્રાદ્વિઘ્નયુતા
દ્યગર ખલાદિ માસ યુતમ્ ॥

રવિઘ્નં ગતાતિથિયુક્. દ્વિઘ્નચક્રાંગાંશાઢ્યં
પૃથગમુતો ષડ્વિશ્વક્ષણાબ્ધૈ:, ઊનાહો વિધુગમ
ર્ગણો ભવેત્ વાર: સ્યાત્ક્ષર હતચક્રયુગાતો
ઽઙ્ગમાન ॥

સ્વક્ષેત્ર	સમભે	મૂલત્રિકોણે	મિત્રક્ષે	અધિમિત્રભે
૦	૦	૦	૦	૦
૧૫	૭	૪૫	૨૫	૨૨
૦	૩૦	૦	૦	૩૦

વૈરિભે	અધિવૈરિભે
૦	૦
૩	૧
૪૫	૫૨
	૩૦

[illegible]

(Jyotish Section 2)

'Master' Mani Mala's Third Mani.

THE JATAKA PADDHATI

OF

SHRI KESHAVA DAIVAJNA.

Edited with

Sanskrit and Hindi Commentaries

BY

Pt. Shri Sita Ram Jha J. A., J. T.

AND

Explanatory Notes on the Mathematical portion

BY

Pt. Ramadhin Sharma.

PUBLISHED BY

MASTER KHELARI LAL & SONS.,

SANSKRIT BOOK DEPOT

KACHAURI GALI,

BENARES CITY.

1934

Price Rs 1 As. 4.

मास्टर खेलाड़ीलाल एण्ड सन्स
परिवर्धित
मूल्य

(All Rights Reserved for ever by the Publisher.)

Publisher:-

J. N. Yadava Proprietor,

Master Khelari Lal & Sons.,

Sanskrit[Book Depot, Kachauri Gali, Benares City.

Printer:-

Vijay Bahadur Singh B. A.,

Mahashakti Press, Bulanala, Benares City.

ज्यौतिषविभागे-२

मास्टरमणिमालायास्तृतीयो मणिः ३

श्रीकेशवदैवज्ञविरचिता

जातकपद्धतिः।

मिथिला-देशान्तर्गत-चौगमानिवासि—काशीस्थ-संन्यासि-संस्कृत-
पाठशालाध्यापक-ज्यौतिषाचार्य-तीर्थ-पण्डित—
श्रीसीतारामशर्मकृतया
सर्वमनोरमाख्यया
सोपपत्तिसंस्कृतभाषाव्याख्यया विभूषिता।

बौंघयानिवासिज्यौतिषतीर्थपण्डित—
श्रीरामाधीनशर्मकृतया
उदाहरणदीपिकया सहिता।

श्रीमद्दैवज्ञापूछशर्मकृतसयुक्तिकोदाहरणचक्रेण समलङ्कृता।

सेयं—
मास्टर खेलाड़ीलाल एण्डसन्स्-
"संस्कृत बुकडिपो" स्वामिमहोदयैः प्रकाशिता।

[सर्वाधिकारः प्रकाशकेन रक्षितः]

द्वितीयावृत्तिः] मूल्यं सपादरूप्यकम् [सन् १९३४

मास्टरमणिमालाया ज्यौतिषमञ्जुलमणिस्तृतीयोऽयम् ।
श्रीविश्वेशपदेपदेभ्यः सादरमादौ समर्प्यते भक्त्या ॥

प्रस्तावना ।

समस्तैरपि दैवज्ञैर्विदितैवास्ति भारते ।
श्रीमत्केशवदैवज्ञकृता "जातकपद्धतिः" ॥
नवग्रन्थप्रसिद्धयै हि काचिद् भवति भूमिका ।
अलं जगत्प्रसिद्धायास्तयाप्यस्याः सुपद्धतेः ॥
यद्यप्यस्याः कृता टीका पूर्वैः "प्रौढमनोरमा" ।
अन्यैस्तदनु दैवज्ञैरन्या "बालमनोरमा" ॥
नाद्या प्रौढान्यवित्तुष्ट्यै नान्या बालान्यविन्मुदे ।
नैताभ्यां मध्यवित्तुष्टिर्जातेत्यस्त्यतिरोहितम् ॥
वस्तुतोऽन्वर्थनामत्वं गतं टीकाद्वयन्त्वतः ।
कृता सर्वजनप्रीत्यै मया सर्वमनोरमा ॥
अत्रादौ स्पष्टया देवगिरा व्याख्याऽस्ति शोभना ।
ततस्तदुपपत्तिश्च ततष्टीका नृभाषया ॥
स्वसतीर्थेन मित्रेण श्रीरामाधीनशर्मणा ।
रचिता रचिता पश्चादुदाहरणदीपिका ॥
अन्ते संरचितं श्रीमद्दैवज्ञापूछशर्मणः ।
जन्मपत्रं च तेनैव रचितं युक्तिसंयुतम् ॥
उत्तमा गुणमेवास्या दृष्ट्वा गच्छन्तु पुष्टताम् ।
अधमा दोषमालोक्य तन्वन्तु निजदुष्टताम् ॥
उभावपि विवृण्वन्तो मध्यमा यान्तु तुष्टताम् ।
इत्येव रचिता टीका मया जातकपद्धतेः ॥
अतो धन्यतमं मन्या भृशमाशास्महे वयम् ।
यद् दृष्ट्वेमां भविष्यन्ति सर्वे सन्तुष्टमानसाः ॥
यात्र मानवधर्मत्वाद् या वा मद्दृष्टिदोषतः ।
मुद्रणादौ त्रुटिर्जाता संशोध्या सा महाशयैः ॥
इति ज्ञानदृशो विज्ञा विज्ञाप्यन्ते विवेकिनः ।
चौगमाग्रामवास्तव्य-श्रीसीतारामशर्मणा ॥

अथ विषयानुक्रमणिका।

विषयाः	पृष्ठे
टीकाकारकृतमङ्गलाचरणम्	१
ग्रन्थकारकृतमङ्गलाचरणम्	२
अहर्गणानयनपद्यमुदाहरणं च	३
वल्लिकानयनम्	४
मध्यमग्रहानयनम्	४
तात्कालिकग्रहानयनम्	५
मन्दोच्चसाधनम्	५
रविचन्द्रस्पष्टीकरणम्	५
स्पष्टगतिसाधनम्	५
कुजादीनां स्फुटीकरणम्	६
,, गतिस्फुटीकरणम्	८
अयनांशसाधनम्	८
राशीनां लंकोदयमानम्	९
,, स्वोदयमानप्रकारः	९
प्रथमलग्नानयनम् विशेषश्च	९
नतोन्नतसाधनम्	१०
चतुर्थदशमभावानयनम्	१०
अवशिष्टभावसाधनम्	१३
दृष्टिसाधनम्	१६
उच्चवलं सप्तवर्गजबलम्	१९
युग्मायुग्मराशि-नवांशबलम्	२०
केन्द्रादिवलम्	२०
दिग्वलं-कालवलम्	२२
पत्तवलं त्र्यंशवलं वर्षेशा-दिवलम्	२४
अयनवलानयनम्	२६
चेष्टाबलं नैसर्गिकवलम्	२८
युद्धादिवलम्	३०
भावानां त्रिविधबलम्	३२
चन्द्रार्कयोश्चेष्टावलम्	३४
इष्टकष्टबलानि इष्टकष्टदृष्ट्यः	३५
सप्तवर्गेष्टकष्टसाधनम्	३८
योगजायुर्दायः	४२
चेष्टागुणकादिसाधनं च	४२
आश्रयगुणकः	४५
कर्मयोग्यगुणकः	४६
दायांशसाधनम्	४६
चक्रार्धहानिः	५०
अंशायुर्दायसाधनम्	५२
पिण्डादित्रिकायुर्दायांशाः	५३
लग्ने क्रूरे हानिः	५६
पिण्डादित्रिकायुःसाधनम्	५७

विषयाः	पृष्ठे	विषयाः	पृष्ठे
लग्नायुःसाधनम् विशेषश्च	५९	विदशादिकथनम्	७२
अंशायुषः श्रेष्ठत्वम्	६०	दशाप्रवेशकालिकलग्ना —	
चतुर्णामायुषां व्यवस्था	६२	नयनम्	७४
परमायुःप्रमाणम्	६३	दशायाः शुभाशुभफलम्	७७
मनुष्येतरस्फुटायुः साधनम्	६३	अष्टवर्गफलस्य अल्पाधिक—	
दशास्वरूपं तच्छुभाशुभम्	६४	त्वकल्पना	७९
दशाक्रमः	६५	क्वचित् फलस्य व्यभिचारे—	
दशाक्रमबलम्	६७	कर्तव्यता	८०
रिष्टकरारिष्टहरबलम्	६७	ग्रन्थालङ्करणं ग्रन्थप्रशंसा	८१
मतान्तरम्	६९	टीकाकारपरिचयः	८२
अन्तर्दशाक्रमः	७०	ततो जन्मपत्रोदाहरणम्	१–४८

इति विषयानुक्रमणिका ।

॥ श्रीः ॥

श्रीकेशवदैवज्ञविरचिता

जातकपद्धतिः ।

सोपपत्तिव्याख्योदाहरणदीपिकासहिता ।

दानवारिभिरर्च्यो यः शोभितो दानवारिभिः ।
अगजानन्दनः पायादपायात् स गजाननः ॥
त्रैलोक्यभृच्चतुर्वर्गप्रदा-ता-पापहृत् सदा ।
मिथिलाभूमिजा-माता ※ सन्ततं सन्तनोतु शम् ॥
जननीं जानकीं नौमि तातं वच्छरनाभिधम् ।
यशसा यौ भुवि ख्यातावन्ते साम्बेशतां गतौ ॥
महामहोपाध्यायो बुधवर्यो ज्यौतिषाचार्यः ।
श्रीमुरलीधरशर्मा शाश्वतधर्मानुरागिजनमान्यः ।
ध्यात्वा यत्पदकमलं मन्दधियोऽपि हि भवन्ति तत्त्वज्ञाः ।
जयति तरां स गुरूणामपि गुरुरध्यापयन् काश्याम् ॥
श्रीमिथिलापतिविद्यापीठे विज्ञान् प्रपाठयन्ननिशम् ।
शं श्रीनन्दनमिश्रो दिशतु गुरुर्ज्यौतिषाचार्यः ॥
देवीमभीष्टदां नत्वा श्रियं स्वाभीष्टदेवताम् ।
उपपत्तियुतां कुर्वे व्याख्यां जातकपद्धतेः ।

अथ ग्रन्थकारो वृत्तपूर्वार्धेन मङ्गलमाचरन् ग्रन्थारम्भमुत्तरार्धेन ग्रन्थान्तरसाध्यामितिकर्तव्यतामस्तलग्नसाधनञ्चाह —

※ "सीता", पक्षान्तरे "रामः" ।

नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्
कुर्वे जातकपद्धतिं स्फुटतरां होराविदां प्रीतये* ।
यन्त्रैः स्पष्टतरोऽत्र जन्मसमयो वेद्योऽथ खेटाः स्फुटा
यत्पक्षे हि घटन्त उद्गम इहास्तर्क्षं सषड्भः स च ॥१॥

व्याख्या—'अहं' विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान् विघ्नपो गणेशः, शारदा सरस्वती, अच्युतो विष्णुः, शिवो महादेवः, ब्रह्मा विधाता, अर्कमुख्यग्रहाः सूर्यादिनवग्रहाः एतान् नत्वा प्रणम्य होराविदां होरां ज्योतिश्शास्त्रस्य लग्नफलादिविनिर्णयस्कन्धं विदन्तीति होराविदस्तेषां प्रीतये मुदे स्फुटतरामतिलघुक्रियां जातकपद्धतिं जातस्य शुभाशुभफलनिरूपकं शास्त्रं जातकं तस्य पद्धतिं मार्गं कुर्वे करोमि। अत्रास्यां पद्धतौ यन्त्रैः शङ्कु-घटी-चक्रादिभिः स्पष्टतरोऽतिसूक्ष्मो जन्मसमयः सूर्योदयाज्जन्मकालावधिकेष्टकालो वेद्यो ज्ञातव्यः। अथानन्तरं इहास्मिन् जन्मसमये यत्पक्षे यस्मिन् सौरादिपक्षे घटन्ते दृग्गणितैक्यं गच्छन्ति तस्मिन् पक्षे स्फुटाः स्पष्टाः खेटा ग्रहाः 'साध्या' इति शेषः। उद्गमः लग्नं च साध्यः स उद्गमः शषड्भः षड्राशिसहितो ऽस्तर्क्षं सप्तमलग्नं भवतीत्यर्थः ॥ १ ॥

अत्रोपपत्तिः—"यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्व"मित्याद्युक्तेः सूक्ष्मजन्मकाले स्फुटखेटादिसाधनं समुचितमेव। तथा क्रान्तिवृत्त-क्षितिजवृत्तयोः पूर्वसम्पातः प्रथमलग्नं पश्चिमसम्पातश्चास्तलग्नसंज्ञं तत्सम्पातद्वयं च मिथः षड्भान्तरितमिति गोलीयरेखागणितेनातिरोहितमेव विदामतो लग्नं सषड्भमस्तर्क्षं स्यादेवेत्यलं पल्लवितेन ॥ १ ॥

भाषार्थ—

दोहा—श्रीगणपतिपदपद्मयुग मन धरि सीताराम ।
सरलमनुजभाषातिलक लिखत सुजनहितकाम ॥

भा०—मैं (केशव) गणेश, सरस्वती, विष्णु, महादेव, ब्रह्मा, और सूर्यादि नवग्रहों को प्रणाम करके होराशास्त्र जानने वालों के प्रीत्यर्थ अत्यन्त लघुक्रियायुक्त 'जातकपद्धति' नामक ग्रन्थ बनाता हूँ। यहाँ यन्त्रादि द्वारा अत्यन्त सूक्ष्म जन्म-

* बहुषु पुस्तकेषु "ज्योतिर्विदां प्रीतये" इति पाठोऽनभिज्ञैः प्रक्षिप्तः स न रमणीयः केवलहोरावित्सु ज्योतिर्वित्त्वाभावात् ।

समय समझना चाहिए, फिर उस जन्म समय में जिनके पक्ष से गणित करने से दृक्तुल्यता होती हो उन (सौर, ब्राह्म आदि) पक्ष से स्पष्टग्रह साधन करें और ग्रन्थान्तरोक्तविधि से लग्नसाधन करें और लग्न में ६ राशि जोड़ने से सप्तमलग्न अर्थात् जायाभाव होता है ॥ १ ॥

अथोदाहरणदीपिका।

संस्मृत्य कालिकापादाम्बुजं जातकपद्धतेः।
मुदे दैवविदां कुर्मं उदाहरणदीपिकाम् ॥ १ ॥

अत्र तावत्स्पष्टग्रहसाधनार्थमहर्गणस्यैव प्रयोजनं भवत्यतः कलियुगादेस्तदानयनार्थं ग्रन्थान्तरोक्तं सार्द्धैकं पद्यम्—

"शाको नवाद्रीन्दुकृशानुयुक्तः कलेर्भवेदब्दगणो व्यतीतः।
कल्याद्यब्दगणः प्रभाकरहतश्चैत्रादिमासैर्युतः
त्रिष्ठः खाद्रिहृताप्तयुक् — सुरहृतैर्लब्धाधिमासैर्युतः।
खत्रिघ्नः सतिथिर्द्विधा शिवहतत्रिव्योमशैलोद्धृतै—
र्हीनो लब्धदिनावमैः सितनिशार्द्धे सावनोऽहर्गणः॥"

अथ शालिवाहनशकाब्दे १७८० फाल्गुनकृष्णषष्ठ्यां बुधे सूर्योदयात् ४०। ३६ इष्टघटिकादिष्वहर्गणः साध्यते। तत्रोक्तप्रकारेण शकः १७८० नवाद्रीन्दुकृशानु ३१७९ युक्तः ४९५९ अयं कलेर्व्यतीताब्दगणः स्यात्। असौ व्यतीताब्दगणः प्रभाकर १२ हतः ५९५०८ चैत्रमारभ्य गतचन्द्रमासै१०र्युतः ५९५१८ अयं त्रिधा स्थाप्यः। अन्तिमस्य खाद्रिलवेना ८५० नेन द्वितीयस्थो युतः ६०३६८ अस्य सुरलवेना १८२९ नेन प्रथमस्थानस्थो युतः ६१३४७ अयं त्रिंशद्गुणः १८४०४१० गततिथिभि २१ रभियुतः १८४०४३१ अयं द्विष्ठः। द्वितीयस्थः शिव ११ हतः २०२४४७४१ अस्य त्र्यधिकसप्तशतांशेना २८७९७ नेन प्रथमस्थो हीनो जातः १८११६३४ अयमेव फाल्गुनकृष्णषष्ठ्यां बुधनिशार्धे सावनोऽहर्गणो जातः। अत्राहर्गणः सप्ततष्टः ६ सितादभीष्टवारो बुधः स्यात्।

अथात्र विशेषः—अहर्गणे स्वाभीष्टवारो यदि नायाति तदाभीष्टवारार्थं सैको वा निरेकोऽहर्गणः कार्यः।

अन्यच्चापि विशेषः—मलमासात् पूर्वमासेष्वहर्गणानयने पूर्ववर्षाधिमासापेक्षया यद्यधिकोधिमास आगच्छेत् तदा स न ग्राह्यः किन्तु पूर्ववर्षोद्भवतुल्या एवाधिमासाः ग्राह्याः।

एवं स्पष्टाधिमासोत्तरमासे अहर्गणानयने पूर्ववर्षाधिमासापेक्षया यद्यधिकोधिमासो नायाति तथापि स ग्राह्य एव ।

पुनरपि विशेषः—मलमासोत्तरमहर्गणे गतचैत्रादिमासगणनाया-मधिमासो न ग्राह्यः । मध्ये त्वहर्गणानयने गततिथिग्रहणेऽधिमासस्य तिथयो गणनीया एवेति ॥

अथाहर्गणाद्वल्लिकानयनं मकरन्दप्रकाशे—

"विधाय भागं द्युगणस्य षष्ठ्या पुनः पुनः सा दिनजा ग्रहाणाम् ।
वल्ली भवेच्छेषमिता चतुर्धा ज्ञेयास्ततो मध्यखगा ग्रहज्ञैः ॥"

उदाहरणम्—अहर्गणः १८११६३४ अस्य षष्ठ्यंशलब्धिः ३०१९३ शेषम् ५४ इयमेव प्रथमा वल्ली । प्रथमलब्धस्यास्य ३०१९३ पुनः षष्टिभागाल्लब्धं ५०३ । शेषम् १३ इयं द्वितीया वल्ली । पुनर्द्वितीय-लब्धस्यास्य ५०३ षष्टिभागाल्लब्धम् ८ । शेषम् २३ इयं तृतीया वल्ली । पुनः तृतीयलब्धस्यास्य ८ षष्ठ्यंशलब्धिः ० शेषम् ८ इयमेव चतुर्थी वल्ली । आसां क्रमान्न्यासः ८ । २३ । १३ । ५४ इति वल्लिकानयनम् ।

अथ मध्यमग्रहानयनम् । अत्र यस्मिन् पक्षे ये घटन्ते तस्मिन् पक्षे ते ग्रहाः साध्या इत्याचार्याणामाशयस्तथापि मकरन्दप्रकाराभि-ज्ञानां छात्राणामुपकारार्थं मकरन्दयुक्त्यैव ग्रहाः साध्यन्ते । यथा मकरन्दप्रकाशे—

'यो वल्लिकायां प्रथमावशेषस्तस्मादधःस्था ग्रहवाटिकायाम् ।
येऽङ्काः स्थितास्तेषु युगप्रमाणा अङ्का बुधैरादित एव ग्राह्याः ॥
यदा शून्यं भवेद्वल्ल्यान्तदा तस्य तलस्थितान् ।
कदापि नैव गृह्णीयादङ्कान्मध्यप्रसाधने ॥
द्वितीयशेषे प्रथमं विहाय तृतीयशेषे द्वितयं चतुर्थे ।
त्रयं तु तत्तत्तलगाङ्कयागं बाणैर्भजेच्छेषमितं तु षष्ट्या ॥
सङ्गुण्य दिग्भिर्विभजेत्फलं यद्देशान्तरेणापि विहीनितं तत् ।
मध्यो भवेदर्कमुखग्रहाणां सहायकः स्पष्टविधानयोग्यः ॥"

उदाहरणम्—पूर्वानीता वल्लिका ८।२३।१३।५४ अथ रविवाटि-कायां प्रथमवल्लिकातलस्थांकाः ८।५२।१३।२१।३२ द्वितीयवल्लीतल-स्थाङ्काः ८।७।४२।२।३२ तृतीयवल्लीतलस्थाङ्काः ४१।१८।५९।५२।४७ चतुर्थवल्लीतलस्थाङ्काः ५३।३३।५२।२६।४० एषां योगः ५१।५२।४७।४३। ३२ एतस्य प्रथमस्थाने पञ्चभक्ते लब्धो राशिः १० शेषं १ षष्ट्या

६० सङ्गुण्य अग्रिमाङ्के ५२ युतं ११२ दशभिर्भक्तं लब्धं भागाः ११ शेषं २ षष्ट्या सङ्गुणितम् १२० अग्रिमाङ्के ४७ युतं १६७ पुनर्दशभिर्भक्त्वा लब्धाः कलाः १६ शेषं ७ षष्ट्या सङ्गुण्य ४२० अग्रिमाङ्के ४३ युतं ४६३ दशभिर्भक्तं लब्धा विकलाः ४६ एषां क्रमेण न्यासः १०।११।१६।४६ अथ कलादौ मिथिलादेशान्तर१।३५मृणं कृत्वा जातो मिश्रमान-कालिकमध्यमरविः १०।११।१५।११ अथ तात्कालिकार्थं पद्यम्—

"मिश्रेष्टयोर्यद्विवरं द्विमाद्यं गतिसंगुणम्।
षष्ट्या भक्त लवाद्यं स्यान्मिश्राधिक्ये फलं त्वृणम्॥
अल्पे ग्रहे धनं कार्यमेवं तात्कालिको भवेत्।
वक्रे तु विपरीतः स्याद्राहुकेत्वोस्तथैव हि॥"

अथ मिश्रमानम् ४४।७ इष्टम् ४०।३६ अनयोरन्तरमृण-चालनदिनादि ०।३।३१ रवेर्मध्यमा गतिः ५९।८ अनया मिश्रेष्टान्तरं गुणितम् षष्ट्या विभक्तं लब्धमंशादिचालनमृणम् ००।३।२८ अनेन हीनो पूर्व्वानीतमिश्रमानकालिकमध्यमरविस्तात्काले मध्यमरविः। १०।११।११।४३ एवं चन्द्रादयोऽपि साध्याः॥ (द्रष्टव्यम् १ चक्रम्)॥

अथ मन्दोच्चानयनपद्यं मकरन्दप्रकाशे—

"नन्दा भूपा ग्रहा वेदा रसा बाणगजाः क्रमात्।
विना चन्द्रं ध्रुवाः प्रोक्ताः सूर्यादीनां नभःसदाम्॥
शशिबाणाङ्गभूतुल्यो व्यवस्थितशको मतः।
व्यवस्थितशकं स्वीयाच्छकात्संशोध्य यत्नतः॥
अन्तरं स्वध्रुवैर्भक्तं फलं यद्विकालात्मकम्।
तद्व्यवस्थितमन्दोच्चे युक्तमिष्टं तु तद्भवेत्॥"

अत्रोदाहरणम्—व्यवस्थितशकः १६५१ इष्टशकश्च १७८० अन-योरन्तरम् १२९ रविध्रुवाङ्केना९नेन भक्तं लब्धं १४ अनेन विक-लात्मकेन व्यवस्थितरविमन्दोच्चम् २।१७।१७।९ युतम् २।१७।१७।२३ इद-मिष्टरविमन्दोच्चं जातम्। एवं कुजादीनामपि। चन्द्रमन्दोच्चं तु मध्य-मग्रहानयनवदेव ज्ञेयम्। (द्र० ३ चक्रम्)।

अथ रविचन्द्रयोः स्फुटीकरणपद्यम्।

"शोधयेत्स्वस्वमन्दोच्चात् स्वस्वमध्यं प्रयत्नतः।
शेषं केन्द्रं बुधैर्ज्ञेयं त्र्यधिकं तद्यदा भवेत्।
षड्भात्संशोधयेत्ततु षड्भाधिक्यं यदा भवेत्।

षड्भहीनं तदा कार्यं चक्राच्छोध्यं नवाधिकम् ॥
खत्रिघ्नः केन्द्रराशिः स्याद्भुजः स्वीयलवान्वितः।
तदधःस्थान् लिखेदङ्कान् प्रथमं फलपत्रतः।
भुजाग्रिमतलस्थाङ्कान् तदधो विलिखेत्क्रमात्।
फलयोरन्तरेणैव हन्याद्भुजकलादिकम् ॥
षष्ट्याप्तं स्वमृणं कुर्य्यात् क्रमोत्क्रमवसात्फले।
प्रथमे तत्फलं स्पष्टं ज्ञेयं गणितकोविदैः ॥
तत्फलेन युतो मध्यः केन्द्रे मेषादिषड्भगे।
तुलाषट्कस्थिते हीनः स्पष्टखेटो भवेद्ध्रुवम् ॥"

अथ स्फुटरविसाधनार्थमुदाहरणम्—

मध्यमार्क १०।११।११ ४३ रविमन्दोच्चा २।१७।१७।२३ दस्माद्विशोध्य ४।६।५।४० शेषमिदं केन्द्रसंज्ञम्। इदं राशित्रयाधिकत्वात् षड्भाद्विशोध्य शेषं भुजः, १।२३।५४।२० एतस्य राशिस्त्रिशद्गुणः ३० स्वलवै-२३ रेभियुतः जाता भुजांशाः ५३ एतत्तलस्थाः फलपत्राङ्काः १।४४।४५ तदग्रिमतलस्थाङ्काश्च १।४६।२ एषामन्तरं जातं फलान्तरम् ०।१।१७ अनेन भुजकलादिकं ५४।२० गोमूत्रिकया सङ्गुण्य षष्ट्या विभज्य लब्धं ००।०१।१० इदं प्रथमफले १।४४। ४५ युक्तम् जातमिष्टफलम् १।४५।५५ अनेन मेषादि—केन्द्रत्वाद्युक्तो मध्यमरविः स्फुटरविः १०।१२।५७।३८ एवं चन्द्रानयनमपि ॥

अथ स्पष्टगतिसाधनार्थं पद्यम्—

"गोमूत्रिकायाः क्रमतो हि गुण्या मध्यागतिः स्वस्वफलान्तरेण।
षष्ट्युद्धृता लब्धयुता स्वकेन्द्रे कर्कादिषड्राशिगते स्वभुक्तिः ॥
मृगादिषड्राशिगते च केन्द्रे लब्धेन हीना निजमध्यभुक्तिः।
स्फुटा भवेद्भुक्तिरिहेन्दुरव्योरेवं गतिज्ञैरुदिता महद्भिः ॥

अत्रोदाहरणम्— रवेर्मध्यगतिम् ५९।८ फलान्तरेणा००।०१।१७ नेन गोमूत्रिकया संगुण्य षष्ट्या विभज्य लब्धम् १।१६ अनेन मेषादि-केन्द्रत्वान्मध्यगतिः ५९।८ युक्ता जाता रवेः स्पष्टा गतिः। ६०।२४ एवं चन्द्रस्यापि ॥

अथ कुजादीनां स्फुटीकरणश्लोकाः—

"सूर्य्यस्य मध्यं बुधशुक्रयोः स्यान्मध्यं स्वमध्यं निजशीघ्रतुङ्गम्।
सुरेज्यभौमार्किनभश्चराणां मध्यं स्वमध्यं रविमध्यमुच्चम् ॥

अपास्य मध्यं निजशीघ्रतुंगाच्छेषं भवेद्राशिमुखं स्वकेन्द्रम्।
षड्भाधिकं वीक्ष्य कुजादिकानां संशोधयेद् द्वादशराशिमध्ये॥
खत्रिघ्नः केन्द्रराशिः स्याद्भुजः स्वीयलवान्वितः।
तद्वसात्पूर्ववच्छैघ्र्यं फलमादौ प्रसाधयेत्॥
तदर्धं स्वमृणं कुर्य्यात् केन्द्रे मेषतुलादिगे।
परग्रहो भवेदेवं मन्दोच्चात्तं विशोधयेत्॥
शेषं द्वितीयकेन्द्रं स्यादतो बाहुश्च पूर्ववत्।
तद्वसात्पूर्ववन्मान्दं फलं ज्ञात्वा तु तद्ग्रहे॥
मध्याख्ये स्वमृणं कुर्य्यात् समस्तं द्विग्रहो भवेत्।
द्विग्रहं शोधयेच्छीघ्राच्छेषं केन्द्रं तृतीयकम्॥
केन्द्राद्बाहुस्ततः शैघ्र्यं पुनः संसाधयेत्फलम्।
समस्तं स्वमृणं कुर्य्यात् द्विग्रहे तत्फलं क्रमात्॥
केन्द्रे मेषतुलाषट्के भवेदेवं स्फुटो ग्रहः।
एवं कुजादिपञ्चानामुदितं स्पष्टसाधनम्॥"

अत्रोदाहरणम् — रविमध्यमानयनवदत्र साधितमध्यमभौमः ००।११।१६।४३ अस्य शीघ्रोच्चं मध्यमार्कः १०।११।११।४३ मध्यमार्कान्मध्यमं कुजं विशोध्य जातं प्रथमशीघ्रकेन्द्रसंज्ञं ९।२९।५५।०० इदं षड्भाधिकत्वाच्चक्राद्विशोधितं २।००।०५।०० एतस्य भुजांशाः ६० एतदधःफलपत्रस्थशीघ्रफलाङ्काः २२।५४ भुजांशाग्रिमाङ्कस्यास्य ६१ तलस्थिताङ्काः २३।१५ अनयोरन्तरम् ००।२१ अनेन भुजकलादिकं ५।०० गोमूत्रिकया गुणितं ००।१०५।०० षष्ट्या भक्तं लब्धं ००।१।४५ इदं प्रथमफले २२।५४ युतं जातम् २२।५५।४५ एतस्यार्धेन ११।२७।५२ मध्यमकुजस्तुलादिकेन्द्रत्वाद्धीनः कृतः ११।२९।४८।५१ अयमेव परग्रहाख्यो ज्ञेयः। एनं परग्रहं कुजमन्दोच्चा ४।१०।०२।४० दस्माद्विशोध्य जातं मन्दकेन्द्रम् ४।१०।१३।४९ अस्मात् प्राग्वद्भुजांशाः १३० पूर्ववद्गृहीते मान्दफले ९।२६ ॥ ९।१९ अनयोरन्तरम् ००।०७ अनेन भुजकलादिकं १३।४९ गोमूत्रिकया संगुण्य जातम् १।३६।४३ षष्ट्या भक्तं लब्धं ००।०१।३७ प्रथममान्दफले ९।२६ ऽस्मिन् चयफलत्वाद्धीनं ९।२४।२३ अनेनापि मेषादिमान्दकेन्द्रत्वात् मध्यकुजोऽशादौ युतः ००।२०।४१।०६ अयमेव द्विग्रहाख्यः स्यात्। एनं द्विग्रहं रविमध्याद्विशोध्य जातं तृतीयं शीघ्रकेन्द्रम् ९।२०।३०।३७ इदं षड्भाधिकमतः

१२ अस्माद्विशोधितम् २।०६।२६।२३ एतस्य राशिस्त्रिंशद्गुणितः ६० अंशैः ६ युतः जाता भुजांशाः ६६ अस्मात्पूर्ववच्छीघ्रफले २६।४ ॥ २६।२४ अनयोरन्तरेना ००।२० नेन गोमूत्रिकया गुणितं भुजकलादिकं ६।४७।४० षष्ट्या भक्तं लब्धम् ००।०६।४८ अनेन प्रथममन्दफलं युक्तं जातं २६।१३।४८ अनेनैव तुलादिकेन्द्रत्वाद्धीनो द्विग्रहो जातः स्फुटकुजः ११।२४।२७।१८ एवमेव बुधादिकानयनमपि ज्ञेयमिति ।

अथ कुजादिकानां गतिस्पष्टीकरणम् । तत्र तावन्मध्यमागतिस्तु प्रथमचक्रे द्रष्टव्या । गतिस्फुटीकरणपद्यम्—मकरन्दप्रकाशे—

"मध्यां गतिं मन्दफलान्तरेण हत्वा हरेदभ्ररसैरिहाप्तम् ।
मध्ये स्वकेन्द्रे किलराशिषट्के कर्कान्मृगान्मध्यगतौ धनर्णम् ॥
मन्दस्फुटा सा च तयोनिता स्याच्छीघ्रा गतिः केन्द्रगतिर्ग्रहाणाम् ।
हत्वाथ तां शीघ्रफलान्तरेण षष्ट्या भजेदाप्तफलं धनर्णम् ॥
मन्दस्फुटायां निजशीघ्रकेन्द्रे मृगादिकर्कादिगते द्वितीये ।
भवेत्तदा भूमिजपूर्वकानां गतिः स्फुटा सैव नभश्चराणाम् ॥"

अत्रोदाहरणम्—कुजस्य मध्यमागतिः ३१।२६ मन्दफलान्तरेणा ००।०७ नेन गोमूत्रिकया गुणिता जाता ००।२१७।१८२ षष्ट्या भक्ता लब्धं ००।०३।४० इदं कर्कादिकेन्द्रत्वान्मध्यगतौ धनं कार्य्यमतः ००।३५।०६ इयमंशादिमन्दस्फुटा गतिः, अनया शीघ्रागतिः ५६।८ हीना कलादिः २४।०२ केन्द्रगतिः स्यात्, सा च शीघ्रफलान्तरेणा ००।२० नेन गुणिता ००।४८०।४० षष्ट्या भक्ता लब्धं ००।०८।०१ अनेन मृगादिकेन्द्रत्वान्मन्दस्फुटा गति ००।३५।०६ युता जाता कुज-स्पष्टागतिः ००।४३।०७॥ एवं बुधादीनामपि गतयः साध्याः (द्र० ४ चक्रम्)

अथायनांशानयनपद्यम्—

"शाकमेकाब्धिवेदोनं द्विःकृत्वा दशभिर्हरेत् ।
लब्धं हीनञ्च तत्रैव षष्ट्याप्ता अयनांशकाः ॥
लवीकृतोऽर्कस्त्रिगुणो नखाप्तस्तावन्मिताभिर्विकलाभिराढ्याः ।

अत्रोदाहरणम्—शकः १७८० एकाब्धिवेदैः ४२१ रेभिहीनः १३५९ अयं स्थानद्वये स्थाप्यः द्वितीयस्थो दशभिभक्तः १३५।५४ अनेन प्रथमस्थानस्थो हीनः १२२३।०६ षष्ट्या भक्तो लब्धं २०।२३।०६ वर्षारम्भेऽयनांशकाः । अथ लवीकृतः सूर्य्यः ३१२।५७।३८ त्रिभिर्गुणितः

९३८।५२।५४ विंशत्या भक्तो लब्धं ४७ आभिर्विकलाभिर्वर्षारम्भकालिकायनांशा युताः जाता इष्टायनांशाः २०।२३।५३।

अथ लङ्कोदयेभ्यः स्वदेशोदयानयनपद्यम्—

मेषादिगे सायनभागसूर्य्ये दिनार्धजाभा पलभा भवेत्सा।
त्रिष्ठा हता स्युर्दशभिर्भुजङ्गैर्दिग्भिश्चरार्धानि गुणोद्धृतान्त्या॥
लङ्कोदया विघटिका गजभानि गोङ्क-
दस्राग्निपक्षदहनाः क्रमगोत्क्रमस्थाः।
हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थै-
र्मेषादितो घटत उत्क्रमतस्त्विमे स्युः॥

मिथिलादेशीयपलभा ६ अत उपरोक्तपद्यानुसारेण चरखण्डानि ६०॥४८॥२०

	लंकोदयाः चखं	स्वोदयाः	काश्मीरोदयाः
मी. मे.	२७८—६०	= २१८	२९८
कु. वृ.	२९९—४८	= २५१	२३३
म. मि.	३२३—२०	= ३०३	२९६
धं. क.	३२३+२०	= ३४३	३५०
वृं. सिं.	२९९+४८	= ३४७	३६५
तु. कं.	२७८+६०	= ३३८	३५८

पलादिन

अतएव वृद्धोक्तं पद्यम्—

"अष्टेन्दुपक्षाः शशिबाणपक्षा गुणाभ्ररामा गुणवेदरामाः।
शैलाब्धिरामा वसुरामरामाः क्रमोत्क्रमान्मेषतुलादिमानम्॥"

अथ लग्नानयनपद्यम् नीलकण्ठ्याम्—

तात्काले सायनार्कस्य भुक्तभोग्यांशसंगुणात्।
स्वोदयात् खाग्निह्रल्लब्धं भुक्तं भोग्यं रवेस्त्यजेत्॥
इष्टनाडीपलेभ्यश्च गतगम्यान्निजोदयान्।
शेषं खत्र्याहतं भक्तमशुद्धेन लवादिकम्॥
अशुद्धशुद्धभे हीनयुक् तनुर्व्ययनांशकम्।

अथ कदा कथं लग्नं साध्यं तदर्थं पद्यम्—

"लग्नं सूर्य्योदयादिष्टदण्डैर्भोग्यप्रकारतः।
रात्रिशेषघटीभिस्तु साध्यं भुक्तप्रकारतः॥
यामिनीगतदण्डैर्वा लग्नं षड्भयुताद्रवेः।

भोग्यप्रकारतस्त्वेवं दिनशेषसमुद्भवैः ॥
दण्डैः सषड्भरवितः साध्यं भुक्तप्रकारतः ।
क्रियालाघवमेवं स्याज्ज्ञेयं गोलविदा सदा ॥"

अत्रोदाहरणम्—अथ सूर्योदयादिष्टघट्यः ४०।३६ अत्र तावल्लाघवार्थं रात्रिगतेष्टघटीभि १२।२२ राभिः सषड्भसूर्याच्च भोग्यप्रकारेण लग्नं साध्यते । स्पष्टो रविः १०।१२।५७।३८ अयनांशाः २०।२३।५३ सषड्भसायनः सूर्यः ५।०३।२१।३१ अस्य भुक्तांशाः ३।२१।३१ त्रिशदंशेभ्यः ३० शोधिता जाताः सूर्यस्य भोग्यांशाः २६।३८।२९ अथ सषड्भसायनार्कस्य कन्याराशिगतत्वात् पूर्वानीतैर्भोग्यांशैः कन्यकोदयो ३३८ गुणितः ९००४।४७।२२ खाग्न्यु ३० द्धृतो जातो भोग्यकालः पलादिः ३००।०९।३५ एवं भुक्तांशैः भुक्तकालो भवति । अथेष्टघटीपलेभ्यो ७४२ भोग्यकालः ३००।०९।३५ शोधितः शेषम् ४४१।५०।२५ अस्मात्तुलोदयः ३३८ शोधितः शेषम् १०३ । ५० । २५ तुलादग्रे वृश्चिकोदयमान ३४७ मिदं न शुद्धयत्यतस्तुलः शुद्धसंज्ञो वृश्चिकोऽशुद्धसंज्ञश्च ज्ञेयः । शेषं १०३।५०।२५ खत्र्याहतं ३११५।१२।३० अशुद्धोदयमानेना३४७ नेन भक्तं लब्धमंशाद्यम् ८।५८।३९ मेषादिशुद्धपर्यंतं राशिसंख्या ७ अस्यां लब्धांशाद्ये योजिते जातम् ७।८।५८।३९ इदमयनांशै २०।२३।५३ र्हीनं जातं प्रथमलग्नम् ६।१८।३४।४६ इदं सषड्भं सप्तमलग्नं ०।१८।३४।४६ ॥ लग्नसाधने विशेषः —

"इष्टाधिकानि सूर्यस्य भुक्तभोग्यपलानि चेत् ।
तदेष्टात् त्रिशता निघ्नात् सूर्याक्रान्तोदयैर्हृतात् ॥
लब्धांशै रहितो युक्तो रविरेव हि लग्नकम् ।
उदये रवितुल्यं स्याल्लग्नं षड्भयुतो रविः ॥
अस्तकाले भवेदेवं ज्ञेयं तत्त्वविदा सदा ॥ १ ॥"

अथ नतोन्नत-दशमचतुर्थभावसाधनमाह—

रात्रेः शेषमितं युतं दिनदलेनाह्नो गतं शेषकं
विश्लेष्यं खलु पूर्वपश्चिमनतं त्रिंशच्च्युतं चोन्नतम् ।
यत्पूर्वोन्नतषड्भयुक्तरवितः पश्चान्नतादित्यतो
यल्लङ्कोदयकैश्च लग्नमिव तन्माध्यं सषड्भं सुखम् ॥ २ ॥

व्या०—रात्रेः शेषं (अवशिष्टघट्यादिकं), इतं गतघट्यादिकं दिनदलेन दिनार्धेन युतं क्रमेण पूर्वपश्चिमनतं भवति, (अर्थात् रात्र्युत्तरार्धे जन्मसमयश्चेत्तदा रात्रिशेषं दिनार्धेन युतं पूर्वनतं, तथा रात्रिपूर्वार्धे जन्मसमयश्चेत् तदा रात्रिगतं दिनदलेन युतं पश्चिमनतं भवति) एवं अह्नो दिनस्य गतं शेषकं दिनदलेन विश्लेष्यं (दिनार्धाद् विशोध्यमित्यर्थः) तदा क्रमेण पूर्वपश्चिमनतं स्यात्। तन्नतं त्रिंशच्च्युतं त्रिंशतः शुद्धमुन्नतं स्यात् (पूर्वनते त्रिंशच्च्युते पूर्वोन्नतं, पश्चिमनते त्रिंशच्च्युते पश्चिमोन्नतं स्यादित्यर्थः)। अथ भावद्वयानयनं--यदित्यादि। पूर्वोन्नतषड्भयुक्तरवितः पूर्वोन्नतघटिकासषड्भसूर्याभ्यामित्यर्थः, तथा पश्चान्नतादित्यतः पश्चिमनतकालतत्कालसूर्याभ्यामित्यर्थः। लङ्कोदयकैर्लङ्काराश्युदयैः "लङ्कोदया विघटिका गजभानो" त्यादिभिः लग्नमिव यल्लग्नं तन्माध्यं दशमलग्नं स्यात् (अर्थात् पूर्वनते सति पूर्वोन्नतघटिकाद्यमिष्टकालं प्रकल्प्य, सषड्भसायनसूर्यं तात्कालिकसायनसूर्यं प्रकल्प्य, लङ्कोदयानेव स्वोदयान् प्रकल्प्य भोग्यप्रकारेण लग्नं साध्यं तद्दशमलग्नं स्यात्, एवं पश्चिमनते पश्चिमनतघटिकादिकमिष्टकालं, लङ्कोदयान् स्वोदयान् प्रकल्प्य तात्कालिकसायनसूर्यस्य भोग्यांशवशेन लग्नं साध्यं तद्दशमं भवतीत्यर्थः) तत् सषड्भं सुखं चतुर्थलग्नं भवतीति ॥ २ ॥

अथ नतोन्नतोपपत्तिः-- याम्योत्तरवृत्तेन खण्डितस्य खगोलस्य प्रागपरविभागेन कपालद्वयं भवति। तत्र याम्योत्तराहोरात्रवृत्तोर्ध्वसम्पातादहोरात्रवृत्ते सूर्यो यावतीभिर्घटीभिर्नतः स नतकालः। तथा याम्योत्तराहोरात्रवृत्ताधःसम्पाताद्यावतीभिर्घटीभिरुन्नतः स चोन्नतकालः, ऊर्ध्वयाम्योत्तरवृत्तात्क्षितिजावध्यहोरात्रवृत्ते दिनार्धं, ततश्चाधोयाम्योत्तरवृत्तावधि रात्रिदलम्। अतः प्राक्कपाले क्षितिजाधःस्थे सूर्ये रात्रिशेषं, पश्चिमकपाले क्षितिजाधःस्थे रात्रिगतमतो रात्रिशेषेण रात्रिगतेन पृथक् युतं दिनदलं क्रमेण पूर्वपश्चिमनतं स्यादेव। तथा प्राक्कपाले क्षितिजोर्ध्वस्थे रवौ कुजाद्रविं यावद् दिनगतं, पश्चिमकपाले दिनशेषमतो दिनगतेन दिनशेषेणोनितं दिनदलं क्रमात् प्रागपरसंज्ञको नतकालः स्यात्। तथा नत + उन्नत = ३० ∴ उन्नत = ३० − नत। ∴ उपपन्नम् नतोन्नतानयनम्। अथ दशमचतुर्थभावोपपत्तिः—क्रान्तिवृत्तयाम्योत्तरवृत्तयोरूर्ध्वसम्पातो दशमलग्नमधःसम्पातश्च चतुर्थलग्नं "मध्यलग्न-

मिति दक्षिणोत्तरे" इति भास्करोक्तेः। तदानयनं तु क्रियालाघवाद् भोग्यप्रकारेणैवाचार्येण कृतम्। यथा – पूर्वनते यावतीभिर्घटीभिरधो-याम्योत्तरवृत्ताद्रविरुन्नतस्तावतीभिरेव घटीभिः सषड्भरविरूर्ध्वयाम्योत्तरवृत्तान्नतो वृत्तयोः सम्पातद्वयस्य षड्भान्तरितत्वात्। अतः सषड्भसूर्यदशमलग्नयोरन्तरे सषड्भसूर्यस्य भोग्यांशाः मध्यलग्नस्य भुक्तांशाः तदन्तर्वर्तिराशयश्च, तत्सम्बन्धिकालश्चाहोरात्रवृत्ते पूर्वोन्नत-घटीतुल्य एव पूर्वोक्तयुक्त्या सिद्धोऽत एव "पूर्वोन्नतषड्भयुक्तरवित" इत्युक्तं युक्तमेव। तथा पश्चिमनते मध्यलग्नार्कयोरन्तरे रवेर्भोग्यांशाः, खलग्नभुक्तांशाः, तदन्तर्वर्तिराश्यंशाश्चेति तत्सम्बन्धिकालश्चाहोरात्र-वृत्ते नतकाल एवातोऽत्र स्थितिद्वयेऽपि भोग्ययुक्त्या दशमलग्नं भवितु-मर्हति। तथा स्वयाम्योत्तरवृत्तं निरक्षदेशीयक्षितिजं ध्रुवस्थानगतत्वात्, तस्मान्मध्यलग्नसाधने निरक्षोदयमानग्रहणमेव समुचितम्। तथा च दशमचतुर्थलग्नयोर्मिथः षड्भान्तरितत्वान्मध्यं सषड्भं सुखं स्यादेवे-त्युपपन्नम्॥ २॥

भा०—रात्रि में मध्यरात्रि से ऊपर इष्टकाल हो तो रात्रिशेष घटी को दिनार्ध में जोड़ने से पूर्वनत होता है, यदि मध्यरात्रि से पूर्व (पहले ही) इष्टकाल हो तो रात्रिगतघटी को दिनदल में जोड़ने से पश्चिमनत होता है। तथा दिन में मध्याह्न से पूर्व इष्टकाल हो तो दिनगतघटी को दिनार्ध में घटाने से पूर्वनत, यदि मध्याह्न से ऊपर इष्टकाल हो तो दिनशेष घटी को दिनार्ध में घटाने से पश्चिमनत होता है और पूर्वनत को ३० तीस में घटाने से पूर्वोन्नत तथा पश्चिमनत को ३० में घटाने से पश्चिमोन्नत होता है। इस प्रकार से यदि पूर्वनत हो तो पूर्वोन्नतघटी को इष्ट-काल कल्पना करे और सायनसूर्य में ६ राशि जोड़ करके सायनसूर्य कल्पना करे, तथा पश्चिमनत हो तो पश्चिमनतघटी को इष्टकाल कल्पना करे और तात्कालिक सायनसूर्य को सायनसूर्य, तथा लङ्कोदयमान को स्वोदयमान मानकर (दोनों संस्था में) भोग्य प्रकार से ही लग्नसाधन करे तो दशमलग्न होता है। उसमें ६ राशि जोड़ने से सुखभाव (चतुर्थलग्न) होता है॥ २॥

उ० टी०—अथ नतोन्नतसाधनम्-इष्टं ४०।३६ दिनमानेना २८।२४ नेन हीनितं जातं रात्रिगतेष्टदण्डमानम् १२।२२ इदं दिनार्धेना १४।७ नेन युतं जातं रात्रौ पश्चिमनतम् २६।२९ इदं ३० त्रिंशच्च्युतं जात-मुन्नतम् ३।३१॥

अथ दशमलग्नसाधनम्—

तत्र क्रियालाघवार्थं उन्नतघटीषड्भयुक्तरवितः भुक्तप्रकारेणोदा-

हरणं प्रदर्श्यते। तात्कालिकोऽर्कः १०।१२।५७।३८ अयनांशाः २०।२३।५३ सायनार्कः ११।०३।२१।३१ सषड्भः ५।०३।२१।३१ अस्य भुक्तांशाः ३।२१।३१ एभिः कन्योदयामानं २७८ गुणितम् ९३३।४१।३८ खाग्न्युधृतम् जातानि भुक्तपलानि ३१।७।२३, उन्नतपलेभ्यः २११ संशोध्य शेषं १७९।५२।३७ अस्मात् सिंहोदयो न शुद्ध्यत्यतः सोऽशुद्धसंज्ञः। शेषम् १७९।५२।३७ त्रिंशता गुणितम् ५३९६।१८।३० अशुद्धलङ्कोदयमानेना-२९९ नेन भक्तं लब्धमंशाद्यम् १८।२।५२ मेषादशुद्धराशिभ्यो ५ लब्धांशाद्यं शोधितं जातम् ४।११।५७।८ इदमेभि २०।२३।५३ रयनभागैर्हीनं जातं दशमलग्नम् ३।२१।३३।१५ एतद्राशिषट्केन युतं जातं चतुर्थलग्नम् ९।२१।३३।१५ ॥ २ ॥

अथावशिष्टभावसन्ध्यानयनं तत्फलं चाह—

त्र्यंशो व्यस्तखभस्य भूयमहतो योज्यस्तनौ द्विच्युतो
बन्धौ तेऽपि च साङ्गभास्तनुमुखाः सन्धिर्द्वियोगोऽर्धितः।
शून्यं सन्धिषु भावगेऽखिलफलं स्याद्भावसन्ध्यन्तरे-
णाप्तं सन्धिखगान्तरं क्षयचयं भावाधिकेऽल्पे खगे ॥३॥

व्याख्या—व्यस्तखभस्य सप्तमभावोनदशमलग्नस्य त्र्यंशस्तृतीयांशः द्विष्ठः भूयमहतः एकत्रैकेनान्यत्र द्वाभ्यां गुणित इत्यर्थः पृथक् २ स तनौ लग्ने योज्यस्तदा क्रमेण द्वितियतृतीयभावौ भवतः। तथैव स एव त्र्यंशो द्विच्युतो द्वाभ्यां शुद्धो भूयमहतो बन्धौ चतुर्थभावे योज्यस्तदा क्रमेण पञ्चमषष्ठभावौ भवतः। तेऽपि चानन्तरानीता द्वितीय-तृतीय-पञ्चम-षष्ठभावाः साङ्गभाः षड्राशिसहिताः क्रमेणाष्टमनवमैकादशद्वादशभावा भवन्ति, एवं तनुमुखास्तन्वादयो द्वादश भावाः सिद्धाः। अथ सन्ध्यानयनं-द्वियोगोऽर्धितो द्वयोरासन्नस्थभावयोर्योगोऽर्धितः सन्धिर्भवति स एव पूर्वभावस्य विरामसन्धिरग्रिमभावस्यारम्भसन्धिः स्यादित्यर्थः। (अत्र विशेषः-भावद्वययोगे द्वादशाधिकत्वेऽपि चक्रत्यागो न कार्यः। तथा च पूर्वभावे यदि दशैकादश वा राशयोऽग्रिमभावे शून्यमेको वा राशिस्तदा शून्यैकस्थाने द्वादश संयोज्य योगः कार्यः।) अथ भावफलम्—सन्धिषु स्थिते ग्रहे शून्यं शून्यफलं, भावगे भावराश्यशादिभिस्तुल्ये ग्रहेऽखिलफलं पूर्णफलं रूपमितं स्यात्। भावाधिकेऽल्पे खगे सति सन्धिखगान्तरं भावसन्ध्यन्तरेणाप्तं फलं क्रमात् क्षयचयं भवति, (भावाधिके

ग्रहे विरामसन्धिखगान्तरं विरामसन्धिभावान्तरेण भक्तं फलं क्षयमवरोहाख्यं, भावाल्पे खगे आरम्भसन्धिग्रहान्तरमारम्भसन्धिभावान्तरेण भक्तं फलं चयमारोहाख्यं भवतीत्यर्थः ॥ ३ ॥

अत्रोपपत्तिः - प्रथमचतुर्थलग्नान्तरस्य तुल्यास्त्रयो विभागाः क्रान्तिवृत्ते द्वितीयादयस्त्रयो भावाः। तथा चतुर्थसप्तमान्तरस्य समास्त्रयो भागाः पञ्चमादयस्त्रयो भावाः, एवं सप्तमदशमान्तरेऽष्टमादयस्त्रयः, दशमप्रथमलग्नान्तरे चैकादशादयस्त्रयो भावाः प्राचीनैरुदिताः। अत एव लग्नचतुर्थान्तरस्य त्रिभागेन $= \frac{च-ल}{३} = \frac{६+च-ल-६}{३} = \frac{६+च-(६+ल)}{३} = \frac{दशम-सप्तम}{३}$ अनेनैकगुणितेन युतं लग्नं द्वितीयो भावो द्विगुणेन युतं तृतीयो भावः स्यादेव। तथा चतुर्थसप्तमान्तरत्र्यंशेन $= \frac{स-च}{३} = \frac{६-६+स-च}{३} = \frac{६-(च+६-स)}{३} = २-\frac{(द स)}{३}$ अनेनैकगुणेन युतो बन्धुभावः पञ्चमो भावो भवितुमर्हति. द्विगुणेन युतस्तदा षष्ठभावः स्यादेव। तथा वृत्तसम्पातद्वयस्य षड्भान्तरितत्वात् द्वितीयादयोऽपि साङ्कभा अष्टमादयः स्युः। भावद्वयान्तरस्य मध्यस्थानमेव सन्धिः तस्य राश्यादिमानं=

$प्रभा + \frac{द्विभा-प्रभा}{२} = \frac{प्रभा+द्विभा}{२}$ अतः "सन्धिर्द्वियोगोऽर्धित इत्यन्तमुपपन्नम्। अथ भावफलयुक्तिः—तत्र प्राचीनवचनम्—

"भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु।
ह्रासः क्रमाद्भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैः॥"

आरम्भसन्ध्यग्रतो भावप्रवृत्तिस्तत एव फलप्रवृत्तिरपि ततः क्रमेणोपचीयमानं फलं भावसमे ग्रहे सति परमं रूपमितं भवति, तत्र सन्धिग्रहान्तरमपि परमं भावसन्ध्यन्तरतुल्यं भवति, ततः क्रमेण फलस्यापचयः विरामसन्धिसमे ग्रहे फलस्य नाशस्तत्र सन्धिखगान्तरमपि शून्यमतः सन्धिखगान्तरवशेनैव फलस्योपचयापचयौ सिद्धावतोऽनुपातो यदि भावसन्ध्यन्तरतुल्यसन्धिखगान्तरेण परमं फलं रूपमितं १ लभ्यते तदेष्टसन्धिखगान्तरेण किमिति $\frac{१ \times (सं\backsim ग्र)}{भा \backsim सं} = \frac{सं \backsim ग्र}{भा \backsim सं}$ इष्टस्थाने भावफलमित्युपपन्नम् सर्वम् ॥३॥

भा०—दशमभावमें सप्तमभावको घटाकर उसका तृतीयांश लग्नमें जोड़नेसे द्वितीयभाव, और द्विगुणिततृतीयांश जोड़नेसे तृतीयभाव होता है, और उसी तृतीयांशको दो राशि २ में घटाकर शेषको चतुर्थभावमें जोड़नेसे पञ्चमभाव, और द्विगुणित शेषको चतुर्थ भावमें जोड़नेसे षष्ठभाव होता है। इस प्रकार २, ३, ५, ६, ये चार भाव हुए इनमें प्रत्येकमें ६ राशि जोड़नेसे क्रमसे ८, ९, ११, १२ ये चार भाव होते हैं, और चार भाव १, ४, ७, १० पूर्व श्लोकसे सिद्ध हो चुके हैं एवं तन्वादि द्वादशभाव सिद्ध हुए। आसन्नस्थ दो दो भावों का योगार्ध करनेसे प्रथमभावकी विराम सन्धि और अग्रिमभावकी आरम्भसन्धि होती है। सन्धिके तुल्य ग्रहके राश्यंशकला हो तो भाव फल शून्य, और भावके तुल्य हो तो सम्पूर्ण फल १ होता है। यदि भाव से अधिक (आगे) ग्रह हो तो विरामसन्धि ग्रहान्तरको विरामसन्धिभावान्तरसे भाग देनेसे लब्धि भावफल क्षय (अवरोही संज्ञक) होता है। यदि भावसे अल्प (पीछे) ग्रह हो तो आरम्भ सन्धिग्रहान्तरको आरम्भ सन्धि और भावके अन्तरसे भाग देनेसे लब्धि चय (आरोही संज्ञक) होता है ॥ ३ ॥

उ० दी०—व्यस्तखभस्यास्य ३।२।५८।२९ त्र्यंशः १।००।५९।२९ अत्र शेषम् २ अतः स्थानद्वयेऽपि सरूपोन्तिमावयवो ग्राह्योतः १।००।५९।३० अयं स्थानद्वये स्थाप्यः। एकत्रैकेन गुणितः १।००।५९।३० लग्नेना ६।१८।३४।४६ नेन युतो जातो द्वितीयभावः ७।१९।३४।१६। अन्यत्र द्वाभ्यां हतः २।१।५९।०० लग्नेना ६।१८।३४।३६ नेन युक्तो जातस्तृतीयो भावः ८।२०।३३।४६। अथ द्वाभ्यां २ व्यस्तखभस्य त्र्यंशः १।००।५९।३० शोधितः ००।२९।००।३० एकगुणेनानेन ००।२९।००।३० युक्तः सुखभावः ९।२१।३३।१५ जातः सुतभावः १०।२०।३३।४५ द्विगुणेना १।२८।१।०० नेन सुखभावो ९।२१।३३।१५ युक्तो जातो रिपुभावः ११।१९।३४।१५। सिद्धा इमे षड्भावाः भार्धयुक्ता अपरेऽपि षड्भावाः स्युरेवं द्वादश भावाः सिद्ध्यन्ति। द्र० ७ चक्रम्।

अथ सन्ध्यानयनोदाहरणम्—तनुभावः ६।१८।३४।४६, धनभावः ७।१९।३४।१६ अनयोर्योगः १४।८।९।२। अर्धितः ७।४।४।३१ अयं तनुभावस्य विरामसन्धिर्धनभावस्यारम्भसन्धिः। एवमग्रेऽपि। द्र० ७ चक्रम्।

भावकुण्डलीनिर्णयार्थं द्रष्टव्यम् ८-९ चक्राधःस्थितगद्यम्। तथा ८-९ चक्रे च।

अथ रूपात्मकभावफलोदाहरणम्—रविः १०।१२।५७।३८ सुतभावस्यारम्भसन्धिः १०।६।३।२० अनयोरन्तरम् ००।६।५४।१८ इदं षष्ट्यो

सवर्णितम् २४८४८॥ अथ सुतभावः १०।२०।३३।४५ अस्यारम्भसन्धिः १०।६।३।३० अनयोश्चान्तरम् ००।१४।३०।१५ षष्ट्या सवर्णितम् ५२२१५ अनेन ग्रहसन्ध्यन्तरेण २४८४८ इदं भक्तं लब्धम् ००।२८।३३।६ इदं रूपात्मकभावफलम्। अस्यैव त्र्यंशः ६।३१।३ विंशोपात्मकं भावफलम्। एवमग्रेऽपि। द्रष्टव्ये १०—११ चक्रे। इति॥

अथ दृष्टिसधनमाह—

खैकाग्निद्विखवेदरामयमभूखाभ्राभ्रमेकादिभे
द्रष्ट्रा वर्जितदृश्यकस्य गुरुणा चेदष्टवेदे कृताः।
मन्देनाङ्कयमेऽसृजा नगगुणेऽङ्का भादिजाः संस्कृता
भागघ्नक्षयवृद्धिखानललवेनाभ्युद्धृता दृग् भवेत्॥४॥

व्या०—यः पश्यति स द्रष्टा। यो दर्शनार्हः स दृश्यः दृश्य एव दृश्यकः। द्रष्ट्रा वर्जितदृश्यकस्य द्रष्ट्रोनितस्य दृश्यस्यैकादिभे शेषे सति क्रमेण खैकाग्निद्विखवेदरामयमभूखाभ्राभ्रं भादिजाः राशिसम्बन्धिनोङ्का दृष्टिध्रुवाङ्का भवन्ति। अथ गुरुशनिकुजानां विशेषमाह—चेद् गुरुर्द्रष्टा तदा गुरुणा वर्जितदृश्यकस्याष्टवेदे अष्टभे चतुर्भे च कृताश्चत्वारो दृष्टिध्रुवांका ग्राह्याः। मन्देन शनैश्चरेण वर्जितस्यांकयमे (६।२) नवभे द्विभे च शेषे कृताश्चत्वार एव। तथाऽसृजा मंगलेन वर्जितस्य नगगुणे (७।३) सप्तभे त्रिभे शेषे कृताश्चत्वार एवांका भवन्ति। अन्यांकभे शेषे तु यथाक्रमं पूर्वोक्ता एवांका भवन्तीत्यर्थः। ते भादिजा अंका भागघ्नक्षयवृद्धिखानललवेन संस्कृताः (यो भादिजोऽङ्कस्तस्मादग्रिमांकोऽल्पश्चेत्तदा तयोरन्तरं क्षयः, यद्यग्रिमांकोऽधिकस्तदा तदन्तरं वृद्धिर्भवति अतः शेषस्यांशादिगुणितक्षयवृद्धिस्त्रिंशांशेन क्रमादूनयुताः) ते चाभ्युद्धृताश्चतुर्भक्तास्तदा दृग् दृष्टिर्भवेत्॥ ४॥

अत्रोपपत्तिः—'त्र्याशं त्रिकोणं चतुरस्रमस्तं पश्यन्ति खेटाश्चरणाभिवृद्ध्या। मन्दो गुरुर्भूमिसुताः परे च क्रमेण सम्पूर्णदृशो भवन्ति॥" इति वचनेन यदि द्रष्टृदृश्यग्रहयोरन्तरमेको राशिस्तदा द्रष्टुर्ग्रहात् दृश्यो द्वितीये राशौ तत्र दृष्टिः शून्यम्। यदि तयोरन्तरं द्वौ राशी तदा द्रष्टृग्रहात्तृतीये दृश्यग्रहस्तत्रैकचरणो दृष्टिः, यदि तयोरन्तरं राशित्रयं तदा दृश्यस्य चतुर्थस्थानस्थितत्वात् त्रिपादमिता दृष्टिरेवं सर्वे दृष्टिध्रुवांका उपपद्यन्ते। अनयैव युक्त्योपरोक्तवचनेन गुरोश्चतुरष्टरा-

श्यन्तरे, शनेर्द्विनवराश्यन्तरे, भौमस्य त्रिसप्तराश्यन्तरे सम्पूर्णदृष्टिश्चतुश्चरणात्मिका भवत्यतस्तत्र तेषां चत्वारो राशिजाङ्को ग्राह्य इत्युपपन्नम्।

एवं सिद्धदृष्टिचरणचक्रम्—

शेषराशि-	१	२	३	४	५	६	७	८	९	१०	११	१२
दृष्टिपादाङ्काः-	०	१	३	२	०	४	३	२	१	०	०	०

अथ दृष्टिसाधनोपपत्तिः—द्रष्टुर्ग्रहात् कियतान्तरेण दृश्यग्रहोऽग्रतो वर्तते तज्ज्ञानार्थमेव द्रष्ट्रा वर्जितः कार्य्यः। तत्र शेषराशिसंख्याधःस्थोऽङ्को ग्राह्योंऽशादिभिश्चानुपातो—यदि त्रिशदंशैर्गतैष्यान्तरतुल्यक्षयो वृद्धिर्वा लभ्यते तदा शेषांशैः किमिति $= \frac{(\text{ग}-\text{ए}) \times \text{शेष}}{३०}$

अनेन फलेन गताङ्कः क्षयात्मकेन हीनो, वृद्ध्यात्मकेन युक्तः कार्य्यस्तदा चरणात्मिकेष्टदृष्टिः स्यादतः सा चतुर्भक्ता रूपादिका भवतीत्युपपन्नम् ॥४॥

भाषा—देखनेवाला द्रष्टा और जिसको देखे वह दृश्य कहलाता है। इसलिये जिस ग्रहकी दृष्टि साधन करना हो वह द्रष्टा, और जिस ग्रह वा भाव पर दृष्टि विचार करना हो वह दृश्य है। द्रष्टा ग्रहको दृश्यमें घटाकर राशिस्थानमें यदि एक शेष बचे तो ०, दो बचे तो १, तीन बचे तो ३, चार बचे तो २, पाँच बचे तो ०, छ बचे तो ४, सात बचे तो ३ आठ बचे तो २, नौ बचे तो १, और दश, ग्यारह, बारह, बचे तो ०, ये राशिज अंक होते हैं। फिर राशिज अंक और उससे अग्रिम अंक के अन्तर से शेष अंशादि को गुणा करके उसमें ३० का भाग देकर लब्ध (राशिज अंक से अग्रिमांक अल्प हो तो क्षय, और अधिक हो तो चय होता है। उसको) क्षय को राशिज अंक में घटावे और चय को जोड़े फिर उसमें चार का भाग देने से लब्धि रूपादिक दृष्टि होती है ॥४॥

उ० दी०—द्रष्ट्रा रविणा १०।१२।५७।३८ दृश्यकश्चन्द्रो ७।१।४।१५ वर्जितः शेषम् ८।१८।६।३७ अत्र राशिः ८ अतो भादिजोऽङ्कः २ एतस्याग्रिमाङ्कः १ अनयोरन्तरमृणम् १ अनेन शेषांशान् १८।६।३७ संगुण्य १८।६।३७ त्रिंशता विभज्य लब्धेना ००।३६।१३ नेन भादिजोऽङ्कः २ रहितः १।२३।४७ अब्ध्युद्धृतो जाता चन्द्रोपरि रवेर्दृष्टिः

०।२०।५७ एवं सर्वेषां ग्रहाणाम् द्र० १२ चक्रम् । एवमेव भावोपरि-ग्रहाणां दृष्टिर्भवति द्र० १३ चक्रम् ॥ ४ ॥

अथ ग्रहाणामुच्चबलं सप्तवर्गजबलं चाह –

नीचोनो भगणाच्च्युतः षडधिकश्चेत्षड्हृदौचं बलं
स्वर्क्षेऽर्धं समभेऽष्टमस्त्रिचरणा मूलत्रिकोणे बलम् ।
मित्रर्क्षेऽङ्घ्रिरधीष्टभे त्रय इभांशा वैरिभेऽष्ट्यंशको
दन्तांशोऽध्यरिभे गृहादिपवशात्खेटस्य सप्तैक्यजम् ॥५॥

व्या० - नीचोनो ग्रहश्चेद्यदि षडधिकस्तदा भगणाद् द्वादशराशिभ्यश्च्युतः शोधितः षड्हृत् षड्भक्तः फलं औच्चमुच्चसम्बन्धिबलं भवति, स्वर्क्षे स्वराशौ अर्धं रूपार्धं चरणद्वयमिति यावत् बलं स्यात्, समभेऽष्टमोऽष्टमांशो बलं, मूलत्रिकोणे त्रिचरणाः, मित्रर्क्षेऽङ्घ्रिरेकचरणः, अधीष्टभेऽधिमित्रराशौ त्रय इभांशास्त्रिगुणिताष्टमांश इत्यर्थः, वैरिभे शत्रुराशौ अष्ट्यंशः षोडशांशः, अध्यरिभेऽधिशत्रुराशौ दन्तांशो द्वात्रिंशद्भागो बलं स्यात् । एवं खेटस्य सप्तैक्यजं सप्तानां (गृह–होरा-द्रेष्काण-सप्तमांश–नवमांश-द्वादशांशत्रिंशांशानां) वर्गाणामैक्यजं योगजं बलं गृहादिपवशात् गृहादिसप्तवर्गस्वामिवशात् ग्राह्यमित्यर्थः । अत्रत्यविशेष उदाहरणे विलोक्यः ॥५॥

अत्रोपपत्तिः – यः कश्चिदुच्चस्थित उच्चकर्मकृत् स बलवान्, यश्च नीचस्थो नीचकर्मकृत् स निर्बलो भवतीति सर्वत्र प्रसिद्धमेवास्ति । अत एव नीचस्थस्य ग्रहस्यापि बलं शून्यं, तत उच्चाभिमुखं गच्छतो बलमप्युपचीयमानं परमोच्चस्थाने परमं रूपमितं भवितुमर्हति । अत एव यथा यथा नीचग्रहयोरन्तरमधिकं तथा तथा बलस्याप्याधिक्यमतो नीचग्रहान्तरवशेनैवोच्चबलस्यानयनं समुचितम् । उच्चसमे ग्रहे नीचग्रहान्तरं परमं षड्राशिसमं तत्र यदि परममुच्चबलं रूपमितं तदेष्टनीचग्रहान्तरेण किमिति= $\frac{(\text{ग्र} - \text{नी}) \times १}{६}$ = इष्टोच्चबलं स्यादेव । तथा च परमोच्चस्थानाद् भिन्नस्थानस्थे ग्रहे नीचग्रहान्तरं यदेव षड्भाल्पं तदेव बलानयनार्थं ग्राह्यम् । तत्तूच्चात् पृष्ठस्थे ग्रहे नीचोनो ग्रहः षड्भाल्प एव । उच्चादग्रस्थे ग्रहे नीचोनो ग्रहः षड्भाधिकः स भगणाच्च्युतः षड्भाल्पो ग्रहोननीचसमो भवितुमर्हत्यतो

"नीचोनो भगणाच्च्युतः षडधिकः" इत्युक्तं सयुक्तिकमेव। उच्चस्थाने सर्वोत्कृष्टत्वाद्रूपमितं पूर्णं बलं, ततः क्रमापचयेन मूलत्रिकोणादौ तारतम्यात् त्रिचरणादिबलं स्वीकृतमाचार्यैरित्युपपन्नम्॥ ५॥

भा॰—स्पष्ट ग्रहमें अपने नीचको घटावे यदि ६ राशिसे अल्प हो तो उसीमें ६ का भाग देनेसे, यदि ६ राशि से अधिक हो तो उसको १२ राशिमें घटाकर शेषमें ६ का भाग देनेसे उस ग्रहका उच्च बल होता है। अपनी राशिमें दो चरण, समकी राशिमें, अष्टमांश, मूलत्रिकोणमें तीन चरण, मित्रकी राशिमें एक चरण, अधिमित्रकी राशिमें त्रिगुणित अष्टमांश, शत्रुकी राशिमें षोड्शांश, अधिशत्रुकी राशिमें बत्तीसवाँ भाग बल होता है। इस प्रकार ग्रहोंके सप्तवर्गज बल गृहादि सप्तवर्गके स्वामीके वशसे ग्रहण करना चाहिए। अर्थात् ग्रह जिसके वर्ग में हो वह मित्र शत्रु आदिमें जो हो वही बल ग्रहण करे॥

विशेष—जो राशि स्वगृह और मूलत्रिकोण दोनों होता हो, अथवा उच्च,स्वगृह और मूलत्रिकोण तीनों होता हो तो वहाँ कौन बल ग्रहण करना चाहिए इस विषयके निर्णयमें सारावलीके वचन उदाहरण (२४) चक्रमें लिखा है देखो॥५॥

उ० दी० – अत्र तावत् ग्रहाणामुच्चनीचविभागो बृहज्जातके—

'अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुंगाः।
दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः॥"

अत्र सूर्यः १०। १२। ५७। ३८ अस्य नीचम् ६।१० नीचोनः सूर्यः ४।२।५७।३८-षड्भाल्पत्वाच्चक्रान्न शोधितोऽतः षड्भक्तलब्धं शून्यम् ०० शेषम् ४।२।५७।३८-षष्ट्या संगुण्य स्वस्वस्थानीयहारेण विभज्य लब्धमुपर्युपरि संयोज्य जातम् २४५।२७।३८षड्भक्तलब्धं ४० शेषम् ५।२७।३० पुनः षष्ट्या संगुण्य स्वस्वहारेण विभज्य जातं राश्यादिस्थानीयम् ३५४।३ षड्भक्तलब्धम् ५६ अतः रवेः रूपाद्युच्चबलम् ००।४०।५६ एवं सर्वेषाम्। द्र० १४ चक्रम्।

अथ निसर्गमित्रसमशत्रवः १५ चक्रत एव ज्ञेयाः किमत्र लेखप्रयासेन। तात्कालिकमित्रामित्रज्ञानार्थं तु—

"अन्योन्यस्य धनव्ययायसहजव्यापारबन्धुस्थिता-
स्तत्काले सुहृद इति।"

यथात्र रवेर्द्वितीयो भौमः, चतुर्थो गुरुः, दशमश्चन्द्रः; एकादशशुक्रः एते मित्राणि। अन्योन्यस्येत्याद्युक्तस्थानेभ्योऽन्यत्रस्थौ बुधशनी तेन सूर्यस्य बुधशनी शत्रू भवतः। एवं सर्वेषां विचार्यम्। अधि·

मित्रादिचक्रार्थं तु द्रष्टव्या १७ चक्राधःस्थिता चण्डेश्वरोक्तिः। अलमत्र लेखविस्तरेणेति।

अथ सप्तवर्गेश्वरचक्रं तु बृहज्जातकादित एव ज्ञेयम्। ततो बलम्। यथा—रविरधिशत्रुगृहेऽतो रूपस्या १ स्य दन्तांशो गृहबलम् ००।'१।५२ । स्वहोरायामर्द्धम् ००।३०।०० शत्रुद्रेष्काणेऽतोऽष्ट्यंशकः ००।'३।४५। समसप्तमांशेऽतोऽष्टमांशकः ००।७।३०। अधिशत्रुनवमांशे दन्तांशः ००।०१।५२ अधिमित्रद्वादशांशे त्रय इभांशाः ००।२२।३० अधिमित्रत्रिंशांशेऽपि त्रय इभांशाः ००।२२।३० एवं सर्वेषाम्। द्र० २४ चक्रम्।

अथैषां सप्तवर्गजबलानां योगो रवेरैक्यजं बलम् १।२८।५८। एवं सर्वेषाम्। द्र० २५ चक्रम् ॥ ५ ॥

अथ युग्मायुग्मराशिनवांशबलं केन्द्रादिबलं चाह—

शुक्रेन्दू समभांशके हि विषमेऽन्ये दद्युरङ्घ्रिं बलं
केन्द्राद्येषु च रूपकार्धचरणान् यच्छन्ति खेटाः क्रमात्।
स्त्रीखेटौ चरमे नराः प्रथमके क्लीबौ च मध्ये तथा
द्रेष्काणे वितरन्ति पादमुदितं स्यात् स्थानवीर्यं त्विदम् ॥६॥

व्या०—शुक्रेन्दू समभांशके समराशौ समनवांशके वा स्थितौ तदाङ्घ्रिमेकचरणं बलं दद्याताम्, यदि समराशौ समनवांशे चोभयत्र स्थितौ तदा पादद्वयमन्यथा शून्यम्बलमित्यर्थत एव सिद्धं स्यात्। तथान्ये रविकुजबुधगुरुशनयः विषमे विषमराशौ विषमनवांशे वा स्थिताः अङ्घ्रिमेकचरणं बलं दद्युः, यदि विषमराशौ विषमनवांशे चोभयत्र स्थितास्तदा पादद्वयमन्यथा शून्यं बलं स्यात्। अथ केन्द्रादिबलमाह—केन्द्राद्येषु केन्द्र—पणफरापोक्लिमेषु स्थिताः खेटाः सर्वे ग्रहाः क्रमेण रूपकार्धचरणान् बलानि यच्छन्ति; केंद्रस्था रूपतुल्यं, पणफरस्था अर्धं, आपोक्लिमस्थाश्चरणमेकचरणं बलं ददतीत्यर्थः। अथ द्रेष्काणबलमाह—स्त्रीखेटौ, चन्द्रशुक्रौ चरमे तृतीयद्रेष्काणे, नराः पुरुषग्रहा रविकुजगुरवः प्रथमके प्रममद्रेष्काणे, तथा क्लीबौ नपुंसकौ शनिबुधौ मध्ये द्वितीयद्रेष्काणे पादमेकचरणं बलमिति यथोक्ता ग्रहाः वितरन्ति ददतीत्यर्थः। इदं पञ्चधोदितं स्थानवीर्यं स्यात् ॥ ६ ॥

अत्रत्रोपपत्तिः—समराशीनां स्त्रीराशित्वात् चन्द्रशुक्रयोश्च स्त्री-

ग्रहत्वादेतयोः समभांशके, तथाऽन्येषां पुरुषग्रहत्वात् विषमे पुरुषराशावेव बलप्रदत्वं समुचितम्।

केन्द्रादिबलार्थं तु गर्गवचनम्—"केन्द्रस्थः पूर्णबलो मध्यबलः पणफरस्थितस्तद्वत्। आपोक्लिमगः प्रोक्तो हीनबलः खेचरो मुनिभिरिति॥" अत एव केन्द्रस्थः पूर्णबलत्वाद्रूपमितं पणफरस्थो मध्यबलत्वादर्धं, आपोक्लिमस्थो हीनबलत्वाच्चरणं बलं दातुमर्हत्येवेति।

द्रेष्काणबलयुक्तिः — ग्रहास्तु पुंनपुंसकस्त्रीभेदात्त्रिधा सन्ति। तत्र पुरुषाणां प्रधानत्वात्प्रथमाधिकारः स्त्रीणां तूत्तराधिकारो भवति। तथा नपुंसकानां तयोर्मध्यस्थत्वान्मध्यमाधिकारः समुचित एवेत्यत एव "स्त्रीखेटौ चरमे" इत्यादि द्रेष्काणबलकथनं सयुक्तिकमेवेति॥६॥

भाषा—शुक्र और चन्द्रमा समराशि वा सम राशिके नवांशमें रहें तो १ चरण बल देते हैं (यदि समराशि और समराशिके नवांश दोनों में रहें तो दो चरणबल, और समराशि वा सम नवांशमें दोनों ही में न रहें तो युग्मायुग्म बल शून्य समझना चाहिये) और रवि मंगल बुध बृहस्पति शनि ये विषम राशि वा विषम नवांश में हों तो १ चरण, (विषम राशि और विषम नवांश दोनों में हों तो दो चरण, अन्यथा शून्य युग्मायुग्म बल) होता है। अब केन्द्रादि बल कहते हैं। केन्द्रस्थित ग्रह रूप (चारो चरण), पणफरस्थित २ चरण, आपोक्लिमस्थ १ चरण बल देते हैं। स्त्रीग्रह (शुक्र चन्द्रमा) तृतीय द्रेष्काण में; पुरुष ग्रह (रवि, मंगल, बृहस्पति) प्रथम द्रेष्काण में, नपुंसक (शनि बुध) द्वितीय द्रेष्काण में एक एक चरण द्रेष्काण बल देते हैं। ये उपरोक्त (उच्चबल, सप्तमवर्गजबल, युग्मायुग्मभांश बल, केन्द्रादि बल, द्रेष्काण बल) पाँच प्रकार के स्थान बल हैं॥ ६॥

उ० दी०—रविर्विषमेऽतोऽङ्घ्रिबलम् ००।१५।०० एवं सर्वेषां समविषमराशिगतानां बलानि ज्ञेयानि। द्र० २६ चक्रम्।

अथ रविः लग्नात्पञ्चमस्थः स तु पणफराख्यस्तेनार्द्धं बलम् ००।३०।०० एवं चन्द्रादीनां केन्द्रादिबलम्। द्र० २७ चक्रम्।

अथ सूर्यः पुरुषग्रहः स तु कुम्भस्य द्वितीयद्रेष्काणे तेन द्रेष्काणबलाभाव एव। एवं चन्द्रकुजबुधगुरूणां बलाभावो जातः। शुक्रस्तु स्त्रीग्रहः तृतीयद्रेष्काणस्थः तेन द्रेष्काणबलम् ००।१५।०० एवं शनेरपि। द्र० २८ चक्रम्।

अथ रवेरुच्चबलम् ००।४०।५६ सप्तवर्गजबलम् १।२६।५६ युग्मायुग्मभांशबलम् ००।१५।०० केन्द्रादिबलम् ००।३०।०० द्रेष्काणबलम्

००।००।०० एषां पञ्चानामैक्यं रवेः स्थानवलं जातम् १।५५।५८ एवं चन्द्रादीनामपि। द्र० २६ चक्रम् ॥६॥

अथ दिग्बल-कालबल-पक्षबलान्याह—

मन्दाल्लग्नमिनात्कुजाच्च हिवुकं शोध्यं विधोर्भार्गवात्
माध्यं ज्ञाद् गुरुतोऽस्तमत्र रसभात्पुष्टं त्यजेच्चक्रतः।
दिग्वीर्यं रसहृत्त्वथो समयजं रूपं सदा स्याद्विद-
स्त्रिंशद्भक्तनतोन्नते शशिकुजार्कीणां परेषां बले ॥७॥

व्या०—मन्दात् शनैश्चराल्लग्नं, इनात् सूर्यात् कुजाच्च हिवुकं चतुर्थलग्नं, विधोश्चन्द्रात् भार्गवाच्च माध्यं दशमलग्नं, ज्ञात् गुरुतश्चास्तं सप्तमलग्नं शोध्यं तद्रसभादधिकं चेत्तदा चक्रतो द्वादशराशिभ्यस्त्यजेत् तद् रसहृत् षड्भक्तं दिग्वीर्यं स्यात्। अथो समयजं वलमाह—विदो बुधस्य समयजं वलं सदा सर्वस्मिन् काले रूपं स्यात्। त्रिंशद्भक्तनतोन्नते क्रमेण शशिकुजार्कीणां परेषां च बले भवतः, त्रिंशद्भक्तनतं शशिकुजार्कीणां बलं, त्रिंशद्भक्तोन्नतं रविगुरुशुक्राणां बलं स्यादित्यर्थः ॥७॥

अत्रोपपत्तिः—यो ग्रहो यस्यां दिशि बलवान् तत्सम्बन्धि बलं दिग्बलमित्युच्यते। तत्र ग्रहाणां दिक्क्रमस्तु राशिचक्र एव। यथोक्तं भास्कराचार्यैः—"यत्र लग्नमपमण्डलं कुजे तद् गृहाद्यमिह लग्नमुच्यते प्राचि पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे ॥" एतेन लग्नं पूर्वदिशि, सप्तमलग्नं पश्चिमदिशि, चतुर्थलग्नमुत्तरदिशि दशमलग्न दक्षिणदिशीति प्रत्यक्षतोऽपि दृश्यते। तथा च—"दिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च"। इति वराहमिहिरवचनेन ग्रहाणां दिक्सम्बन्धेन वलोपचयापचयौ सिद्धौ। तत्र यथोक्तदिशि ग्रहो पूर्णवली ततश्च यथा यथा विप्रकर्षस्तथा तथा बलस्यापचयः, परमे विप्रकर्षे बलाभाव इति युक्त्या सिद्ध्यति। परमविप्रकर्षस्तु षड्भान्तर एव भवितुमर्हति। यथा-शनेः पश्चिमे (सप्तमलग्ने) पूर्णं बलं ततः क्रमापचयेन (प्राचि) प्रथमलग्ने बलाभावः ततश्च क्रमोपचयेन सप्तमे पुनः पूर्णं बलम्, अतो यथा यथा बलाभावस्थानग्रहयोरन्तरमधिकं तथा तथा बलाधिक्यमिति सिद्ध्यति। अतोऽनुपातेनेष्टदिग्बलसाधनं समुचितम्। यथा—यदि लग्नशन्योः पर-

मान्तरेण षड्राशिमितेन पूर्णं रूपमितं बलं लभ्यते तदेष्टलग्नशन्यन्तरेण किमिति शनेर्दिग्बलम् $= \frac{१ \times (श - ल)}{६}$। एवं सर्वेषा ग्रहाणां बलानयनमुपपद्यते। षड्भाल्पान्तरग्रहणार्थं चक्रशोधनमपि सयुक्तिकमेवेत्युपपन्नं दीग्वीर्यं रसहृदित्यन्तम्। अथ कालबलोपपत्तिः— "निशि शशिकुजसौराः सर्वदा ज्ञोऽह्नि चान्ये" इति वराहमिहिरवचनेन बुधस्य सर्वदा रूपं बलम्। शशिकुजार्कीणां रात्रौ बलवत्त्वान्मध्यरात्रौ पूर्णं बलं तत्र नतं पूर्णं त्रिंशद्घटिकातुल्यम्। दिने निर्बलत्वान्मध्याह्ने बलाभावस्तत्र नतमपि शून्यमतो नतवशेनैव बलोपचयापचयौ सिद्धावतोऽनुपातो यदि त्रिंशत्तुल्ये परमेनते पूर्णं बलं रूपमित लभ्यते तदेष्टनते किमिति $= \frac{१ \times नत}{३०} =$ शशिकुजार्कीणां बलम्। एव रविगुरुशुक्राणां दिने बलित्वान्मध्याह्ने पूर्णं बलं तत्रोन्नतं पूर्णं त्रिंसत्तुल्यम्, रात्रौ निर्बलत्वान्मध्यरात्रौ बलाभावस्तत्रोन्नताभावोतः पूर्ववदनुपातेन तेषां कालबलम् $= \frac{१ \times उन्नत}{३०}$ इत्युपपन्नम् ॥७॥

भा०—शनैश्चर में लग्न को, रवि और मंगल में चतुर्थभाव को, चन्द्र और शुक्र में दशम भाव को, बुध और बृहस्पति में सप्तम भाव को घटावे शेष यदि ६ राशि या ६ राशि से अल्प हो तो उसी में, यदि ६ राशि से अधिक हो तो १२ राशि में घटाकर जो बचे उस में ६ का भाग देने से लब्धि ग्रहों का दिग्बल होता है। अब कालबल कहते हैं—बुध का बल सर्वदा रूप [१] होता है। तथा नत घटी को ३० से भाग देने से लब्धि चन्द्र, मंगल, शनि का बल, और उन्नत घटी में ३० से भाग देने से लब्धि रवि, गुरु शुक्र का बल होता है ॥ ७ ॥

उ० दी०—रवे १०। १२। ५७। ३८ रसाद्धिबुकं ६। २१।३३।१५ विशोध्य शेषम् ००। २१। २४।२३ षड्भक्तलब्धम् ०० शेषम् २१।२४।२३ इदं षष्ट्या संगुण्य स्वस्वस्थानीयहरेण विभज्य लब्धमुपर्युपरि संयोज्य जातम् ४२। २४। २३ पुनः षड्भक्तलब्धम् ७ शेषम् ००। २४। २३ पुनरपि षष्ट्या संगुण्य स्वस्वहारेण विभज्य लब्धमुपर्युपरि संयोज्य राश्यादिस्थानियं जातम् ४८। २३। ०० अत्रापि षड्भक्तलब्धम् ८। अतो जातं रवेर्दिग्बलम ००। ७। ८। एवं चन्द्रादीनां श्लोकोक्त्या साध्यम्। द्र० ३० चक्रम्। अथ नतम् २६।२६ त्रिंशता भक्तं जातं शशि-

कुजार्कीणां बलम् ००।५२।५८। अथोन्नतम् ३ । ३१ । त्रिंशता भक्तलब्धं रविगुरुशुक्राणां बलम् ०० । ०७ । ०।२। बुधस्य सर्वदा बलम् १।००।०० एवं नतोन्नतबलं जातम् । द्र० ३१ चक्रम् ॥७॥

अथ पक्षबलं त्र्यंशबलं वर्षेशादिबलञ्चाह— .

शुक्लेऽन्त्ये तिथिहृद्गतैष्यतिथयो वीर्यं सतां भूच्युतं
पापानां द्विगुणं विधोरिदमथाह्नस्त्र्यंशकेषु क्रमात् ।
सौम्यार्कार्कभुवां निशः शशिसिताराणां च रूपं सदे-
ज्यस्याथाङ्घ्रिचयाद्बली किल समामासद्युहोरेश्वरः ॥८॥

व्या० — शुक्ले शुक्लपक्षे अन्त्ये कृष्णपक्षे क्रमेण तिथिहृद्गतैष्यतिथयः (शुक्ले तिथिभिः पञ्चदशभिर्हृता गततिथयः, कृष्णे पञ्चदशभक्ता एष्यतिथय इत्यर्थः) सतां शुभग्रहाणां वीर्यं बलं पक्षबलं स्यादिति। तत् शुभबलं भूच्युतं रूपाद्विशुद्धं पापानां पापग्रहाणां पक्षबलं स्यात् । विधोश्चन्द्रस्य इदं पक्षबलं द्विगुणं विधेयम् । अथ दिनरात्रित्रिभागबलमाह — अह्नो दिनस्य त्र्यंशकेषु क्रमात् सौम्यार्कार्कभुवां (प्रथमत्र्यंशे सौम्यस्य बुधस्य, द्वितीयत्र्यंशेऽर्कस्य सूर्यस्य, तृतीयत्र्यंशेऽर्कभुवः शनैश्चरस्येत्यर्थः रूपं बलं स्यात् । तथा निशो रात्रेस्त्र्यंशकेषु क्रमात् शशिसिताराणां चन्द्रशुक्रकुजानां रूपं बलं स्यात् । इज्यस्य बृहस्पतेः सदा सर्वस्मिन् काले रूपं बलं भवति । अथानन्तरं वर्षेशादिबलं कथयति समा—मासद्युहोरेश्वरः क्रमादङ्घ्रिचयाच्चरणवृद्धितो बली स्यात् (वर्षेश्वरस्यैकचरणतुल्यं, मासेश्वरस्य चरणद्वयं, दिनेश्वरस्य चरणत्रयं, होरेश्वरस्य चरणचतुष्टयं बलं भवतीत्यर्थः ॥८॥

अत्रोपपत्तिः—" बहुलसितगताः स्युः क्रूरसौम्याः क्रमेण " इति वराहमिहिरोक्तेन शुक्लपक्षे शुभग्रहाः बलिनः पापग्रहाः निर्बलाः, कृष्णपक्षे पापग्रहा बलिनः शुभाश्च निर्बला इति । तत्र शुक्लपक्षे द्विजराजस्य चन्द्रस्य शुक्लवृद्ध्या साधूनामिव शुभग्रहाणां बलवृद्धिः, चौराणामिव पापग्रहाणां बलक्षयः । एवं पूर्णिमान्ते चन्द्रशुक्लस्य परमत्वात् शुभानां बलं परमं रूपमितं, पापग्रहाणां बलाभावस्तत्र गतशुक्लतिथयः पञ्चदश, तथैष्यकृष्णातिथयश्च, पञ्चदश । अतः शुक्ले गततिथिवृद्ध्या, कृष्णे चैष्यतिथिवृद्ध्या शुभग्रहाणां बलवृद्धिः सिद्धाऽ-

तोऽनुपातेन शुक्लपक्षे शुभग्रहबलम् $= \frac{१ \times गति}{१५}$। एवं कृष्णपक्षे शुभबलम् $= \frac{१ \times एति}{१५}$। पापग्रहाणां तु पूर्वोक्तयुक्त्या शुक्ले एष्यतिथिवृद्धया कृष्णे च गततिथिवृद्धया बलवृद्धिस्ततोऽनुपातेन शुक्लपक्षे पापग्रहबलम् $= \frac{१ \times एति}{१५} = \frac{१५ - गति}{१५} = १ - \frac{गति}{१५}$। एवं कृष्णपक्षे पापबलम् $= \frac{१ \times गति}{१५} = \frac{१५ - एति}{१५} = १ - \frac{एति}{१५}$। एतेन शुभबलोनं रूपमेव पापबलं सिद्धमतो "भूच्युतं पापाना" मित्यन्तमुपपन्नम्। तथा चन्द्रस्य यावदेव पक्षबलं तावदेव चेष्टाबलमपि भवत्यतोऽत्रैव द्विगुणितं पक्षबलमेव तयोर्योगसमं गृहीतमत एव "प्राग्वन्न वीर्याय ते" इत्यग्रे वक्ष्यते। दिनरात्रित्र्यंशबलोपपत्तौ तु--"निशामुखे शीतरुचिर्बलीयान् भृगुर्निशीथे कुसुतो निशान्ते। प्रातर्बुधो मध्यदिने दिनेशः शनिर्दिनान्ते धिषणः सदैव ॥" इति होरामकरन्दोक्तमेव प्रमाणम्। अथ वर्षेशमासेशदिनेशहोरेशानां मध्ये वर्षेशस्य सर्वापेक्षयाऽधिककालेनावृत्तिर्भवति ततोऽल्पकालेन मासेशस्य ततोऽप्यल्पकालेन दिनेशस्य ततोऽल्पेन होरेशस्य पुनः पुनरावृत्तिर्भवति। अत आवृत्त्यधिक्यवशादेव पादवृद्धया वर्षेशादीनां बलानि पठितानीति॥८॥

भा०—शुक्लपक्ष में गत तिथि को, कृष्णपक्ष में एष्य तिथि को १५ से भाग देकर लब्धि शुभ ग्रह का पक्षबल होता है। और शुभ ग्रह के पक्षबल को १ में घटाकर पाप ग्रह का पक्षबल होता है। चन्द्रमा के पक्षबल को द्विगुणित कर देना चाहिये। अब त्र्यंशबल कहते हैं–दिन के प्रथम त्र्यंश में बुध का, द्वितीय त्र्यंश में सूर्य का, तृतीय त्र्यंश में शनि का रूप (१) बल होता है। रात्रि के प्रथम त्र्यंश में चन्द्रमा का, द्वितीय त्र्यंश में शुक्र का, तृतीय त्र्यंश में मङ्गल का रूप १ बल होता है। तथा बृहस्पति का सदा रूप १ बल होता है। और वर्षेश का १ चरण, मासेश का २ चरण, दिनेश का ३ चरण, होरेश का ४ चरण (रूप तुल्य) बल होता है॥८॥

उ० दी--गतैष्यतिथ्यानयनार्थं तु ३२ चक्राधःस्थितगद्ये "सूर्योनचन्द्रस्य लवार्कभाग" इत्यादिपद्यं विलोक्यम्। ततोत्र कृष्णपक्षत्वादेष्यतिथ्यादयः ८।२६।२७ एतत्पञ्चदशांशः ०।३३।५८ इदं शुभग्रहाणां पक्षबलम्। एतदेव रूपाच्छोधितं ०।२६।०२ इदं पापानां पक्षबलम्। पापग्रहशुभग्रहाणां निर्णयः ३२ चक्राधःस्थितगद्य एव द्रष्टव्यः। द्र० ३२ चक्रम्।

अथ रात्रेर्मध्यत्र्यंशे जन्म तेन शुक्रस्य रात्रित्र्यंशबलम् १।००।०० गुरोस्तु सर्वदा त्र्यंशबलं रूपतुल्यमेवान्येषां शून्यम् द्र० ३३ चक्रम्।

अथ समामासद्युहोरेश्वरज्ञानार्थं द्रष्टव्यं ३४ चक्राधःपद्यम्। ततो वर्षेशो होरेशश्चापि चन्द्र एवातोऽधिकारद्वयस्य बलम् १।१५।०० मासेश्वरो रविस्तेन चरणद्वयं बलम् ००।३०।०० दिनेशो बुधस्तेनास्य चरणत्रयं बलम् ००।४५।०० अन्येषामनधिकारिणां शून्यम्। द्र० ३४ चक्रम्।

अथ रवेर्नतोन्नतबलम् ००।७।'२ पक्षबलम् ००।२६।'२ दिनरात्रित्रिभागबलम् ००।००।०० वर्षेशादिबलम् ००।३०।०० एषां चतुर्णां योगेन जातं कालबलम् १।'३।'४ एवमन्येषाम्। द्र० ३५ चक्रम् ॥८॥

अथायनबलमाह—

सदा क्रान्तिभागैर्युता ज्ञस्य सिद्धाः
शनीन्द्वोर्युतोनाः क्रमाद्याम्यसौम्यैः।
विलोमं परेषां गजाम्भोधिभक्ता
भवेदायनं वीर्यमर्कस्य दृग्घ्नम् ॥ ९ ॥

व्या०-ज्ञस्य बुधस्य सदा याम्यैः सौम्यैर्वा क्रान्तिभागैर्युताः सिद्धा श्चतुर्विंशतिर्गजाम्भोधिभक्ता आयनमयनसम्बन्धि वीर्यं बलं भवेत्। शनीन्द्वोः शनिचन्द्रयोर्याम्यसौम्यैः क्रमाद्युतोनाः (याम्यक्रान्तिभागैर्युताः सौम्यैश्चोनाः) सिद्धा गजाम्भोधिभिरष्टचत्वारिंशता भक्ता आयनं बलं स्यात्। परेषां रविकुजगुरुशुक्राणां विलोमं याम्यक्रान्तिभागैरूनाः सौम्यैर्युताः सिद्धा गजाम्भोधिभक्ता लब्धिरायनं वीर्यं भवेत्। अर्कस्यायनं बलं दृग्घ्नं द्विगुणं कार्यम् ॥ ९ ॥

अत्रोपपत्तिः—अयनवशादुत्पन्नं बलमायनं बलम्। तद्बोधकं पद्यं सारावल्याम्—"उत्तरमयनं प्राप्ताः शुक्रकुजार्कसुरमन्त्रिणो बलिनः। याम्ये शशिरविपुत्रौ द्वयमपि शशिजः स्ववर्गसंस्थश्च॥" इति वचनेन बुधोऽयनद्वयेऽपि बलवानतो बुधस्य परमोत्तरगमनान्मिथुनान्ते परमं बलं रूपमितं, परमदक्षिणगमनाद्धनुरन्ते च परमं रूपमितं बलम्। तयोर्मध्ये गोलसन्धौ तु रूपार्धं बलं भमितुमर्हत्ययनद्वयेऽपि सबलत्वात्। ततः क्रान्त्युपचयेन बलोपचयोतोऽनुपातो यदि परमक्रान्त्यंशैश्चतुर्विंशत्यंशै रूपार्धतुल्यं बलमुपचीयते तदेष्टक्रान्त्यंशैः किमितीष्ट-

क्रान्तौ बलवृद्धिः $= \frac{\frac{१}{२} \times \text{बुक्रां,}}{२४} = \frac{\text{बुक्रां,}}{४८}$ एतद्युतं गोलसन्धिजबलं

बुधस्यायनं बलम् $= \frac{१}{२} + \frac{\text{बुक्रां,}}{४८} = \frac{२४ + \text{बुक्रां}}{४८}$ अत उपपन्नम् बुधस्यायनबलानयनम् । शनिचन्द्रयोर्याम्यायने बलवत्वात् परमयाम्यक्रान्तौ परमं रूपमितं बलं परमोत्तरक्रान्तौ बलाभावस्तयोर्मध्ये गोलसन्धौ रूपार्धं बलं भवितुमर्हति । तेन याम्यक्रान्तिवृद्ध्या बलवृद्धिः सौम्यक्रान्तिवृद्ध्या क्रमेण बलहानिरित्यतः पूर्ववदनुपातेन याम्यक्रान्तिभागैर्बलमानीय गोलसन्धिजबले योज्यं, सौम्यक्रान्तिभागैर्बलं प्रसाध्य गोलसन्धिजायनबला ($\frac{१}{२}$) दस्माद्विशोध्यमेवं शनिचन्द्रयोरायनबलानयनमुपपद्यते । अन्येषां (रविकुजगुरुशुक्राणां सौम्यायने बलित्वादुक्तयुक्त्या सौम्यक्रान्तिवृद्ध्या बलवृद्धिर्याम्यक्रान्तिवृद्ध्या बलह्रासस्तेन सौम्यक्रान्त्यंशैर्बलम्प्रसाध्य गोलसन्धिजबले योज्यं, याम्यक्रान्त्युत्पन्नबलं सन्धिजबलाद् रूपार्धमिताच्छोध्यमतो "विलोमं परेषामित्युपपद्यते । रवेरायनबलतुल्यमेव चेष्टाबलं भवत्यतो आयनबलमेव द्विगुणितं कृत्वाग्रेऽर्कस्य चेष्टाबलं बलत्वेन न गृहीतमतः "प्राग्वन्न वीर्याय ते" इति वक्ष्यते ॥९॥

भा०—बुध के उत्तर वा दक्षिण क्रान्त्यंश जो हो उसको सर्वदा चौबिस (२४) में जोड़कर ४८ का भाग देने से बुध का अयन बल होता है । तथा शनि और चन्द्रमा की याम्य क्रान्ति को २४ में जोड़कर, ओर सौम्य क्रान्ति को २४ में घटा कर ४८ का भाग देने से, एवं रवि मङ्गल बृहस्पति शुक्र की दक्षिण क्रान्ति को २४ में घटाकर, और उत्तर क्रान्ति को जोड़कर ४८ का भाग देने से आयन बल होता है । इस प्रकार सूर्य का अयन बल जो हो उसको दूना करें, तो चेष्टा बल सहित अयन बल होता है ॥९॥

उ० दी०—तत्र तावत् क्रान्त्यंशानयनपद्यं द्रष्टव्यम् ३६ चक्रतले । यथात्र रवेः—"चत्वारिंशदशीतिरित्यादिना" सायनार्कः ११।३।२१।३१ अस्य भुजांशाः २६।३८।२८ अस्य दशमांशलब्धम् २ अतो गताङ्कः ८० अग्रिमाङ्कः ११७ गतैष्याङ्कयोरन्तरम् ३७ अनेन शेषांशादयो ६।३८।२८ गुणिताः २४५।४३।५३ दशहृल्लब्धम् २४।३४।२३ अनेन गताङ्को ८० युक्तः १०४।३४।२३ दशभक्तः लब्धा दक्षिणक्रान्त्यंशाः १०।२७।२६ रवेर्दक्षिणगोलगतत्वात् । एवं चन्द्रादीनामपि । द्र० ३६ चक्रम् ।

अथ रवेः क्रान्तिभागै १०।२७।२६ रेभिर्याम्यगोलगतत्वात् सिद्धा २४ ऊनाः १३।३२।३४ गजाम्भोधिभि ४८ रेभिर्भक्ताः लब्धमायनं बलम् ००।१६।५६ एवमन्येषाम्। अत्रेदमप्यवधेयं यद्रवेरायनचेष्टाबलयोस्तुल्यत्वादत्रैवायनबलं द्विगुणं विधाय चेष्टाबलानयनं न कृतमाचार्य्येण, किञ्चेहोदाहरणे पृथक् चेष्टाबलमानीतं तेनैकगुणमेव चक्रे निहितम्। द्र० ३७ चक्रम् ॥ ९ ॥

अथ चेष्टाबलं नैसर्गिकबलं चाह—

मध्यस्पष्टयुतेर्दलोनितचलं चेष्टाख्यकेन्द्रं कुजात्
स्याच्चेत्तद्भगणाच्च्युतं षड्धिकं षड्हृच्च चेष्टाबलम्।
स्यादेकोत्तररूपमद्रिविहृतं नैसर्गिकं स्याद्बलम्
मन्दारज्ञसुरेज्यशुक्रशशभृत्तीक्ष्णद्युतीनां क्रमात् ॥१०॥

व्या० — मध्यस्पष्टयुतेर्दलोनितचलं मध्यस्पष्टग्रहयोगस्यार्धेनोनितं चलं शीघ्रोच्चं कुजात् कुजमारभ्य चेष्टाख्यकेन्द्रं स्यात्। तत् चेष्टाकेन्द्रं चेत् षड्धिकं षड्राशिभ्योऽधिकं तदा भगणाद् द्वादशराशितश्च्युतं शुद्धं षड्हृत् चेष्टाबलं स्यात्। अथ नैसर्गिकबलमाह-एकोत्तरं रूपं अद्रिविहृतं सप्तभिर्भक्तं क्रमात् मन्दारज्ञसुरेज्यशुक्रशशभृत्तीक्ष्णद्युतीनां नैसर्गिकं स्वाभाविकं बलं स्यात्। यथा रूपं सप्तभक्तं शनेर्बलं, रूपद्वयं सप्तभक्तं कुजस्य, रूपत्रयं सप्तभक्तं बुधस्यैवमग्रेऽपीति ॥१०॥

अत्रोपपत्तिः—"उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः। विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः ॥" इति वराहमिहिरोक्तेन कुजादयो वक्रोपगता विपुलबिम्बत्वात् चेष्टाबलसहिता भवन्ति। वक्रता तु नीचासन्ने तत्रापि परमनीचे बिम्बस्यातिविपुलत्वाच्चेष्टाबलं परमं रूपमितं तत्र शीघ्रकेन्द्रमपि परमं षड्राशिसमम्, ततश्चाग्रे बिम्बविपुलतायाः क्रमापचयाच्चेष्टाबलस्य ह्रासः परमोच्चस्थाने बिम्बस्यातिसूक्ष्मत्वाच्चेष्टाबलाभावस्तत्र शीघ्रकेन्द्रस्याप्यभावाऽत एव शीघ्रोच्चग्रहान्तरवृद्ध्यैव चेष्टाबलवृद्धिः सिद्धाऽत एव शीघ्रोच्चग्रहान्तरमेव चेष्टबलकेन्द्रत्वेनोक्तम्। शीघ्रोच्चग्रहान्तरज्ञानार्थमेव "षडधिकं भगणाच्च्युतम्" इत्युक्तम्। ततोऽनुपातो यदि परमनीचस्थाने षड्राशितुल्येन शीघ्रोच्चग्रहान्तरेण रूप-

मितं चेष्टाबलं तदेष्टशीघ्रोच्चग्रहान्तरेण किमिति = $\frac{(\text{शीउ-ग्र})}{6}$ = इष्टचेष्टाबलम्। एवं चेष्टाबलं कुजादीनां पञ्चानामेव यतो रवेश्चेष्टाबलमायनबलतुल्यमतस्तदेव द्विगुणितम्। तथा चन्द्रस्य चेष्टाबलं पक्षबलतुल्यमतः पक्षबलमेव द्विगुणितं पूर्वमेव गृहीतमिति। अत्र स्पष्टग्रहस्थाने स्पष्टमध्ययोर्योगार्धं फलद्वयार्धसंस्कृतमध्यतुल्यं स्वीकृतवानाचार्यैस्तत्रागम एव प्रमाणम्। अथ नैसर्गिकबलोपपत्तिः—"शकुबुगुशुचराद्या वृद्धितो वीर्यवन्तः" इति वराहमिहिरोक्तेन शन्यादयो ग्रहा वृद्धितः क्रमेण बलिनो भवन्ति। तत्र सर्वापेक्षया विम्बविपुलत्वात् सूर्यस्याधिकं बलं रूपमितम्, शनेः सर्वापेक्षया विम्बस्य सूक्ष्मत्वात् कारणादल्पं रूपसप्तमांशसमं $\frac{1}{7}$ भवितुमर्हति। ततो द्विगुणसप्तमांशसमं $\frac{2}{7}$ कुजस्य, त्रिगुणितसप्तमांशसमं $\frac{3}{7}$ बुधस्य। एव गुराः = $\frac{4}{7}$, शुक्रस्य = $\frac{5}{7}$, चन्द्रस्य $\frac{6}{7}$, रवेः $\frac{7}{7}$ = १। एतद्बलं सर्वदा स्थिररूपत्वान्नैसर्गिकमित्युक्तम्प्राचीनैरिति दिक् ॥१०॥

भा०—मध्यम स्पष्ट ग्रह के योगार्ध को शीघ्रोच्च में घटाने से भौमादि पाँच ग्रहों का चेष्टा केन्द्र होता है, यदि वह ६ राशि से अधिक हो तो फिर उसको १२ में घटाकर चेष्टाकेन्द्र समझना। उस केन्द्र में ६ का भाग देने से लब्धि चेष्टाबल होता है। तथा—(एक से सात तक) एकाद्येकोत्तर अंक को पृथक् पृथक् ७ से भाग देने से क्रम से शनि, मंगल, बुध, गुरु, शुक्र, चन्द्र, रवि इनका नैसर्गिक बल होता है। जैसे—१ में ७ का भाग देने से लब्धि ०।८।३४ शनि का। २ में ७ का भाग देने से ०।१७।९ मंगल का इत्यादि उदाहरण चक्र ४१ देखो ॥१०॥

उ० दी०—मध्यमकुजः ००।११।१६।४३ स्पष्टकुजः १०।२४।२७।१८ अनयोर्योगः ००।०५।४४।०१ अस्य दलं ००।०२।५२।००।३० अनेन कुजशीघ्रोच्चम् १०।११।११।४३ हीनं जातं चेष्टाख्यकेन्द्रम् १०।०८।१९।४२।३० इदं षडधिकमतो भगणेभ्यः १२ शोधितम् १।२१।४०।१८ इदं षड्भक्तं जातं कुजस्य चेष्टाबलम् ०।१७।१३ अत्रापि भजनप्रकार उच्चबलानयनवदेव ज्ञेयः। एवमन्येषामपि चेष्टाकेन्द्रबले साध्ये। द्र० ३८-३९ चक्रे। अथ रवेरायनबलम् ००।१६।५६ चेष्टाबलञ्च ००।१६।५६ अनयोर्योगः स्पष्टचेष्टाबलम् ००।३३।५२ एवं सर्वेषाम्। द्र० ४० चक्रम्। अथे ७ दं सप्तभिर्भक्तं लब्धं रवेर्नैसर्गबलम् १।००।०० एव ६ मिदं सप्तभक्तं लब्धम् चन्द्रनैसर्गिकबलम् ००।५१।२६ एवं सर्वेषाम्। द्र० ४१ चक्रम् ॥१०॥

अथ युद्धादिबलमाह—

युद्धे बाणवियोगहृत्खचरयोर्वीर्यैक्ययोरन्तरं
स्वं सौम्यस्थखगे क्षयं च यमदिक्संस्थस्य कुर्याद्बले।
सद्दृष्ट्यङ्घ्रियुगुग्रदृष्टिचरणोनं खेटवीर्यं भवेत्

व्या०—खचरयोः (भौमादिपञ्चानामन्यतमयोर्द्वयोः) ग्रहयोर्युद्धे (राश्यंशादितुल्यत्वे) सति तयोर्वीर्यैक्ययोः पूर्वोक्तषड्बलैक्ययोरन्तरं बाणवियोगहृत् (ग्रहयोर्दक्षिणोत्तरान्तररूपेण शरान्तरेण भक्तमित्यर्थः) युद्धबलं भवति। तत् सौम्यस्थस्योत्तरदिक्संस्थस्य बले स्वं धनं, यमदिक्संस्थस्य दक्षिणस्थस्य बले क्षयमृणं कुर्याद् गणक इति शेषः। शरान्तरं त्वैकदिशोरन्तरेण भिन्नदिशोर्योगेन भवतीति ज्ञेयम्। तथा यस्य ग्रहस्य यद्दिक्शरो भवति स तद्दिक्स्थो ज्ञेयः। एकदिक्स्थयोर्यस्याल्पः शरः स तद्भिन्नदिक्स्थो भवतीति मतिमतानुक्तमपि ज्ञेयम्। एवं पूर्वानीतबलं सद्दृष्ट्यंघ्रियुक् प्रागानीतशुभग्रहदृष्टियोगचतुर्थांशेन युक्तं उग्रदृष्टिचरणोनं पापदृष्टियोगचतुर्थांशेन हीनं कार्यं तदा खेटवीर्यं ग्रहबलं भवेत्॥

अत्रोपपत्तिः—भौमादिपञ्चग्रहाणामन्यतमयोर्ग्रहयो राश्यंशादितुल्यत्वं युद्धलक्षणम्। तत्र "विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः।" इति बृहज्जातकवचनेन युद्ध उत्तरस्थस्य जयवशाच्चेष्टाबलवृद्धिर्दक्षिणस्थस्य पराजयवाशाच्चेष्टाबलहानिः। उत्तरस्थस्य यावदेव बलाधिक्यं तावदेव दक्षिणस्थस्य बलाल्पत्वमपीत्यर्थात् सिद्धम्।

अत्रैककलातोऽल्पे शरान्तरेऽन्तराभाव एव स्वीकृतः। अतस्तत्र दक्षिणोत्तरान्तराभावेन जयपराजयाभावात् संस्काराभाव एव। ततश्च शरयोः कलातुल्येऽन्तरे दक्षिणोत्तरस्थत्वप्रवृत्तिस्तत्र ग्रहयोर्बलान्तरतुल्यो जयः पराजयश्च समुचितः। अथेष्टशरान्तरेणानुपातो-यदि कलामात्रेण शरान्तरेण बलान्तरतुल्यं बलं लभ्यते तदेष्टशरान्तरेण किमिति। अत्रेष्टशरान्तरस्य वृद्धौ बलस्य ह्रासात्, ह्रासे च वृद्धयाः "इच्छावृद्धौ फले ह्रासो ह्रासे वृद्धिः फलस्य तु। व्यस्तं त्रैराशिकं तत्र" इति व्यस्तत्रैराशिकेन बलान्तरमेकेन गुणितमिष्ट, शरान्तरेण भक्तम्$=\frac{\text{ब अं} \times १}{\text{श अं}}$ इदं फलमुत्तरस्थस्य जयित्वाद् बले

धनं दक्षिणस्थस्य पराजयोक्तेर्बले क्षयं समुचितमेव। अथ दृष्टिसंस्कारोपपत्तिः—"बलवान् मित्रस्वगृहोच्चनवांशेष्विक्षितः शुभैश्चापि।" इति लघुजातकोक्त्या शुभैर्दृष्टो बलवान्, पापदृष्टश्च निर्बलः। तत्र चन्द्रगुरुशुक्राः सदैव शुभाः रविकुजशनयश्च सदैव पापाः। बुधस्य शुभयोगे शुभत्वाच्चत्वारः शुभाः, पापयोगे पापत्वात् चत्वारः पापा अपि। अथ यदि चत्वारोऽपि शुभाः पूर्णदृष्ट्या पश्येयुस्तदा रूपतुल्यं दृग्बलं धनम्। यदि च चत्वारोऽपि पापाः पूर्णदृशा पश्येयुस्तदा रूपतुल्यं बलमृणं भवितुमर्हति। अत इष्टदृष्टियोगेनानुपातो यदि चतूरूपमितेन (४) सर्वदृष्टियोगेन रूपं (१) बलं लभ्यते तदेष्टदृष्टियोगेन किमिति $= \frac{१ \times दृष्टियो}{४}$ इति शुभदृष्टियोगचतुर्थांशो धनं पापदृष्टियोगचतुर्थांश ऋणं समुचितमेवेत्युपपन्नम् ॥१० + $\frac{३}{४}$॥

भा०—भौमादिक पाँच ग्रहों में यदि दो ग्रहों के राश्यंशादिक तुल्य हो तो युद्ध कहलाता है। जिन दो ग्रहों में युद्ध का लक्षण हो उन दोनों ग्रहों के षड्बलैक्यका अन्तर करके उसमें उन्हीं दोनों ग्रहों के शरान्तर कला से भाग देने से लब्धि युद्ध बल होता है। वह उत्तर दिशा में स्थित ग्रह के षड्बलैक्य में धन और दक्षिण दिशा में स्थित ग्रह के षड्बलैक्य में ऋण करे। तथा जिस ग्रह पर जितने शुभ ग्रह की दृष्टि हों उन दृष्टि योग के चतुर्थांश को जोड़े। और पापग्रह सम्बन्धि दृष्टियोग के चतुर्थांश घटावे तो ग्रहों का बल होता है। यहाँ युद्ध का लक्षण तथा शरसाधन उदाहरण चक्र ४३ के नीचे देखो ॥१० + $\frac{३}{४}$॥

उ० दी०—अत्र तावद्ग्रहाणां युद्धादिविचारस्तु ४३ चक्रसम्बन्धिगद्यपद्यदर्शनेनैव सुगमोऽलमत्र लेखविस्तरेणेति।

अथ दृग्बलविचारः तत्र रव्युपरि चन्द्रगुरुशुक्रशनीनां क्रमाद्दृष्टयः ००।३८।०३ ॥ ००।२५।३० ॥ ००।०८।३७ ॥ ००।४७।३५ अथ शुभानां चन्द्रगुरुशुक्राणां दृष्टियोगचतुर्थांशादस्मात् ००।१८।१७ पापस्य शनेर्दृष्टचतुर्थांशं ००।११।४५ विशोध्य शेषं रवेर्दृग्बलम् ००।०६।२३ एवमन्येषां द्र० ४२ चक्रम्।

अथ रवेः स्थानबलम् २।५५।५८ दिग्बलम् ००।०७।०८ कालबलम् १।०३।०४ निसर्गबलम् १।००।०० चेष्टाबलम् ००।३३।५२ दृग्बलम् ००।६।२३ एषामैक्यं जातं रवेः षड्बलैक्यम् ५।४६।२५ एवं चन्द्रादीनामपि ज्ञेयम् किं बहुविस्तरेणेति। द्र० ४३ चक्रम्।

अथ भावानां त्रिविधबलमाह—

भावानां बलमीशजं च नृचतुष्पादाख्यकीटाम्बुजाः ॥११॥
जायाम्ब्वाद्यखभोनिताः खलु ततो दिग्वीर्यवत्तद्युतं
सद्दृष्ट्यंघ्रियुगुग्रदृष्टिचरणोनं ज्ञेज्यदृग्युक् पुनः ॥

व्या०—भावानां तन्वादीनामीशजं (स्वामिबलमित्यर्थः) बलं स्यादित्येकम् । च (पुनः) नृचतुष्पादाख्यकीटाम्बुजा द्विपदचतुष्पदकीटजलचरसंज्ञकराशयो भावाः क्रमेण जायाम्ब्वाद्यखभोनिताः सप्तमचतुर्थप्रथमदशमभावै रहिताः कार्या इत्यर्थः । ततो दिग्वीर्यवत् "रसभात् पुष्टं त्यजेच्चक्रतो दिग्वीर्यं रसहृत्" इति पूर्वोक्तवत् बलं साध्यं तद्द्वितीयं दिग्बलम् । तद्युतं तेन युतं स्वामिबलं कार्य्यम् तत् सद्दृष्ट्यङ्घ्रियुक् शुभग्रहदृष्टियोगचतुर्थांशयुतमुग्रग्रहदृष्टिचरणोनं पापग्रहदृष्टियोगचतुर्थांशोनं कार्य्यम् । पुनर्ज्ञेज्यदृग्युग् बुधगुरुदृष्टिभ्यां युक्तं कार्य्यम् । एवं स्वामिबलदिग्बलयोगो भावबलं भवतीति । भावानां द्विपदचतुष्पदादिसंज्ञा चोदाहरण (४६) चक्राधोलिखिता ॥११+½॥

अत्रोपपत्तिः—स्वामिनि बलवति सर्वे बलिनो, निर्बले च स्वामिनि सर्वे निर्बला भवन्तीति बालैरपि बुध्यतेऽतो भावा अपि स्वस्वस्वामिबलेन बलिनो भवितुमर्हन्तीति "भावानां बलमीशजं" इति युक्तियुतमेवोदितम् । तथा "कण्टककेन्द्रचतुष्टयसंज्ञा सप्तमलग्नचतुर्थखभानाम् । तेषु यथाभिहितेषु बलाढ्याः कीटनराम्बुचराः पशवश्च ॥" इति वराहमिहिरोक्तेन नरराशयो लग्ने बलिनो भवन्ति । अर्थादेव लग्नतः परमान्तरिताः सप्तमभावे निर्बला भवन्ति । एतेन नरराशयो यथा यथा सप्तमभावान्तरितास्तथा तथा बलयुता भवन्ति । अत एव सप्तमभावनरराशिभावयोरन्तरतोऽनुपातेन भावदिग्बलसाधनं समुचितम् । यथा—यदि नरराशिभाव-सप्तमभावयोरन्तरेण षण्मितेन रूपं बलं लभ्यते तदेष्टान्तरेण किमिति =

$$\frac{(\text{नराभा} - \text{सभा})\,१}{६} = \text{नरराशिभावदिग्बलम्}$$

। एवमेव पूर्वोक्तवचनेनैव चतुष्पदभावादीनामपि दिग्बलानयनमुपपद्यते । पूर्वं ग्रहदिग्बलमप्येवमेवोक्तमतो "दिग्वीर्य्यवत्तदि" त्युक्तम् । तथा च "अधिपयुतो दृष्टो वा बुधजीवयुतेक्षितश्च यो राशिः स भवति बलवान्"

इति वराहमिहिरोक्तेन बुधजीवदृष्टानां बलवत्त्वाद् "ज्ञेज्यदृग्युक् पुनरित्युक्तम्।" "सद्दृष्ट्यङ्घ्रियुगुग्रदृष्टिचरणोनम्" इत्यस्योपपत्तिः प्रागेवाभिहितेति ॥११ + ½॥

भा०—अब भावोंके त्रिविध बल को कहते हैं—अपने अपने स्वामीका बल भावोंका प्रथम बल होता है। दूसरा दिग्बल जैसे—भाव नर राशि हो तो उसमें सप्तम भाव घटावे, यदि चतुष्पद हो तो चतुर्थ भाव को, यदि कीटराशि हो तो प्रथम (तनु) भावको, यदि जलचर राशि भाव हो तो उसमें दशमभावको घटाकर, अन्तर परसे ग्रहके दिग्बलके समान बल साधन करे (अर्थात् यदि अन्तर ६ राशिसे अल्प हो तो उसीमें, ६ राशिसे अधिक हो तो १२ में घटाकर शेषमें ६ का भाग देनेसे जो लब्धि हो) वह भावका दिग्बल होता है। इसको प्रथम (स्वामिबल) में जोड़े और उस भाव पर जितने शुभग्रहकी दृष्टि हों उनके योगके चतुर्थांश को उसमें जोड़े, और जितने पाप ग्रहोंकी दृष्टि हो उनके योगके चतुर्थांशको घटावे, फिर उसमें यदि बुध बृहस्पतिकी दृष्टि हो तो उनकी सम्पूर्ण दृष्टिको जोड़े। यह तीसरा भावका दृग्बल कहलाता है। इस प्रकार भावका स्पष्ट बल होता है ॥११ + ½॥ भावकी नृचतुष्पदादि संज्ञा उदाहरण ४६ चक्रके नीचे देखो ॥

उ० दी—भावानां बलमीशजमित्यत्र भावेशावगमकं पद्यम्—

"कुजशुक्रज्ञेन्द्वर्कज्ञशुक्रकुजजीवसौरियमगुरवः। भेशा" इति

अनेन तनुभावस्वामी शुक्रस्तस्य बलम् ७।१२।०१ इदमेव तनुभावबलमेव सर्वेषां भावानामिति द्र० ४४ चक्रम्। अथ नृचतुष्पदादिज्ञानम् ४६ चक्राधःस्थितपद्यावलोकनेनैव सुगमम्। अथ तनुभावस्तुलाराशिः स च नृसंज्ञकस्तेन तनुभावा ६।१८।३४। ४६ दस्मात् जायाभाव ००।१८।३४।४६ मिमं विशोध्य शेषम् ६ ००।०० इदं षड्भक्तं जातं तनुभावस्य रूपादिदिग्बलम् १।००।०० एवं सर्वेषां दिग्बलं साध्यम्। द्र० ४६ चक्रम्।

अथ पापानां तनुभावोपरिदृष्टयः--रदृ=००।२७।११ मंदृ १।००।०० बुदृ ००।२४।२१ शदृ ००।४४।४७ आसां योगः २।३६।१९ अस्य चतुर्थांशः ००।३९।०५ ऋणात्मकः। शुभग्रहाणां दृष्टयश्च चं.दृ ००।००।०० बृ.दृ ००।२।४५ शु.दृ ००।०३।३४ आसां योगः ००।०६।१९ अस्य चतुर्थांशः ००।०१।३५ धनात्मकः। अथ ऋणधनात्मकयोरन्तरमृणावशेषादृणम् ००।३७।३० इदं बुधगुरु-

दृष्टियोगेना ०० । २७ । ०६ नेन युक्तं तत्र "धनर्णयोरन्तरमेव योग" इत्यनेनान्तरम् ०० । १० । २४ ऋणात्मकम् । एवं सर्वेषां भावानां दृग्बलं साध्यम् । द्र० ४५ चक्रम् ।

अथ तनुभावस्य स्वामिबलम् ७।१२।०१ दिग्बलेनानेन १।००।०० युतम् ८।१२।०१ । इदमृणात्मकेन दृग्बलेनानेन ००। १० । २४ हीनं जातं तनुभावस्पष्टबलम् ८ । ०१ । ३७ । यत्र धनात्मकं दृग्बलं तत्र योज्यमिति । एवं सर्वेषां स्पष्टबलं साध्यम् । द्र० ४७ चक्रम् ॥११ + १॥

अथ कष्टेष्टसाधनार्थं चन्द्रार्कयोश्चेष्टाबलमाह--

व्यर्केन्दुस्त्रिभयुक्तसायनरविश्चेष्टाख्यकेन्द्रे तयो-
र्गोकष्टेष्टविधौ बले कुरु ततः प्राग्वन्न वीर्याय ते ॥१२॥

व्या०--व्यर्केन्दुः, त्रिभयुक्तसायनरविः क्रमेण तयोश्चन्द्रार्कयोश्चेष्टाख्यकेन्द्रे स्याताम् (अर्कोनश्चन्द्रश्चन्द्रस्य चेष्टाकेन्द्रं; त्रिभयुक्तसायनरविः सूर्यस्य चेष्टाकेन्द्रं भवतीत्यर्थः) । ततस्ताभ्यां चेष्टाकेन्द्राभ्यां गोकष्टेष्टविधौ (रश्मिकष्टेष्टसाधनार्थमित्यर्थः) प्राग्वद्भौमादिचेष्टावलवत् तयोश्चन्द्रार्कयोर्बले कुरु । ते चन्द्रार्कचेष्टाबले वीर्याय न स्याताम् (बलैक्ये उपयोगिनी न भवेतामित्यर्थः) ॥१२॥

अत्रोपपत्तिः — "उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः ।" इति वचनेन रवेः परमोत्तरगमने चेष्टाबलं परमं रूपमितं परमदक्षिणगमने च चेष्टाबलं शून्यमतः सायनमिथुनान्ते परमोत्तरगमनाद् बलस्य परमत्वाच्चेष्टाकेन्द्रस्यापि परमत्वम् । सायनधनुरन्ते च परमदक्षिणगमनत्वाच्चेष्टाबलस्य शून्यत्वाच्चेष्टाकेन्द्रमपि शून्यं भवितुमर्हति तत्तु तत्र सायनरवौ राशित्रययोगेनैव भवति । ततश्च चेष्टाकेन्द्रप्रवृत्तिः । सायनमिथुनान्ते च चेष्टाकेन्द्रं षड्राशिसमं तदपि राशित्रययोगेनैव भवति । अत एवेष्टकालेऽपि त्रिभयुक्तसायनरविस्तच्चेष्टाकेन्द्रं समुचितमेव । इदं चेष्टाकेन्द्रं स्थूलम् । वस्तुतो दक्षिणोत्तरगमनस्य क्रान्त्यधीनत्वात् क्रान्त्यनुपातेनैव चेष्टाबलं सूक्ष्मं भवितुमर्हतीति सुधीभिर्विभाव्यम् । अथ चन्द्रस्य चेष्टाकेन्द्रन्तु चेष्टारश्मिपरमत्वे परमं, चेष्टारश्मिशून्ये शून्यं भवितुमर्हति । तच्चामावास्यान्ते चन्द्रार्कयोरन्तराभावे चेष्टारश्म्यभावात् चेष्टाकेन्द्रस्याप्यभावः । पौर्णमास्यन्ते च चेष्टारश्मिपरमत्वे चेष्टाकेन्द्रमपि

परमं षड्राशिसमं भवितुमर्हति तत्तु व्यर्केन्दुनैव भवत्यत इष्टकालेऽपि व्यर्केन्दुस्तच्चेष्टाकेन्द्रं समुचितमेव । अन्यत् सर्वं कुजादिचेष्टाकेन्द्रवत् सुगममेव । ततो भौमादिचेष्टाबलवदानीतं चन्द्रचेष्टाबलं पक्षबलतुल्यमेवातः षड्बलैक्यसाधनार्थं पूर्वमेव द्विगुणितं पक्षबलं गृहीतम् । रविचेष्टाबलं चायनबलतुल्यमतः पूर्वमेव द्विगुणितमायनबलं कृतमतः केवलचेष्टारश्मिकष्टेष्टसाधनार्थमेवात्र बले साधिते न वीर्य्यायेति सर्वमेव निरवद्यम् ॥ १२ ॥

भा०—चन्द्रमा में सूर्य्य को घटाने से चन्द्रमा का चेष्टाकेन्द्र और सायन सूर्य में ३ राशि जोड़ने से सूर्य का चेष्टाकेन्द्र होता है । इससे पूर्वोक्त भौमादि चेष्टाबल के समान (अर्थात् ६ राशि से अल्प हो तो उसी में, यदि ६ राशि से अधिक हो तो १२ में घटाकर शेष में ६ का भाग देकर) बल साधन करे, इस बल का चेष्टा रश्मि से कष्ट इष्ट साधन करने में उपयोग होता है । षड्बलैक्य में इसका उपयोग नहीं होता है ॥ १२ ॥

उ० दी—अथ चन्द्रः ७ । ०१ । ०४ । १५ अस्माद्रविं १० । १२ । ५७ । ३८ विशोध्य शेषं चन्द्रस्य चेष्टाकेन्द्रम् ८ । १८ । ०६ । ३७ सायनार्कः ११ । ०३ । २१ । ३१ त्रिभयुतः २ । ०३ । २१ । ३१ इदं रवेश्चेष्टाकेन्द्रम् । द्र० ४८ चक्रम् ।

अथ चन्द्रस्य चेष्टाकेन्द्रं षड्भाधिकमतः चक्राद्विशोध्यं शेषम् ३ । ११ । ५३ । २३ इदं षड्भक्तं जातं चन्द्रस्य चेष्टाबलम् ०० । ३३ । ५८ अत्रापि भजनविधिरुच्चबलानयनवद्बोध्यः । एवं रवेरपि । द्र० ४९ चक्रम् ॥ १२ ॥

ये चेष्टोच्चबले रसैर्विनिहते सैके निजा रश्मय-
श्चेष्टातुङ्गबलाहतेः पदमिहेष्टं स्याद्बलोनैकयोः ।
घातान्मूलमिदं हि कष्टमथ तद्रूपं दशायाः फलं
वीर्यं दृक् पृथगिष्टकष्टगुणिते द्वे चेष्टकष्टाह्वये ॥१३॥

व्या०—ये चेष्टोच्चबले पूर्वसाधिते रव्यादिग्रहाणां चेष्टाबलोच्चबले ते रसैः षड्भिर्विनिहते गुणिते निजाः स्वकीयाः रश्मयः किरणा भवन्ति (चेष्टाबलाच्चेष्टारश्मयः, उच्चबलादुच्चरश्मय इत्यर्थः) । अथेष्टकष्टसाधनम्—इह चेष्टातुङ्गबलाहतेश्चेष्टाबलोच्चबलघातात् पदं मूलं इष्टं स्यात् । तथा बलोनैकयोश्चेष्टाबलोन-

रूपतुङ्गबलोनरूपयोर्घातान्मूलं (यत्) इदं कष्टं स्यात् हि (पादपूरणे)। अथानन्तरं दशाफलं निरूपयति—तद्रूपं इष्टकष्टानुरूपं दशायाः फलं ज्ञेयम् (इष्टाधिक्ये शुभफलाधिक्यं कष्टाधिक्ये चाशुभफलाधिक्यं इष्टकष्टयोः साम्ये शुभाशुभफलयोरपि साम्यमित्यर्थः) वीर्यमिति ग्रहस्य वीर्यं षड्बलैक्यं, दृक् दृष्टिश्च द्वे पृथक् इष्टकष्टगुणिते ते इष्टकष्टाह्वये भवतः (इष्टगुणितं बलमिष्टबलं, कष्टगुणितं च कष्टबलं तथेष्टगुणिता दृष्टिरिष्टदृष्टिः कष्टगुणिता च कष्टदृष्टिरित्यर्थः) ॥ १३ ॥

अत्रोपपत्तिः—स्वकीयपरमोच्चस्थे ग्रहे परमाधिकाः सप्तमिताः, परमनीचस्थे परमाल्पो रूपमितो रश्मिः स्वीकृतः प्राचीनैः। तत्रोच्चसमे ग्रहे नीचग्रहान्तरं परमं षड्राशिमितं, नीचसमे ग्रहे नीचखगान्तरं शून्यमतो नीचग्रहान्तरादेव रश्मिसाधनं समुचितम्। अताऽनुपातो—यदि षड्राशितुल्येन नीचग्रहान्तरेण षण्मिता रश्मिवृधिस्तदेष्टनीचग्रहान्तरेण किमिति लब्धेष्टरश्मिवृद्धिः $= \frac{६ \times (\text{ग्र} \backsim \text{नी})}{६}$ $= ६ \times$ उच्चबल* अनया नीचस्थानीयरूपमितो रश्मिर्युतो जाता इष्टोच्चरश्मयः $= १ + ६ \times$ उच्चब०। एवं षड्मिते चेष्टाकेन्द्रे सप्त चेष्टारश्मयः शून्ये चैको चेष्टारश्मिः। अतः पूर्ववदनुपातेनेष्टचेष्टारश्मिवृद्धिः $= \frac{६ \times \text{चेकें}}{६} = ६ \times$ चेब † अत इष्टचेष्टारश्मयः $= १ + ६ \times$ चेब अत उपपन्नं रश्म्यानयनम्।

अथेष्टकष्टोपपत्तिः—उच्चस्थे ग्रहे शुभफलं पूर्णं रूपमितमशुभफलं च शून्यं तत्रोच्चबलमपि पूर्णं रूपमितम्। नीचस्थे ग्रहे चाशुभफलं पूर्णं शुभफलाभावस्तत्रोच्चबलमपि शून्यम्। एवं षण्मिते चेष्टाकेन्द्रे शुभफलं पूर्णमशुभफलाभावस्तत्र चेष्टाबलमपि पूर्णं रूपमितं, शून्ये चेष्टाकेन्द्रेऽशुभफलं पूर्णं शुभफलाभावस्तत्र चेष्टाबलमपि शून्यमेव। एतेन यथा यथा चेष्टोच्चबलवृद्धिस्तथा तथा शुभफलवृद्धिरशुभफलह्रास इति ज्ञानदृग्भिः परीक्षितमतश्चेष्टोच्चबलयोगत एव शुभाशुभरूपयोरिष्टकष्टयोः साधनं समुचितमतोऽ-

* यतो नीचग्रहान्तरं षड्भक्तमुच्चबलं भवति द्रष्टव्यः श्लो० ५।

† षड्भक्तं चेष्टाकेन्द्रं चेष्टाबलं भवति द्रष्टव्यः श्लो० १०।

नुपातो यदि परमोच्चचेष्टाबलयोर्योगेन रूपद्वयेन शुभफलं पूर्णं रूपमितं लभ्यते तदेष्टचेष्टोच्चबलयोगेन किमितीष्टशुभम्= इष्टम्= $\frac{१ \times (\text{चे ब} + \text{उ ब})}{२}$। तथेष्टशुभफलोनं रूपं कष्टम्= $१ - \frac{\text{चेब} + \text{उब}}{२} = \frac{१ - \text{चेब} + १ - \text{उब}}{२}$। अत्राचार्येण बलयोगार्धबलोनैकयोगार्धस्थाने तद्घातमूलं स्वल्पान्तरात् स्वीकृतं तद्यथा यदि चेब= उब तदा पूर्वानीतमिष्टम्= $\frac{\text{चेब} + \text{उब}}{२} = \frac{(\text{चेब} + \text{उब})\sqrt{\text{चेब} \times \text{उब}}}{२ \times \sqrt{\text{चेब} \times \text{उब}}}$

$$= \frac{२\ \text{चेब} \sqrt{\text{चेब} \times \text{उब}}}{२\sqrt{\text{चेब}^२}} = \sqrt{\text{चेब} \times \text{उब}}$$

वस्तुतो बलयोगार्धमेवेष्टम्, बलोनैकयोगार्धमेव कष्टं समुचितम्। अत एव दैवज्ञदिवाकरेण प्रौढमनोरमायां 'अथवा बलयोगार्धमिष्टं तदूनं रूपं कष्टमिति निष्पन्नम्। मूलरूपेष्टकष्टन्तु पराशरादिमुनिमतविरुद्धत्वादयुक्तत्वाच्चुपेक्ष्यमेवेति बोद्धव्यम्" इत्युक्तम्। किञ्च तदबहुसम्मतत्वान्नाङ्गीकुर्वते साम्प्रतिका इति।

तथा ग्रहस्य शुभफलं शुभबलशुभदृष्टिवशादेवं चाशुभबलाशुभदृष्टिवशादशुभफलं भवितुमर्हत्यत एवेष्टकष्टाभ्यां पृथग् दृग्बले गुणिते तदाह्वये कृते इत्यपि समुचितमेवेत्युपपन्नं सर्वम् ॥१३॥

भा०—पूर्व साधित चेष्टाबल को ६ से गुना करके १ एक जोड़ने से चेष्टारश्मि, तथा उच्चबल को ६ से गुना करके १ जोडने से उच्चरश्मि होता है। चेष्टाबल को उच्चबल से गुना कर उसका मूल इष्ट होता है। तथा चेष्टाबल को एक १ में घटावे और उच्चबल को १ में घटाकर दोनों का घात करके गुणनफल का मूल कष्ट होता है। और इष्ट कष्ट के अनुरूप ही ग्रहों का दशाफल होता है (अर्थात् इष्ट अधिक हो तो शुभ फल की अधिकता और कष्ट अधिक हो तो अशुभ फल की अधिकता यदि इष्ट कष्ट तुल्य हो तो शुभाशुभ भी तुल्य ही होता है) ग्रहों के षड्बलैक्य को इष्ट से गुना करने से इष्टबल और कष्ट से गुना करने से कष्टबल होता है। और इष्ट से दृष्टि को गुना करने से इष्ट दृष्टि तथा कष्ट से गुना करने से कष्ट दृष्टि होती है ॥ १३ ॥

उ-दी—रवेश्चेष्टाबलम् ००।२१।०७ इदं षड्भिर्गुणितम् २।०६।४२ सैकम् ३।०६।४२। अत्र चेष्टोच्चबलानयने त्यक्तान्तिमावयवं गृहीत्वा यदि षड्भिर्गुण्यते तदात्रान्तिमावयवो रूपाधिको भवत्यतो

रवेश्चेष्टारस्मयः—३।०६।४३ एवं सर्वेषां चेष्टोच्चबलानि त्यक्तान्तिमावयवसहितान्येव षड्भिर्गुणयानीति दिक्। द्र० ५० चक्रम्। एवं रवेरुच्चबले षड्भिर्गुणिते सैके चोच्चरश्मयो जाताः ५।५।५५ एवं सर्वेषाम्। द्र० ५१ चक्रम्।

अथ ५२।५३ चक्रस्थफलानयनं तच्चक्राधःस्थितगद्यावलोकनेनैव स्पष्टं भवति।

अथ रवेरुच्चबलम् ००।४०।५६ चेष्टाबलम् ००।२१।०७ अनयोर्गोमूत्रिकया घातः ००। १४ । २५ गोमूत्रिकागुणनविधिः ५४ चक्राधो गद्ये द्रष्टव्यः। एवमन्येषामपि चेष्टोच्चबलघातः कार्य्यः। द्र० ५४ चक्रम्। रवेश्चेष्टोच्चबलोनैकघातो यथा—(१—(००।२१।०७))×(१—(००।४०।५६))=(००।३८।५३)×(००।१६।१)= ००।१२।१६ अत्रापि गुणनविधिर्गोमूत्रिकयैव कार्यः। एवमन्येषामपि। द्र० ५५ चक्रम्।

अथेष्टसाधनम्—तत्र रवेश्चेष्टोच्चबलघातस्या ०० । १४। २५स्य मूलं "षष्टिवर्गगुणादङ्का"दित्यादिना (००।१४।२५) × ३६००=००।५०४००।६०००० षष्ट्या सवर्णिते=८६५।००।०० एतन्मूलम् २६ शेषम् २४ सैकम् २५ षष्टिगुणम् १५०० इदं द्विनिघ्नेन द्वियुक्तेन मूलेना २६×२+२ =६० नेन भक्तम् २५ प्रथमागतमूले विकलास्थाने युक्तमस्याग्रिमावयवरूपमतो २६।२५ इदं षष्टिभक्तं जातं मूलम् ००।२६।२५ इदमेव रवेरिष्टम्। एवं चन्द्रादीनामपि। द्र० ५६ चक्रम्। एवं चेष्टोच्चबलोनैकघातमूलं कष्टं भवति। द्र० ५७ चक्रम्। अथ रवेरिष्टम् ००।२६।२५ रवेः षड्बलैक्यम् ५।४६। २५ गोमूत्रिकयानयोर्घात इष्टघ्नषड्बलैक्यं जातम् २।४६।५० एवं कष्टघ्नषड्बलैक्यमपि। द्र० ५८ - ५६ चक्रे। एवमिष्टकष्टाभ्यां ग्रहाणां भावानां च दृष्ट्यः पृथक् गुणिताः स्वस्वेष्टकष्टघ्नदृष्ट्यो भवन्ति (द्र० ६०—६१-६२-६३ चक्राणि)॥१३॥

अथ सप्तवर्गशुभाशुभनिर्णयार्थं सप्तवर्गेष्टकष्टसाधनमाह—

स्वोच्चे रूपं त्रिकोणे चरणविरहितं स्वर्क्षगेऽधं त्रयोष्टांशाश्चाधीष्टर्क्षं इष्टर्क्षयुजि च चरणः स्यात्समर्क्षेऽष्टमांशः
भूपांशो वैरिगेहेऽध्यरिभयुजि रदांशश्च नीचे खमीशादिष्टं गेहे तदूनैकमसदथ दलं षट्सु कार्यं तदैक्ये॥१४॥

पंक्त्योः सप्तसुकोष्ठयोः प्रथमयोरिष्टासदैक्ये कृताप्ते
स्थाप्ये भदलादिषट्सु च तदर्धे वर्गपानां पृथक्।
कृत्वोक्त्या सदसद्युती निजनिजे तन्निघ्न इष्टाशुभे*
वर्गेट्तत्स्थखगौजसोः सदसतोर्घातात्पदघ्ने स्फुटे ॥१५॥

व्या०—स्वोच्चे† स्वकीयोच्चराशौ ग्रहे रूपं (१) बलं, त्रिकोणे स्वमूलत्रिकोणे चरणविरहितं पादोनं रूपं, स्वर्क्षगे स्वराशिस्थेऽर्धं रूपार्धं, अधीष्टर्क्षेऽधिमित्रगृहे त्रयोष्टांशास्त्रिगुणिताष्टमांशः, इष्टर्क्षयुजि मित्रराशिस्थे च चरणश्चतुर्थांशो बलं, समर्क्षे समराशौ चाष्टमांशः, वैरिगेहे शत्रुराशौ भूपांशो रूपषोडशांशः, अध्यरिभयुजि अधिशत्रुराशिगते रदांशो रूपद्वात्रिंशद्भागः, नीचे स्वनीचराशौ खं शून्यं बलं भवति। ईशाद् गृहेशवशादिष्टं शुभं गेहे गृहे स्यात् तदूनैकमिष्टोनं रूपं गृहेऽसत् कष्टं स्यात्। अथानन्तरं षट्सु होरादिषड्वर्गेषु दलं गृहवदागतशुभाशुभयोरर्धं स्थाप्यम्। तदैक्ये कार्यं, सप्तस्थानस्थितानां चैक्यं कार्यमित्यर्थः। पंक्त्योरिति–सप्तसुकोष्ठयोः (सप्तगृहहोरादिकाः सुकोष्ठा विद्यन्ते ययोस्ते सप्तसुकोष्ठे तयोः) पंक्त्योः शुभाशुभपंक्त्योः प्रथमयोर्गृहस्थानीयकोष्ठयोरिष्टासदैक्ये शुभाशुभैक्ये कृताप्ते चतुर्भक्ते स्थाप्ये (इष्टैक्यं चतुर्भक्तं शुभपंक्तिगृहकोष्ठे, कष्टैक्यं चतुर्भक्तमशुभपंक्तिगृहकोष्ठे स्थाप्यमित्यर्थः)। भदलादिषु होरादिषु षड्वर्गेषु च तदर्धे गृहस्थापितशुभाशुभयोरर्धे दले स्थाप्ये। वर्गपानां गृहादिसप्तवर्गेशानां, पृथक्-पृथक् उक्त्या पूर्वोक्तयुक्त्या सदसद्युती शुभाशुभयोगौ कृत्वा तन्निघ्ने तद्गुणिते निजनिजे इष्टाशुभे कार्ये ते मध्यमे शुभाशुभे ज्ञेये। ते च वर्गेट्तत्स्थखगौजसोः सदसतोर्घाता-

* अत्र "ईदूदेद्विवचनं प्रगृह्यम्" इति नियमात् 'तन्निघ्ने इष्टाशुभे' इत्येव पाठो भवितुमर्हति तथा च च्छन्दोभङ्गदोषत्वात् "तन्निघ्न इष्टाशुभे" इत्येव पाठ आचार्येण रचितः "अपि माषं मषं कुर्याच्छन्दोभंगं न कारयेदित्युक्तेः। किञ्चात्र "तद्घ्ने तथेष्टाशुभे" एवं पाठो निर्विवाद इति।

† "वर्गेशे स्वोचादिगामिनि रूपादिकं बलं ग्राह्यम्" एवं केषाञ्चिद् व्याख्यानं सम्प्रदायानुरोधान्नाङ्गी कुर्वते मैथिलादिका इति। तथा च यत्र स्वोच्चं स्वनीचं स्वमूलत्रिकोणं भवेत् तत्र स्वोचादिजबलमेव ग्राह्यं, न मित्रादिजम्। विशेषार्थमुदाहरणं विलोक्यम्।

त्पदघ्ने वर्गेशवर्गस्थग्रहशुभाशुभबलैक्यघातमूलगुणिते स्फुटे स्पष्टे शुभाशुभे भवतः ॥ १४—१५ ॥

अत्रोपपत्तिः—नीचे खमित्यन्तस्य युक्तिः पूर्वमेव पञ्चमश्लोकोपपत्तौ प्रदर्शिता । अथेशादिष्टमित्यादेरुपपत्तिः—शुभाशुभफलयोर्योगस्य रूप (१) समत्वात् स्वामिवशाद् यद् गृहे शुभं तदूनं रूपं गृहेऽशुभं भवितुमर्हत्येव । तथा च "प्रधानता राशिफलस्य नूनं होरादिवर्गाद् द्विगुणं गृहं यत्" इति प्राचीनोक्त्या होराद्यपेक्षया गृहस्य द्विगुणत्वाद् गृहस्थापितस्य फलस्य दलं होरादिषु स्थापनीयमित्यपि समुचितमेवेत्युपपन्नं "दलं षट्सु" इत्यन्तम् । तथा चाग्रे वर्गेशशुभाशुभयोगेन गुणनीयमस्त्यतः "कार्यं तदैक्ये" इति योगकरणमपि साध्वेव ।

अथ तद्गृहादिफलैक्यं चतुर्गुणितगृहफलसमं यतो गृहफलार्धं षड्गुणितं गृहफ $\frac{६}{२}$ = गृहफ ३ होरादिषु षड्वर्गेषु वर्तते तद् गृहफलसहितं पूर्वोक्तैक्यम् = ऐक्यम् = गृहफ × ४ ∴ $\frac{\text{ऐक्यं}}{४}$ = गृहफ । अत एव शुभाशुभपंक्त्योः प्रथमयोरिष्टासदैक्ये कृताते स्थाप्ये" इत्युक्तम् । होरादिषु त्वर्धं पूर्वोक्तियुक्त्यैवात्रापि समुचितम् । तथा च भावपतौ बलयुक्ते भावस्थग्रहफलं सकलं भवितुमर्हत्यत एव वर्गपस्य सदसदैक्याभ्यां निजनिजे इष्टाशुभे गुणिते ते मध्यमशुभाशुभत्वेन गृहीते । एवं वर्गेशवर्गस्थशुभाशुभबलवशादेव तत्फलस्य स्फुटता स्यादतोऽनुपातो—यदि वर्गस्थवर्गेशग्रहयोः परमशुभाशुभबलयोगेन रूपद्वयेन (२) सम्पूर्णं फलं रूपमितं (१) लभ्यते तदेष्टवर्गस्थवर्गेशयोः शुभाशुभबलयोगेन किमितीष्टबलयोगानुपातेन शुफ=

$$१ \times \frac{(\text{वस्थशुब} + \text{वर्गेशशुब})}{२} = \sqrt{\text{वर्गस्थशुब} \times \text{वर्गेशशुब}} \text{।}$$ एवमशुभबलयोगानुपातेन $\text{अशुभफ} = \frac{१ \times (\text{वर्गस्थअशुब} + \text{वर्गेशअशुब})}{२}$

$$= \sqrt{\text{वर्गस्थअशुब} \times \text{वर्गेशअशुब}}$$ इति पूर्वदर्शितयुक्त्या सिद्ध्यति। अतः आभ्यां गुणिते पूर्वोक्तशुभाशुभे स्फुटे भवितुमर्हतः । अत्र "समयोः समगुणनादौ समत्वं, विषमयोः समगुणनादौ विषमत्वमेवे" ति नियमात् इष्टाधिक्ये घातमूलगुणनेऽप्याधिक्यमेव; कष्टाधिक्ये घातमूलगुणनेऽपि तदाधिक्यमेवेत्यलं विस्तरेण ॥ १४-१५ ॥

भा०—ग्रह अपनी उच्चराशिमें हो तो रूप (१) स्वमूलत्रिकोण में तीन चरण (०।४५), स्वराशि में आधा (दो चरण ०।३०) अधिमित्र की राशि में त्रिगुणित अष्टमांश (०।२२।३०), मित्र की राशि में षोडशांश (०।३।४५), अधिशत्रु की राशि में बत्तीसवाँ भाग (०।१।५२) और नीच राशि में शून्य बल होता है। इस प्रकार वर्गेश के वश से जो बल आवे वह गृहस्थान का शुभ बल होता है। उसको एक में घटाकर गृहस्थान का अशुभ बल होता है। एवं होरादि षड्वर्ग में गृहवत् जो बल आवे उसका आधा स्थापन करे। फिर उन सबों (सप्तवर्गस्थबलों) का योग करे ॥१४॥ अनन्तर सात सात कोष्ठक के शुभ, अशुभ दो पंक्ति लिखकर शुभ पंक्ति के प्रथम (गृहकोष्ठक) में उपरोक्त शुभैक्य का चतुर्थांश और अशुभ पंक्ति के प्रथम (गृहकोष्टक) में अशुभैक्य का चतुर्थांश स्थापन करे। होरादिक षड्वर्ग में गृहस्थापित फल का आधा लिखे। फिर वर्गेशों के पृथक् २ शुभाशुभ के योग करके उससे पृथक् इष्ट कष्ट को गुना करे तो मध्यम शुभाशुभ होता है। फिर वर्गेश तथा वर्गस्थ दोनों ग्रहों को शुभाशुभ के घात के मूल से गुना करने से स्पष्ट शुभाशुभ होता है ॥ १५ ॥

विशेष–जो राशि स्वोच्च और मूल त्रिकोण तथा स्वगृह तीनों होता हो यथा कन्या बुध का, अथवा स्वगृह और मूल त्रिकोण दो होता हो वहाँ किस प्रकार बल लेना चाहिये, इस विषय में उदाहरण चक्र में २४ चक्र के नीचे सारावली के वचन देखो।

उ० दी—रविरधिशत्रुगृहेऽतो रूपस्य द्वात्रिंशद्भागो गृहशुभम् ००।०१।५२। अथ होरादिषड्वर्गेषु गृहवच्छुभमानीय तदर्धं स्वस्व शुभं स्यात्। यथा—रविः स्वहोरायां तेन गृहवत् शुभम् ००।३०।०० एतदर्धं होराशुभम् ००।१५।०० एवं रविः शत्रुद्रेष्काणे तेन गृहवत्षोडशांशशुभम् ००।०३।४५ एतदर्धं द्रेष्काणशुभम् ००।०१।५२ एवं रविः समसप्तमांशे तेन गृहवदष्टमांशशुभम् ००।०७।३० एतदर्धं सप्तमांशशुभम् ००।०३।४५ एवं रविरधिशत्रुनवमांशे तेन गृहवद्द्वादशशुभम् ००।१।५२ एतदर्धं नवमांशशुभम् ००।००।५६ एवं रविरधिमित्रद्वादशांशे तेन गृहवत् शुभं त्रिगुणितोष्टांशः ००।२२।३० अस्यार्धं द्वादशांशशुभम् ००।११।१५ एवं रविरधिमित्रत्रिंशांशेऽतः गृहवच्छुभं तथैव त्रिगुणितोष्टमांशः ०० । २२।३० एतदर्धं त्रिंशांशशुभम् ०० । ११ । १५ । अथ सर्वशुभयोगः ०० । ४५ । ५५ एवं चन्द्रादीनामपि (द्र० ६४ चक्रम्) अथ स्वस्वगृहवत् शुभोनरूपमशुभं स्यात् । परमत्र होरादिषड्वर्गेषु तद्दलमेवाशुभं भवति । द्र० ६५ चक्रम् ।

अथ रवेर्गृहादिशुभानां योगः ००।४५।५५ अस्य चतुर्थांशो रवेर्गृ-

हशुभपंक्तिः ००।११।२६ अस्यार्धं होरादिकोष्ठेषु ज्ञेयम्। एवं चन्द्रादीनामपि (द्र० ६६ चक्रम्) एवमेवाशुभपंक्तयोपि ज्ञेयाः (द्र० ६७ चक्रम्)।

अथ रविः शनिगृहेऽतः शनेः शुभयोगेना ००।३७।२६ नेन रवेर्गृहशुभपंक्ति ००।११।२६ गोमूत्रिकया गुणिता जाता ००।०७।१० इदं वर्गेशशुभयुतिगुणितशुभपंक्तिचक्रे रवेर्गृहफलम्। एवं रविः स्वहोरायां वर्त्तते तेन स्वस्यैव शुभयोगेना ००।४५।५५ नेन स्वहोराशुभपंक्तिः ००।०५।४४ गुणिता जाता ००।०४।२३ इदं रवेर्होरेशशुभयुतिगुणितशुभहोरापंक्तिफलम्। एवं द्रेष्काणादयोपि तथैव चन्द्रादीनामपि (द्र० ६८ चक्रम्)।

एवं वर्गेशाशुभयोगेनाशुभपंक्तिरपि सङ्गुण्या। द्र० ६९ चक्रम् अथ गृहेशतत्स्थग्रहयोः शनिसूर्य्ययोरिष्टघ्नषड्बलैक्ययो ०४।०२।२२॥ २।४६।५० रनयोर्घातः ११।१६।०२ एवं होरादावपि तथा चन्द्रादीनामपि। द्र० ७० चक्रम्। एवं वर्गेशतत्स्थग्रहयोः कष्टघ्नषड्बलैक्ययोर्घातोपि ज्ञेयः (द्र० ७१ चक्रम्)।

अथ ७०-७१ चक्रस्थफलानां मूलानि ग्राह्यानि। अत्र मूलानयनप्रकारः पूर्वोक्त एव बोध्यः (द्रष्टव्ये ७२-७३ चक्रे)।

अथ रवेर्वर्गेशशुभयोगगुणितमिष्टम् (शुभपंक्तिः) ००।०७।१० इद वर्गेशतत्स्थग्रहयो (शनिसूर्य्ययोः) रिष्टघ्नषड्बलैक्ययोर्घातमूलेनानेन ३।२२।५३ गुणितं जातं रवेर्गृहे स्पष्टशुभम् ००।२४।१४। एवं होरादीनां तथा चन्द्रादीनामपि ज्ञेयम् (द्र० ७४ चक्रम्)।

एवं स्वस्ववर्गेशाशुभयुतिगुणितशुभपंक्तेः वर्गेशतत्स्थग्रहयोः कष्टघ्नषड्बलैक्ययोर्घातमूलस्य च घातः स्फुटाशुभं भवति (द्र० ७५ चक्रम्)॥१४-१५॥

अथ योगजायुर्दायस्यामितायुर्दायस्योदाहरणप्रदर्शनपूर्वकमंशायुस्साधनार्थं चेष्टागुणकादिकमाह –

कर्कीन्द्विज्ययुतोदये बुधसितौ केन्द्रे त्र्यरीशेतरै-
रायुर्विद्धयमितं हि योगजमिहान्यत्रोच्यतेऽथोन्मितम्।
त्र्यल्पाश्चेत् किरणाः सरूपकिरणाङ्घ्रिश्चेत्त्रयोर्ध्वा विभू-
गोऽर्धं चैष्टिकतुङ्गसम्भवगुणौ तद्घातमूलं स्फुटः॥१६॥

व्या०—कर्कीन्द्विज्ययुतोदये चन्द्रगुरुसहिते कर्कलग्ने, बुधसितौ बुधशुक्रौ केन्द्रे स्थितौ यदि भवतस्तथा त्र्यरीशेतरैस्तृतीयषष्ठैकादशेष्वितरैः सूर्यकुजशनैश्चरैरिहास्मिन् योगेऽमितमायुर्विद्धि जानीहि। अन्यत्र ग्रन्थान्तरे योगजमायुर्विद्धि। अथात्रास्मिन् ग्रन्थे उन्मितं गणितागतमायुरुच्यते। अथ चेष्टोच्चगुणकावाह—त्र्यल्पा इति। चेद् यदि किरणाः पूर्वोक्तचेष्टोच्चरश्मयस्त्र्यल्पास्त्र्यूनास्तदा सरूपकिरणांघ्रिः। चेत्त्रयोर्ध्वास्त्र्यधिकास्तदा विभूगोऽर्धं रूपोनकिरणार्धं चैष्टिकतुंगसम्भवगुणौ भवतः। (चेष्टारश्मितश्चेष्टागुणकः उच्चरश्मित उच्चगुणक इति)। तद्घातमूलं तयोश्चेष्टोच्चगुणकयोर्घातमूलं स्फुटः स्फुटगुणको भवतीति ॥१६॥

अत्रोपपत्तिः—अमितायुःप्रमाणे वृद्धवाक्यमेव प्रमाणम्। चेष्टोच्चगुणकोपपत्तिः—"शत्रुक्षेत्रे त्र्यंशं नीचेऽर्धं सूर्यलुप्तकिरणाश्च। क्षपयन्ति स्वाद्दायाद्वास्तं यातौ रविजशुक्रौ"॥ तथा "वक्रोच्चयोस्त्रिगुणितं" इति लघुजातकोक्त्या त्र्यंशायुषि परमोच्चे त्रितयं गुणः परमनीचेऽर्धहानिः। तथा परमोच्चे सप्तकिरणा नीचे रूपमितो रश्मिः। नीचादग्रे यत्रैकरश्मितुल्योपचयस्तत्र हान्यभावो यत्र रश्मिद्वयतुल्योपचयस्तत्रार्धं गुणोपचयोत एवानुपातो—यदि रश्मिद्वये रूपार्धं गुणस्तदा रूपोनकिरणैः क इति $\frac{1}{2} \times \frac{(कि-1)}{2} = \frac{(कि-1)}{4}$ एतेन रूपार्धमितगुणो युत इष्टगुणः $= \frac{(कि-1)}{4} + \frac{1}{2} = \frac{(कि+1)}{4}$ इति रश्मित्रयाल्पे। रश्मित्रयाधिकेत्वन्योऽनुपातो — यदि रश्मित्रयाधिकैश्चतुर्मितैर्द्विमितौ गुणस्तदेष्टैः किरणत्रयोनकिरणैः क इति $2 \times \frac{(कि-3)}{4} = \frac{(कि-3)}{2}$ अनेन फलेनैकमितो गुणो युतो जात इष्टगुणः $= 1 + \frac{कि-3}{2} = \frac{कि-1}{2}$। एवं परमवक्रस्थानेऽपि ज्ञेयम्। घातमूलस्य स्फुटता पूर्वोक्त्या स्पष्टेति ॥१६॥

भा०—जन्म समय में चन्द्रगुरुयुत कर्क लग्न हो तथा बुध शुक्र केन्द्र (१।४।७।१०) स्थान में हो इतर ग्रह (सूर्य मंगल शनि) तृतीय षष्ठ एकादश (३।६।११) स्थान में हो तो अमित आयु समझना। और योग सम्बन्धि आयु ग्रन्थान्तर से समझना। इस ग्रन्थ में केवल गणितागत आयुर्दाय कहता हूँ।

चेष्टा उच्च गुणक साधन—पूर्वसाधित रश्मि ३ तीन से अल्प हो तो रश्मि में १ एक जोड़कर उसका चतुर्थांश करना, यदि ३ से अधिक हो तो रश्मि में १ घटाकर उसका आधा करना तो गुणक (अर्थात् चेष्टारश्मि पर से चेष्टा गुणक और उच्च रश्मि से उच्च गुणक) होता है। फिर दोनों गुणक का घात करके मूल लेना वह स्फुट गुणक होता है ॥ १६ ॥ विशेष उदाहरण चक्र में देखो ।

उ०दी—रवेश्चेष्टारश्मयः ३।०६।४३ त्र्यधिकत्वाद्विरूपाः २।०६।४३ एतदर्धम् १।०३।२१ अयं रवेश्चेष्टागुणकः। अथ भौमस्य चेष्टारश्मयो २।४३।२१ त्र्यल्पास्तेन रूपयुताः ३।४३।२१ एतच्चतुर्थांशः ०।५५।५० अयं भौमस्य चेष्टागुणकः। एवमुच्चरश्मित उच्चगुणकः साध्यः (द्र० ७६। ७७ चक्रे) अथ उच्चगुणकचेष्टागुणकयोर्घातमूलं स्फुटगुणक इति पुर्वप्रकारेणैव सुगमः। द्र० ७८ चक्रम् ॥१६॥ *

---

* अथात्र प्रसङ्गाद् ग्रहाणां सप्तवर्गजगुणकचक्रं श्रीपतिप्रकारेण लिखितमुदाहरणकर्ता तदानयनप्रकारस्तु—

"वर्गोत्तमे स्वभवने स्वनवांशके च स्वत्र्यंशके च गुणको द्वितयं निरुक्तः।
अध्यर्धरूपमधिमित्रगृहे सुहृद्भे रुत्र्यंशकं समगृहे खलु रूपमेव ॥१॥
त्र्यंशोनितं रिपुगृहेऽध्यरिभे दलं स्यादेभ्यो गुणो भवति यः खलु कश्चिदेकः।
वेदोद्धृत्तः स भगुणो गणकैर्निरुक्तो होरादिवर्गगुणकस्तु भवेत्तदर्धम् ॥२॥"

अथ रविरधिशत्रुगृहे तेन दलम् $\frac{1}{2}$ वेदोद्धृतम् $\frac{1}{8}$ अयं रविगृहे गुणकः। अथ गृहगुणकस्या $\frac{1}{8}$ स्य दलम् $\frac{1}{16}$ अयं हेरादिवर्गगुणकः स्यादिति। अथात्रान्योपि विशेषः—

"नगांशका रुद्रमिता अधीष्टराशौ सुहृद्वेश्मनि मूर्द्धनांशाः।
नवाश्विनो रूपमुदासराशौ कुद्वयंशका विश्वभिता द्विपद्भे ॥१॥
त्रयो नगांशा ह्यधिशत्रुरशावेते भसंज्ञा निजराशिवर्जम्।
वर्गोत्तमात्मीयनवांशद्दक्कस्थिते ग्रहें तु द्वितयं गुणःस्यात्" ॥२॥

अथ चन्द्रस्य स्वनवांशके स्थितत्वात् रूपद्वयं चतुर्भक्तम् $\frac{2}{4} = \frac{1}{2}$ गृहगुणः। परं गृहगुणः भसंज्ञगुणेना $\frac{1}{2}\frac{3}{1}$ नेन गुणितः $\frac{1}{4}\frac{3}{2}$ अयं चन्द्रगृहे गुणकः। परमत्र गृहगुणस्या $\frac{1}{2}$ स्य दलम् $\frac{1}{4}$ अयं होरादीनं गुणकः। नात्र भसंज्ञगुणितं कार्यम्। एवं कुजादीनां साध्यः (द्र० ७९ चक्रम्)

अथ ग्रहाणां अष्टवर्गजानन्तरताडकचक्रानयनार्थं तु—

"गृहादिके वर्गगणे स्वकीये द्विको गुणस्त्र्यंशविवर्जितः सः।
अधीष्टभे मित्रगृहे नवांशा विश्वे च रूपं च समस्य गोहे ॥१॥

अथाश्रयगुणकमाह—

यः स्वाधीष्टसुहृत्समार्यधिरिपोर्वर्गे धृतिश्चेष्विला-
विश्वाङ्केषुगुणा गृहे द्विगुणिता योगः क्रमात्तं हरेत् ।
तद्भे षड्वसुगोऽशुमद्धृतिजिनैः षड्घ्नैश्च वर्गोत्तम-
स्वांशत्र्यंशगते सदा रसगुणैः स्यादाश्रयाख्यो गुणः ॥१७॥

व्या०—यो ग्रहः स्वाधीष्टसुहृत्समार्यधिरिपोर्वर्गे गृहादिसप्तवर्गे-स्थितस्तस्य क्रमात् धृतिः, इष्विलाविश्वांकेषुगुणाः (अर्थात् स्वगृहे धृतिः १८, अधीष्टभे इष्विलाः १५ मित्रभे विश्वे १३, समभे अङ्काः ९, अरिभे इषवः ५, अधिशत्रुभे गुणाः ३) अङ्काः (गृहादिसप्तवर्गेषु) स्थाप्याः । तत्र गृहे गृहवर्गे द्विगुणिताः स्थाप्या होरादौ यथा पठितांका एवेति । यथा स्वगृहे षट्त्रिंशत्, स्वहोरादावष्टादशै (१८) व । एवं अधिमित्रगृहे त्रिंशत् (३०) अधिमित्रहोरादौ पञ्चदशै (१५) वे-इत्यादि ज्ञेयम्) एवं सप्तवर्गस्थापिताङ्कानां योगः कार्यस्तं योगं तद्भे तेषां स्वाधीष्टसुहृत्समादीनां भे गृहे ग्रहे सति क्रमात् षड्वसुगोऽ-शुमद्धृतिजिनैः षड्घ्नैः षड्गुणितैर्हरेत् (अर्थात् स्वगृहे षड्गुणित-

---

नवांशकाः पञ्च विरोधिराशौ गुणांशकाः स्यादधिवैरिणो भे ।
पूर्वं भपूर्वा गुणका य उक्ता वर्गेषु सप्तस्विह गुण्यसंज्ञाः ॥२॥
गुण्या गुणैः स्वैरधिकारलब्धैरुक्तैर्गुणः स्यादथ मिश्रितैस्तैः ।
स्मृतो बुधैराश्रयसंज्ञितोय" मिति ॥

अथ रविरधिशत्रुगृऽहेतः गुणांशकाः १/३ अयं रविगृहे गुणः । स्वहोरयां द्वयम् २ । शत्रुदेष्काणे नवांशकाः पञ्च ५/९ । समसप्तमांशे रूपम् १ । अधिशत्रुनवमांशे गुणांशका १/३ । अधीष्टद्वादशांशे तथाधीष्टत्रिंशांशे च त्र्यंशविवर्जितद्वयम् ५/३ । एवं चन्द्रादीनामपि ज्ञेयम् (द्र० ८० चक्रम्) ।

अथात्र च रवेर्गृहगगुणकः १/८ अयमनन्तरताडकगृहगुण्येना १/३ नेनांशाहतिश्छेदवधेन भक्तेत्यादिना गुणितः १/२४ अयं रविगृहे आश्रयगुणकः । एवं होरादयोपि तथा चन्द्रादीनामपि च । द्र० ८१ चक्रम् ॥

अथ रवेर्गृहाश्रयगुणकः १/२४ अत्रे १ दमनेन २४ भक्तं लब्धम् ०० शेषं १ षष्ट्या संगुण्याने २४ न भक्तां लब्धम् २ पुनः शेषम् १२ षष्ट्या संगुण्य ७२० चतुर्विंशत्या भक्तं लब्धम् ३० अतः क्रमाल्लब्धन्यासेन ०। २। ३० एवं होरादयाश्चन्द्रादयोपि षष्टिभक्ता-वयवाश्रयगुणकः (द्र० ८२ चक्रम्) ।

षड्भिः ३६, अधिमित्रगृहे षड्घ्नवसुभिः ४८, मित्रगृहे षड्गुणितनवभिः ५४, समराशौ षड्गुणितद्वादशभिः ७२, शत्रुभे षड्घ्नधृतिभिः १०८, अधिशत्रुभे षड्गुणितजिनैः १४४ भजेदिति)। च (तथा) वर्गोत्तमस्वांशत्र्यंशगते ग्रहे सति सदा रसगुणैः षट्त्रिंशता तं योगं भजेत् लब्धिराश्रयाख्यो गुणः स्यात् ॥१७॥

अत्रोपपत्तिः- अत्र गृहादिसप्तवर्गेषु होरादयः षड्वर्गास्तुल्यभागा एव। तथा "होरादिवर्गाद् द्विगुणं गृहं यत्" इति यवनवचनेन राशेर्द्विगुणत्वादष्टौ वर्गास्तेनाष्टभक्तो गुणो होरादिवर्गेषु भवितुमर्हति। तथा गृहस्थाने द्विगुणिताष्टमांशः $\frac{१ \times २}{८} = \frac{१}{४}$ स्थाप्यः। अथ- "वर्गोत्तमे स्वभवने स्वनवांशके च स्वत्र्यंशके च गुणको द्वितयं निरुक्तः" * इत्यादिश्रीपतिवचनेन स्वभवने गुणः २ पूर्वोक्त्याऽष्टभक्तः $= \frac{१}{४}$ तथायं "गृहादिके वर्गगणे स्वकीये द्विको गुणः...... + इत्याद्युक्त्या द्विगुणितः $\frac{१}{२} = \frac{१८}{३६}$ = स्वहोरादौ गुणः। तथा" "वर्गोत्तमे स्वभवने" इत्यादिनाऽधिमित्रगृहे गुणः $\frac{३}{२}$ अष्टभक्तः $\frac{३}{१६}$ अयं "गृहादिके वर्गगणे स्वकीये" इत्यादिनाऽधिमित्रगुणकेन $\frac{५}{३}$ अनेन गुणितः $\frac{१५}{४८}$ = अधिमित्रहोरादिगुणकः। एवं मित्रगृहे गुणः १ अष्टभक्तः $\frac{१}{८}$ "गृहादिके वर्गगणे" इत्यादिना मित्रगृहगुणकेन $\frac{१३}{९}$ अनेन गुणितः $\frac{१}{८} \times \frac{१३}{९}$ $= \frac{१३}{७२}$ = मित्रहोरादौ गुणः। एवं सप्तवर्गगुणांका हराश्चोत्पद्यन्ते राशिस्थाने यवनवाक्यबलाद्द्विगुणः कार्य्य एवेति। अथ वर्गोत्तमस्वांशस्वत्र्यंशगते ग्रहे पूर्वोक्त्या गुणः २ चतुर्भक्तः $\frac{१}{२}$। अतोऽनुपातो यदि तत्तद्गृहगुणेन तत्तद्होरादिगुणो लभ्यते तदानेन ($\frac{१}{२}$) किमिति गुणास्तावन्तः (पाठपठिताः) एव हरस्थाने षट्त्रिंशत् ३६ अंका भवन्त्यतः "सदा रसगुणैरित्युपपद्यते ॥ १७ ॥

भा०—जो ग्रह अपने वर्ग में हो उसका १८, अधिमित्र के वर्ग में १५ मित्र के वर्ग में १३ सम के वर्ग में ९, शत्रु के वर्ग में ५, अधि शत्रु के वर्ग में ३ होरादि षड्वर्ग में अंक लिखना केवल गृहस्थान में द्विगुणित करके स्थापन करना। फिर सब अंकों का योग करके यदि ग्रह स्वगृह में हो तो ३६ से, अधिमित्र की राशि में हो तो ४८ से, मित्र की राशि में हो तो ५४ से, सम की राशि में हो तो ७२ से, शत्रु की राशि में हो तो १०८ से, तथा अधिशत्रु की राशि में हो तो १४४ से,

*, + अस्यैव ग्रन्थस्य १६ श्लोकस्योदाहरणदीपिकायां विलोक्यम् ॥

उपरोक्त योग में भाग देने से लब्धि आश्रय गुणक होता है। यदि ग्रह स्वनवांश, वा वर्गोत्तम नवांश, वा स्वद्रेष्काण में हो तो योगांक को सर्वदा ३६ से भाग देने से आश्रय गुणक होता है ॥ १७ ॥

उ० दी०—अथ रविरधिशत्रुगृहे वर्त्तते तेन गुणा द्विगुणिताः (अर्थात् षट्)। एवं रविः स्वहोरायामस्ति तेन धृतिरष्टादश। एवं शत्रुद्रेष्काणे तेन पञ्च। समसप्तमांशे तेन नव। अधिशत्रुनवमांश तेन त्रयः। अधिमित्रद्वादशांशे तथाधिमित्रत्रिंशांशे च इष्विला (पञ्चदश) रवेर्गृहादिसप्तवर्गेषु क्रमात्संस्थाप्य तेषां योगः = ६ + १८ + ५ + ९ + ३ + १५ + १५ = ७१। अथ रविरधिशत्रुगृहेऽतः जिनाः २४ षड्गुणिताः १४४ अयं हरः। अथ चन्द्रकुजयोः स्वांशत्र्यंशगतत्वाद्धरः षट्त्रिंशदेव। एवं सर्वेषामित्यलं पल्लवितेनेति (द्र० ८३ चक्रम्)। अथ रवेः पूर्वानीतयोगः ७१ स्वहारेन १४४ नेन भक्तो जातः रवेराश्रयगुणकः ००।२९।३५ एवं चन्द्रादीनामपि (द्र० ८४ चक्रम्) ॥१७॥

अथाश्रयगुणके संस्कारविशेषं, कर्म्मयोग्यगुणकमंशायुर्दायोपयोगिनो दायांशांश्चाह—

चेद्वर्गोत्तमपूर्वगोऽध्यरिसुहृद्भे तद्गृहाङ्कात् त्रिषड्-
लब्ध्योनो युगरीष्टभेऽब्धिनवकाप्त्या स्वे समे केवलः।
कार्यस्त्वाश्रयकः स तत्स्फुटहतेर्मूलं स योग्यो गुणः
खेटानां च तनोर्लवाः खयुगहृच्छेषा इहांशायुषः ॥१८॥

व्या०—चेद् यदि ग्रहो वर्गोत्तमपूर्वगो वर्गोत्तमनवांशस्वनवांशस्वद्रेष्काणेष्वयन्यतमस्थो भवेत् तदा तद्गृहांकात् गृहवर्गस्थापितांकात् त्रिषड्लब्ध्या त्रिषष्टिभक्तफलेन क्रमेणाश्रयगुणक ऊनो युक् (अधिशत्रुराशौ ग्रहे ऊनोऽधिमित्रराशौ स्थिते युक्तः) कार्य्यः। एवं अरीष्टभे ग्रहो (वर्गोत्तमपूर्वगश्चेत् शत्रुमित्रगृहे) भवेत् तदा। गृहांकात् अब्धिनवकाप्त्या चतुर्नवत्या लब्धफलेन क्रमादूनयुक आश्रयगुणकः कार्य्यः। तथा वर्गोत्तमपूर्वगः स्वे स्वराशौ समे समराशौ वा ग्रहो भवेत् तदा केवलः पूर्वसाधित एवाश्रयगुणको ज्ञेयः। तत्स्फुटहतेराश्रयगुणकस्पष्टगुणकघातान्मूलं स योग्यः कर्मयोग्यो गुणो भवति अथ दायांशान् कथयति—खेटानामिति। इहात्र खेटानां ग्रहाणां, तनोर्लग्नस्य च लवा अंशाः खयुगहृच्छेषा अंशायुषो दायांशा भवन्ति ॥१८॥

अत्रोपपत्तिः—यदि वर्गोत्तमादित्रिकान्यतमस्थितो ग्रहोऽधिशत्रुराशौ तदा पूर्वोक्तेन "यः स्वाधीष्टेत्यादिना" गृहगुणकः = $\frac{\text{गृहांक}}{३६}$ तथा "नगांशका रुद्रमिता अधीष्टराशौ"* इत्यादिना अधिशत्रुराशौ त्रयोनगांशाः $\left(\frac{३}{७}\right)$ त्रिगुणितसप्तमांशो वास्तवगुणः = $\frac{\text{गृहांक}\times\frac{३}{७}}{३६} = \frac{\text{गृहांक}}{३६}\times\left(१-\frac{४}{७}\right) = \frac{\text{गृहांक}}{३६} - \frac{\text{गृहांक}\times ४}{३६\times ७} = \frac{\text{गृहांक}}{३६} - \frac{\text{गृहांक}}{६३}$ । एतेन अध्यरिभे गृहांकात् त्रिषड्लब्ध्योन इत्युपपन्नम् ।

तथा "नगांशका रुद्रमिता अधीष्टराशौ" इति वचनेनाधिमित्रराशौ वास्तवगुणः $= \frac{\text{गृहांक}}{३६}\times\frac{११}{७} = \frac{\text{गृहांक}}{३६}\left(१+\frac{४}{७}\right) = \frac{\text{गृहांक}}{३६} + \frac{\text{गृहांक}\times ४}{३६\times ७} = \frac{\text{गृहांक}}{३६} + \frac{\text{गृहांक}}{६३}$ ∴ अधिसुहृद्भे "गृहांकात्त्रिषष्टिलब्ध्या युक्" इत्युपपद्यते। तथा 'सुहृद्वेश्मनि मूर्च्छनांशा नवाश्विनः $\frac{२९}{२१}$" इति वचनेन मित्रभे वास्तवगुणः $= \frac{\text{गृहांक}}{३६}\times\frac{२९}{२१} = \frac{\text{गृहांक}}{३६}\left(१+\frac{८}{२१}\right) = \frac{\text{गृहांक}}{३६} + \frac{\text{गृहांक}\ ८}{३६\times २१} = \frac{\text{गृहांक}}{३६} + \frac{\text{गृहांक}\times २}{१८९} = \frac{\text{गृहांक}}{३६} + \frac{\text{गृहांक}}{९४\frac{१}{२}} = \frac{\text{गृहांक}}{३६} + \frac{\text{गृहांक}}{९४}$ स्वल्पान्तरात्। "कुद्व्यंशका विश्वमिता द्विषद्भे" इत्यनेन शत्रुराशौ अब्धिनवकाप्त्योन इत्युपपद्यते। वस्तुतोऽत्राब्धिनवकस्थाने सार्धचतुर्नवतिर्भवत्यतो "द्विगुणगृहांकान्नवाष्टैकाप्तोनयुगाश्रयगुणः कार्यः" इति ८५चक्राधःस्थगद्येऽपूछशर्मणाप्युक्तं युक्तमेव। समभे स्वराशौ च रूपगुणत्वात् "केवलः" यथागत एवाश्रयगुणः कार्य इत्यपि साधु समुदितम्। घातमूलस्यस्फुटता प्रागेव प्रदर्शिता। अथ दायांशोपपत्तिः—वराहमिहिरादिवचनेन "ग्रहभुक्तनवांशराशितुल्यं" आयुर्वर्षप्रमाणं भवत्यतो भुक्तनवांशज्ञानार्थमनुपातो यदि त्रिंशदंशैर्नव नवांशसंख्या तदा ग्रहलग्नभुक्तांशैः किमिति ग्रहलग्नभुक्तनवांशसंख्या सा च राशीनां द्वादश-

* अस्यैव ग्रन्थस्य १६ श्लोकस्योदाहरणदीपिकायां विलोक्यम्।

त्वाद् द्वादशतष्टा $\frac{\text{भुक्तांश} \times ९}{३० \times १२} = \frac{\text{भुक्तांश}}{४०}$ शेषराश्यादितुल्या अंशायुषो (दायांशाः) भवन्त्येवेत्युपपन्नम् ॥१८॥

भा०—यदि ग्रह वर्गोत्तमनवांश, स्वनवांश वा स्वद्रेष्काण में स्थित होकर अधिशत्रु के गृह में हो तो गृहांक को ६३ से भाग लेकर लब्धि को आश्रय गुणक में घटाने से, यदि अधिमित्र के घरमें हो तो उसी लब्धि को आश्रय गुणक में जोड़ने से वास्तव (संस्कृत) आश्रय गुणक होता है। यदि शत्रु की राशि में हो तो गृहांक को ९४ से भाग देकर लब्धि को ॐ आश्रय गुणक में घटाने से, मित्र के घर में हो तो जोड़ने से वास्तव (संस्कृत) आश्रय गुणक होता है। यदि सम की राशि में वा स्वगृह में हो तो केवल पूर्वसाधित आश्रय गुणक ग्रहण करना। इस आश्रय गुणक और पूर्वोक्तस्फुट गुणक का घात (गुना) करके मूल लेना तो कर्मयोग्य गुणक होता है। ग्रह अथवा लग्न को अंशात्मक बनाकर उसको ४० से भाग देकर शेष आयुर्भाग (दायांश) होता है ॥१८॥

उ० दी—अथ चन्द्रकुजयोः स्वांशत्र्यंशगतत्वादाश्रयगुणके पुनरन्योऽपि संस्कारः। यथा शत्रुगृहगतस्य चन्द्रस्य गृहाङ्का १० दस्मादब्धिनवकाप्तेना ००।०६।२३ नेन पूर्व्वानीतोऽय २।१६।४० माश्रयगुणको रहितो वास्तवाश्रयगुणको जातः २।१०।१७। वस्तुतस्तु "शत्रोर्गृहे पूर्णपद्मा नवाष्टेन्दुहृता ऋण" मित्यनेन चन्द्रस्य संस्कृताश्रयगुणकः २।१०।१९ अयमेव ग्राह्यः। एतदर्थं ८५ चक्राधःस्थितगद्यमवलोक्यम्। अथ कुजस्याधिमित्रगृहगतत्वाद्गृहाङ्कस्या ३० स्य त्रिषष्ट्यंशेना ००।२८।३४ नेन पूर्वानीतोऽ २।३५।०० यमाश्रयगुणको युक्तो जातः संस्कृताश्रयगुणकः ३।०३।३४। अन्येषां वर्गोत्तमादिस्थानराहित्यात्पूर्वानीत एवेति (द्र० ८५ चक्रम्)।

अथ रवेः स्फुटगुणकः १।२८।३६। आश्रयगुणकः ००।२९।३५ अनयोर्युतिः ००।४३।४१ अस्या मूलम् ००।५१।१६ अयं कर्म्मयोग्यगुणः। एवं सर्वेषाम् (द्र० ८८ चक्रम्)।

अथ राश्यादिस्पष्टो रविः १०।१२।५७।३८ अस्यांशाः ३१२।५७।३८ चत्वारिंशद्भक्ताः शेषमिद ३२।५७।३८ मंशायुरंशात्मकम्। यद्यस्यैव कलाः क्रियन्ते तदा तु अंशायुःकलाः १९७७।३८ एवं सर्वेषाम् (द्र० ८९—९० चक्रे) ॥१८॥

ॐ गृहांक को २ से गुणाकर १८९ का भाग देने से वास्तव लब्धि होती है।

अथ चक्रार्धहानिमाह—

षड्भाल्पे सति खेचरोन उदयेऽस्यांशोद्धृतैः खाग्निभि-
स्त्वेकाल्पेऽस्य च खाग्निभाजितलवैः सौम्योनिते त्वर्धितैः।
ऊना भूर्गुण एकभे द्विबहुषु त्वेकस्य बह्वोजसः
कार्यस्तद्गुणिताः स्वदायजलवाश्चक्रार्धहानिस्त्वियम् ॥१९॥

व्या०—खेचरोने ग्रहोने उदये लग्ने षड्भाल्पे सति अस्य षड्भाल्पस्य लग्नोनखेचरस्यांशोद्धृतैः खाग्निभिरूना भूरेको गुणः स्यात्। (षडधिके ग्रहोनोदये हानिर्नैवेत्यर्थात् सिद्ध्यति) च तथा ग्रहोनोदये एकाल्पे सति अस्य खाग्निभाजितलवैस्त्रिशद्भक्तांशैरूना भूर्गुणो भवति। सौम्योनिते शुभग्रहोने उदये तु अर्धितैरर्धितैरंशोद्धृतैः खाग्निभिः, अर्धितैः खाग्निभाजितलवैर्वा ऊना भूर्गुणो भवति। तुर्विशेषार्थः। एकभे एकराशौ द्विबहुषु द्वित्र्यादिषु ग्रहेषु सत्सु एकस्य बह्वोजसोऽधिकबलस्य गुणः कार्यः। न सर्वस्य। तद्गुणिताः स्वदायजलवाः कार्याः इयं चक्रार्धहानिर्भवेत् ॥१९॥

अत्रोपपत्तिः—"सर्वार्धत्रिचरणपञ्चषष्टभागाः क्षीयन्ते व्ययभवनादसत्सु वामम्। सत्स्वर्धं ह्रसति तथैकराशिगानामेकोंऽशं हरति बली तथाह सत्यः" इति सयुक्तिवृद्धवाक्येन लग्नाद्द्वादशे पापग्रहे आयुषः सर्वांशः क्षीयते, शुभग्रहे त्वर्धभागो नश्यति तत्र खेचरोनोदय एकराशिः। एवमेकादशे पापेऽर्धांशो नश्यति तत्र खेचरोनोदयो राशिद्वयतुल्यः, दशमे च राशित्रयमन्तरं तत्र त्र्यंशहानिः, नवमे पापे राशिचतुष्टयमन्तरं तत्र चतुर्थांशहानिरेवं यथा यथान्तरवृद्धिस्तथा तथाऽऽयुर्हानिहरवृद्धिरतोऽनुपातो यदि त्रिंशदंशैरेको हरस्तदेष्टखेचरोनोदयांशैः क इति इष्टहरः $= \frac{\text{इअं} \times १}{३०}$ अनेनायुर्लवा भक्ता जाता हानिलवाः $= \frac{\text{आअं} \times ३०}{\text{इ अं}}$ एभिर्हीना आयुर्लवा जाता इष्टायुरंशाः $= \text{आअं} - \frac{\text{आअं} \times ३०}{\text{इ.अं}} = \frac{\text{इअं} \times \text{आअं} - \text{आअं} \times ३०}{\text{इअं}}$

$= \frac{\text{आअं}(\text{इअं} - ३०)}{\text{इ अं}} = \text{आअं}\left(१ - \frac{३०}{\text{इअं}}\right)$। एकभाल्पे (त्रिंशदंशाल्पे) खेचरोनोदये तदंशभक्तत्रिंशतो रूपाधिकत्वात् रूपान्न शुद्ध्य-

तीति व्यस्तत्रैराशिकेन खाग्निभाजितलवैरित्युपपद्यत इति सर्वं निरवद्यम् ॥१६॥

भा०—लग्नमें ग्रहको घटाकर यदि ६ राशि से न्यून हो तो उसका अंश बना कर उस अंशसे ३० में भाग देकर लब्धि को १ एक में घटा कर गुणक होता है। लग्न में ग्रहको घटाने से १ राशिसे अल्प हो तो अन्तरांश को ३० से भाग देकर लब्धि को १ में घटावे तो गुणक होता है इस प्रकार पाप ग्रह हो तो गुणक होता है। यदि शुभ ग्रह हो तो लब्धि के आधा को १ में घटाकर गुणक होता है। यदि एक राशि में दो वा दो से अधिक ग्रह हो तो उनमें सबसे बली जो हो उसीका गुणक करना सब ग्रह का नहीं। फिर उस गुणक से दायांश को गुना करना तो चक्रार्धहानि होती है। ग्रहोन लग्न यदि ६ राशि से अधिक हो तो चक्रार्धहानि गुणक नहीं करना ॥१९॥

उ० दी०—अथ गुरुः १।१६।५७।३० लग्नम् ६।१८।३४।४६ अतो गुरूनोदयः ४।२८।३७।१६ अस्यांशैः १४८ । ३७। १६ रेभिस्त्रिंशद्भाज्या । अत्र सवर्णनार्थं भाज्यहारौ वारद्वयं षष्ट्या गुण्यौ । एवं भाज्यः=३०×६०×६०=१०८००० । एवमेव हारः= (१४८। ३७। १६)=५३५०३६ । अथ भाज्येऽ १०८००० स्मिन् हारेण ५३५०३६ नेन भक्ते लब्धम् ००। १२। ०६। ४०। ४८ शुभग्रहत्वादेतदर्धेना ०० । ०६ । ०३ । २० । २४ नेनैको हीनः ००। ५३।५६।३९।३६ अयं गुरोश्चक्रार्धहानिगुणकः । एवं शनेरपि तत्र पापग्रहत्वादर्धांशो रूपान्न शोध्यः । किन्तु सम्पूर्णांश एव शोध्यः । एवमन्येषां खेचरोनोदयस्य षड्भाधिकत्वाच्चक्रार्धहानिर्न जाता (द्र० ९२ चक्रम्) ‡।

अथ गुरोर्दायांशाः ९ । ५७ । ३० स्वचक्रार्धहानिगुणकेनानेन ००।५३।५६।३९।३६ गुणिताः ८।५७।११।४४।२१= ८।५७।१२ अर्धाधिकग्रहणाज्जाता गुरोश्चक्रार्धहानिसंस्कृतायुरंशाः। एवं शनेरपि । अन्येषां संस्काराभावात्प्रागानीता एवांशाः (द्र० ९४ चक्रम्)।

---

‡ अत्र ९१तमचक्रानयनार्थं तच्चक्राधःस्थिता नीलकण्ठपद्धत्युक्तिर्द्रष्टव्या । यथा गुरूनोदयस्यांशाः १४८ । ३७ । १६ द्वाभ्यां गुणिताः २९७ । १४ । ३२ खरसैर्भक्ताः ४ । ५७। १४ । ३२ शुभग्रहत्वाद्द्विगुणिताः ९ । ५४ । २९ । ०४ अयं गुरोश्चक्रार्धहानिहरः । एवं शनेरपि परमत्र खरसहृता एव ग्राह्या न तु द्विगुणिता इति ।

अथात्रांशास्त्रिंशता सङ्गुण्य यदि कलास्थाने प्रक्षिप्यन्ते तदा ६३ तमश्चक्रं सिद्ध्यति (द्र० ६३ चक्रम्) ॥१९॥

अथ वर्षाद्यंशायुरानयनमाह—

दायांशोत्थकलाः स्वयोग्यगुणकघ्नाः खाभ्रनेत्रोद्धृता
अंशायुर्द्युसदां समादि तु तनोर्दायांशकास्त्र्याहताः ।
दिग्भक्ता हि समादि चेत्तु बलवल्लग्नं तदा लग्नभै-
स्तुल्याब्दैः सहितं द्विनिघ्नशरहृद्भागादितो मासयुक् ॥२०॥

व्या०—द्युसदां ग्रहाणां दायांशोत्थकलाः चक्रार्धहानिसंस्कृतदायांशानां कलाः स्वयोग्यगुणकघ्नाः स्वकीयकर्मयोग्यगुणकेन गुणिताः खाभ्रनेत्रोद्धृता द्विशतया भक्ता लब्धं समादि वर्षाद्यमंशायुर्भवति । तु पुनः तनोर्लग्नस्य दायांशकाः त्र्याहताः त्रिभिर्गुणिता दिग्भक्ताः फलं लग्नस्य समादि वर्षाद्यमंशायुर्भवति । चेत्तु यदि तु बलवल्लग्नं षड्रूपाधिकवलं लग्नं तदा लग्नभैर्लग्नभुक्तराशिभिस्तुल्याब्दैः सहितं कार्यम् । तथा द्विनिघ्नशरहृद्भागादितो मासयुक् (द्विगुणिताद् लग्नवर्तमानराश्यंशादितः पञ्चभक्ताल्लब्धमासाद्यं मासादौ युक्तं कार्यमित्यर्थः) एवं लग्नायुः स्फुटं भवति । लग्नबलं यदि षड्रूपाल्पं तदा "दायांशकास्त्र्याहता दिग्भक्ताः" एव लग्नायुः स्यादिति ॥२०॥

अत्रोपपत्तिः—"ग्रहभुक्तनवांशराशितुल्यम्" इति वचनेन यद्येकनवांशकलाभिः खाभ्रनेत्रमिताभि (२००) रेकं वर्षं तदा स्वयोग्यगुणकगुणितदायांशकलाभिः किमिति ग्रहाणामंशायुर्वर्षाद्यम्

$=\frac{\text{दायांश.} \times \text{यो.गु.}}{२००}$ । अथ लग्नायुरानयनार्थमनुपातो यदि त्रिंशदंशैर्नव वर्षाणि तदा लग्नदायांशैः किमिति लग्नांशायुः $=\frac{९ \times \text{ल. दा. अं}}{३०}$

$=\frac{३ \times \text{ल. दा. अं}}{१०}$ । तथा "वीर्यान्विता राशिसमं च होरा" इति वराहमिहिरोक्तेन "लग्नभैस्तुल्याब्दैः सहित" मित्यपि समुचितमेव । अंशादिफलमनुपातेन — यदि त्रिंशदंशैर्द्वादशमासा लभ्यन्ते तदा लग्नांशैः किमिति मासादिफलेन $\frac{१२ \times \text{ल अं}}{३०}=\frac{२ \times \text{ल अं}}{५}$ अनेन युक्तं

स्फुटं लग्नायुर्वर्षाद्यं स्यात्। लग्नस्य चक्रार्धहान्यादिसंस्काराभावात्। अतः सर्वमुपपन्नम् ॥२०॥

भा०—चक्रार्धहानि संस्कृत दायांश को कलात्मक करके अपने अपने कर्म योग्य गुणक से गुना कर उसमें २०० का भाग देने से वर्षादिक ग्रहों की अंशायु होती है। और लग्न के दायांश को ३ तीन से गुना करके १० दश का भाग देने से लब्धि वर्षादिक लग्न की अंशायु होती है। यदि लग्न का बल ६ से अधिक हो तो लग्न की भुक्तराशितुल्य वर्ष और जोड़ना तथा लग्न के अंशों को २ से गुना कर उसमें ५ का भाग देने से लब्धि मासादिक फल मासादिक में जोड़ना तो लग्न की स्पष्ट आयु होती है ॥२०॥

उ० दी—अथ रवेश्चक्रार्धहानिसंस्कृतदायांशकलाः १६७७। ३८ स्वकर्मयोग्यगुणकेना ००। ५१। ०६ नेन गोमूत्रिकया गुणिताः १६८४। १७ द्विशत्या भक्ताः लब्धिर्वर्षाणि ८, शेष ८४।१७ मिदं द्वादश-भिर्गुणितम् १०११। २४ द्विशत्याऽऽप्तं मासाः ५ शेषं ११। २४ त्रिंशता गुणितम् ३४२। ०० द्विशत्या भक्तं लब्धं दिनं १ शेषम् १४२ षष्ट्या गुणितं ८५२० द्विशत्या लब्धम् घट्यः ४२ शेषं १२० षष्ट्या गुणितं ७२०० द्विशत्याप्तं पलानि ३६। अथ वर्षादीनां क्रमान्न्यासेन रवे-रंशायुर्वर्षाद्यम् ८। ५। ०१। ४२। ३६ एवमन्येषां ग्रहाणाम्। अथैवं लग्नस्य दायांशाः ३८। ३४। ४६ त्र्याहताः ११५। ४४। १८ दशभक्ताः लब्धं वर्षाद्यम् ११। ०६। २६। ३४। ३८ अथ षड्रूपाधिकं लग्नबलमतः लग्नराशितुल्येन वर्षेना ६ नेन युक्तम् १७। ०६। २६। ३४। ४८ पुन-र्लग्नस्य भागादिकं १८। ३४। ४६ द्विनिघ्नं ३७। ०६। ३२ पञ्चभिर्भक्तं लब्धेन मासाद्येना ७। १२। ५७। १२ नेन युक्तं जातं लग्नस्यांशायु-र्वर्षाद्यम् १८। ०२। ०६। ३२। ०० (द्र० ६५ चक्रम्) ॥२०॥

अथ पिण्डनिसर्ग-जीवशर्मायुर्दायोपयोगिनो दायांशानाह—

स्वोच्चोनो द्युचरोऽङ्गभात्समधिको ग्राह्योल्पकोनार्कभं
तद्भागा द्युचरोऽरिभे यदि गुणांशोना विना वक्रगम्।
द्व्यासा अस्तमिते विना शनिसितौ हानिद्वयेऽत्राधिकै-
काथो पिण्डनिसर्गजीवगदिते चक्रार्धहानिर्भवेत् ॥ २१ ॥

व्या०—स्वोच्चोनो द्युचरः स्वकीयोच्चेन विहीनो ग्रहोऽङ्गभात् षड्राशिभ्यः समधिको ग्राह्यः। राशिषट्कादल्पश्चेत् तदा अल्पकोना-

र्कभं (रसभाल्पं द्वादशराशिभ्यो विशोध्य शेषं) ग्राह्यम् । तद्भागास्तदीयांशाः कार्याः । ते पिण्डनिसर्गजीवायुर्भागा ज्ञेयाः । यदि वक्रगं (वक्रगतिग्रहं) विना द्युचरो (मार्गगतिग्रहः) अरिभे शत्रुराशौ स्थितस्तदा तद्भागा गुणांशोनाः स्वतृतीयांशेन हीनाः कार्याः । वक्रगतिग्रहः स्वत्र्यंशं नैवापहरतीत्यर्थः । तथाऽस्तमितेऽस्तं गते ग्रहे शनिसितौ विना तद्भागा द्व्याप्ता अर्धिताः कार्याः । शनिशुक्रावस्तं प्राप्तावपि स्वार्धं नापहरत इत्यर्थः । अत्र हानिद्वये प्राप्तेऽधिका महत्तरैकैवार्धहानिरेव कार्या । नैव हानिद्वयं कार्यम् । अथानन्तरं पिण्डनिसर्गजीवगदितेऽपि चक्रार्धहानिर्भवेत् । अत्र शत्रुर्नैसर्गिको ग्राह्यो न तु तत्कालिक इति ॥ विशेषार्थमुदाहरणे (१००) चक्राधःस्थगद्यं विलोक्यम् ॥२१॥

अत्रोपपत्तिः—"नीचेऽतोऽर्धं ह्रसति हि ततश्चान्तरस्थेऽनुपातः" इति बृहज्जातकवचनेन स्वोच्चस्थे पठितायुःप्रमाणं, नीचे तदर्धम् । अतो नीचात् षड्भान्तरिते (उच्चस्थे) ग्रहे आयुरर्धतुल्य उपचयो भवति । अतोऽनुपातो—यदि षड्राशितुल्येन नीचग्रहान्तरेणायुरर्धतुल्य उपचयस्तदेष्टनीचग्रहान्तरेण किमिति $= \frac{\text{आ०} \times (\text{ग्र—नी})}{२ \times ६}$

$=$इष्टोपचयः, अनेन युतं नीचस्थानभवमायुरर्धमिष्टायुः $=$

$$\frac{\text{आ.}}{२} + \frac{\text{आ.(ग्र–नी)}}{१२} = \frac{६ \times \text{आ.} + \text{आ. (ग्र–नी)}}{१२} = \frac{\text{आ०} \times (६ + \text{ग्र–नी})}{१२}$$

$= \frac{\text{आ०} \times (\text{ग्र–उ}),}{१२}$ एवमत्र "यदि द्वादशराशिभिः पठितायुस्तदोच्चोनग्रहराशिभिः किम्" इतित्रैराशिकभवं फलं दृश्यते । तत्राचार्येणांशानुपात एव कृतो यथा—यदि द्वादशराश्यंशैरे (३६०) भिः पठितायुः (आ०) इति लभ्यते तदोच्चोनग्रहांशैः किमिति अत एव "दायांशाः स्वगुणैर्हता हि भगणांशाप्ता" इत्यग्रे वदश्यति । तथा चात्र ६ < ६ + ग्र–नी = ग्र—उ, अतः षड्राश्यधिकेनोच्चग्रहान्तरेण भवितव्यमतः "अङ्गभात्समधिको ग्राह्योऽल्पकोनार्कभम्" इत्युपपन्नम् । "हित्वा वक्रं रिपुगृहगतैर्हीयते स्वत्रिभागः सूर्योच्छिन्नद्युतिषु च दलं प्रोज्झ्य शुक्रार्कपुत्रौ ।" इत्यादिहोरागमप्रमाणेन त्र्यंशार्धहानिरुपपद्यते । तथा "वक्रोच्चयोस्त्रिगुणितम्" इति वक्रगतिग्रहस्य सबलत्वान्न त्र्यंत्रहानिरिति समुचितमेव । सूर्यः शनिशुक्रयोः शत्रुरतस्तेनास्तमितयोरपि तयोर्नायुर्हानिरिति । तथा—"बहुघ्नतायामेकं तु यद्भूरि तदेव कार्य्यम्"

इति वचनादिना "अधिकैका हानिः कार्या" इति, तथा "पूर्वोक्तं चिन्तयेत् सर्वम्" इति सारावलीवाक्येन "चक्रार्धहानिर्भवेदिति" च साधु समुदितम् ॥२१॥

भा०—ग्रहमें अपने उच्चको घटाकर शेष ६ राशिसे अधिक हो तो, उसका अंश बनाना, ६ राशिसे अल्प हो तो उसको १२ में घटाकर शेषका अंश करना तो पिण्डादित्रिकायुर्भाग होता है। यदि ग्रह शत्रु गृहमें हो तो आयुर्भागमें तृतीयांश घटा देना। यदि ग्रह वक्र गति हो तो शत्रु गृहमें भी त्र्यंश हानि नहीं करना तथा यदि ग्रह अस्त हो तो आयुर्भागमें आधा कम करना। यदि शुक्र और शनि अस्त भी हो तो अर्ध हानि नहीं होती है। जिस ग्रहकी अर्धहानि और त्र्यंश हानि दोनों की सम्भावना हो तो वहाँ केवल अर्ध हानि करना। और पिण्डादित्रिकायु (पिण्ड-निसर्ग-जीवायु) में भी चक्रार्ध हानि करना। यहाँ शत्रु नैसर्गिक विचार करे तात्कालिक नहीं ॥२१॥

उ० दी०—अथ रविः १०।१२।५७।३८ स्वोच्चेना ००।१० नेन रहितः १०।०२।५७।३८ अस्यांशाः ३०२।५७।३८ एते पिण्डादित्रिकायुरंशा जाताः। एवं सर्वेषां सिद्धयन्ति (द्र० १०० चक्रम्)।

अथोच्चोनरवेर्यदि कलाः क्रियन्ते तर्हि पिंडादित्रिकायुष्कलाः १८१७७।३८ इति ९९ चक्रावलोकनेनैव स्पष्टम्।

अथात्रोदाहरणे—रविगुरू शत्रुगृहे वर्त्तते तेन तयोः त्र्यंशहानिः स्यादेव। परं शत्रुगृहगतस्यापि शनेर्वक्रगतित्वान्न त्र्यंशहानिर्जाता। बुधः सूर्य्येन सहास्तं गतस्तेनार्द्धहानिः स्यात्। गुरुशन्योस्तु चक्रार्धहानिरप्यादावंशायुर्दायवदेव कार्य्या।

तद्यथा—रवेः पिण्डादित्रिकायुरंशाः ३०२।५७।३८ स्वत्र्यंशेना-१००।५९।१२।४० नेन हीनिताः २०१।५८।२५।२० एतद्रवेः संस्कृत-पिण्डादित्रिकायुः। एवं बुधस्याप्यर्धहानिः कार्या। गुरोस्तु प्रथमं त्र्यंशहानिः ततः चक्रार्धहानिः कार्या। तद्यथा नीचोनगुरोरंशाः ३१४।५७।३० स्वत्र्यंशेना १०४।५९।१० नेन रहिताः २०९।५८।२० एते गुरोश्चक्रार्धहानिगुणकेना ५३।५६।३९।३६ नेन गोमूत्रिकया गुणिता जाता गुरोस्त्र्यंशचक्रार्धहानिकृताः पिण्डादित्रिकायुरंशाः १८८।४६। ४८।४० एवं नीचोनशनेरंशाः स्वचक्रार्धहानिगुणकेन गुणिताः शनेः पिण्डादित्रिकायुरंशाः सिद्धयन्ति इति (द्र० १०१ चक्रम्) ॥२१॥

अथ लग्ने पापग्रहे हानिमाह—

दायांशा द्युसदां पृथक् तनुलवादिघ्नाः खषट्त्र्युद्धृता
आप्त्योनास्तनुगे खले च यदि सद्दृष्टेऽर्धयाथापरे।
निघ्न्योग्रोदयभावजेन तनुगोग्रौ चेद्बलिष्ठस्य तत्-
साम्ये पुष्टफलेन नेति तनुपेऽस्मिन्नांशजेऽसौ क्रिया ॥२२॥

व्या०—खले पापग्रहे तनुगे लग्नस्थे सति द्युसदां ग्रहाणां दायांशाः (अनन्तरानीताः) पृथक् स्थाप्याः। ते तनुलवादिघ्ना लग्नस्य-राशीन्विहायांशादिना गुणिताः खषट्त्र्युद्धृताः षष्ट्यधिकशतत्रयेण भाज्या आप्त्या लब्धेनांशादिना पृथक्स्था ऊनाः कार्याः। तनुगे खले सद्दृष्टे शुभग्रहेक्षिते सति अर्धयाऽऽप्तफलार्धेन। पृथक्स्था हीनाः कार्याः। अथानन्तरमपरे आचार्याः (झालुगिरामकृष्णादयः) उग्रोदयभावजेन लग्नस्थपापग्रहस्य भावजेन फलेन निघ्न्याऽऽप्त्या दायांशा ऊनाः कार्याः। तनुगोग्रौ लग्ने द्वौ पापौ चेत् तदा बलिष्ठस्य भावजफलेन। तत्साम्ये बलसाम्ये पुष्टफलेनाधिकफलेन निघ्न्याऽऽप्त्या दायांशा ऊनाः कार्या एवं वदन्ति। इति न (इदं तन्मतं न रमणीयमित्यर्थः)। अथ लग्नस्थक्रूरे लग्नेशे इयं हानिः कार्या न वेत्याशंकायां कथयति 'तनुपेस्मिन्निति' अस्मिन् लग्नस्थक्रूरे तनुपे लग्नेशे सति तथांशजेंऽशायुर्दायेऽसौ क्रिया न कार्या ॥२२॥

अत्रोपपत्तिः—'सार्धोदितोदितनवांशहतात्समस्ताद् भागोष्टयुक्तशतसंख्य उपैति नाशम्। क्रूरे विलग्नसहिते विधिना त्वनेन सौम्येक्षिते दलमतः प्रलयं प्रयाति॥" इति बृहज्जातकवचनेन क्रूरे लग्नगे हानिभागः $= \frac{\text{दायांश} \times \text{लग्नवांश}}{१०८}$। अत्र लग्ननवांशं "यदि त्रिंशदंशैर्नव नवांशा लभ्यन्ते तदेष्टलग्नांशादिभिः किमिति $= \frac{९ \times \text{लग्नांशादि}}{३०}$" अनेनोत्थाप्य जातो हानिभागः $= \frac{\text{दायांश}}{१०८} \times \frac{९ \times \text{लग्नांशादि}}{३०}$

$= \frac{\text{दायांश} \times \text{लग्नांशादि}}{३६०}$। अनेन हीना दायांशाः स्फुटा भवितुमर्हन्ति।

अन्ये आचार्यास्तु 'यदि रूपमितेन १ पूर्णतद्भावफलेनेयं हानिस्त-

देष्टभावफलेन किमि" त्यनुपातोद्भवेन फलेन दायांशा ऊनाः कृतास्तन्न बहुसम्मतम्। शेषवासनायां त्वागम एव प्रमाणमित्यलं पल्लवितेन ॥२२॥

भा०—यदि लग्न में पापग्रह हो तो ग्रह के पिण्डादि आयुर्भाग को पृथक् रखकर लग्न के अंशादि से गुना करके ३६० से भाग देकर लब्धि को पृथक् स्थित आयुर्भाग में घटावे। यदि शुभ ग्रह की दृष्टि लग्नगत पाप पर हो तो लब्धि के आधा आयुर्भाग (दायांश) में घटावे तो पिण्डायु होती है। दूसरे आचार्यों की सम्मति यह है कि उपरोक्त लब्धि को लग्नगत पापग्रह के भावफल से गुनाकर दायांश में घटावे। शुभग्रह की दृष्टि रहे तो उसका आधा घटावे। लग्न में दो पाप ग्रह हो तो अधिक बल वाले के भावफल से गुना करे। बल में समता हो तो जिसका भावज फल अधिक हो उससे गुना करे। पर यह मतान्तर ग्राह्य नहीं है। और लग्नगत क्रूर यदि लग्नेश हो तथा अंशायुर्दाय में यह संस्कार नहीं होता है॥२२॥

उ० दी—अथात्रोहरणे लग्ने क्रूराभावात् तज्जनिता हानिर्नास्त्येव। अन्यद् व्याख्यावलोकनेनैव सुगममिति ॥२२॥

अथ पिण्डनिसर्गजीवशर्मायुर्वर्षाद्यानयनमाह—

गोऽजास्तत्त्वतिथिप्रभाकरतिथिस्वर्गा नखाः पैण्डजे
नैसर्गे नखभूद्विगोधृतिनखाः पञ्चाशदर्काद् गुणाः।
दायांशाः स्वगुणैर्हता हि भगणांशाप्ताः समाद्यायुषो
स्वर्गाप्ताश्च समादि जैवमिभहृत्स्वांशैर्घटीष्वन्वितम्॥२३॥

व्या०—अर्कात् (अर्कमारभ्य सप्तानां ग्रहाणां) क्रमात् गोऽजास्तत्त्वतिथिप्रभाकरतिथिस्वर्गा नखाः पैण्डजे पिण्डायुषि गुणाः स्युः। नैसर्गे निसर्गायुषि नखभूद्विगोधृतिनखाः पञ्चाशत् क्रमेणार्कादिग्रहाणां गुणाः स्युः। पैण्डजे नैसर्गे च दयांशाः स्वगुणैर्हता भगणांशाप्ताः लब्धतुल्ये समाद्ययुषी भवतः। तथा दायांशाः स्वर्गाप्ता एकविंशतिभक्ता लब्धं जैवं जीवशर्मोक्तं समाद्यायुर्भवति। तदिभहृत्स्वांशैरष्टभक्तदायांशैर्घटीष्वन्वितं कार्यं तदा वास्तवं स्यात् ॥२३॥

अत्रोपपत्तिः-पिण्डायुषि "नवतिथिविषयाश्विभूतरुद्रदश सहिता दशभिः स्वतुंगभेषु" तथा नैसर्गे "एकं द्वौ नव विंशतिर्धृति-

कृती पञ्चाशदेषां क्रमाच्चन्द्रारेन्दुजशुक्रजीवदिनकृत्प्राभाकरीणां समाः ।" इति बृहज्जातकोक्तान्येवायुर्वर्षाणि गृहीतानि । 'दायांशाः स्वगुणैर्हता हि भगणांशाप्ताः समाद्यायुषी" इत्यन्तस्योपपत्तिः (२१) एकविंशतितमश्लोकोपपत्तौ प्रदर्शिता । अथ जैवे युक्तिः—"स्वमतेन किलाहजीवशर्मा ग्रहदायं परमायुषः स्वरांशम्" इति बृहज्जातकवचनेनोच्चस्थे ग्रहे परमायुषः सप्तमांशतुल्यमायुः $\frac{(\text{१२०}|\text{०}|\text{५}|\text{०}|\text{०})}{\text{७}}$ भवति. तत्र (उच्चे) दायांशाः भगणांशतुल्या अत इष्टस्थानेऽनुपातो यदि भगणांशतुल्यदायांशैः परमायुस्सप्तमांशतुल्यमायुस्तदेष्टदायांशैः

$$\text{किमिति}\ \frac{\overset{\text{व. मा. दि.}}{(\text{१२०}|\text{०}|\text{५})}\ \text{दा अं.}}{\text{७}\times\text{३६०}} = \frac{\overset{\text{व.}}{\text{१२०}}\times\text{दा अं}}{\text{७}\times\text{३६०}} + \frac{\overset{\text{दि.}}{\text{५}}\times\text{दा. अं.}}{\text{७}\times\text{३६०}} =$$

$$\overset{\text{व.}}{\frac{\text{दा अं.}}{\text{२१}}} + \overset{\text{घ.}}{\frac{\text{६०}\times\text{५}\times\text{दा अं.}}{\text{७}\times\text{३६०}}} = \overset{\text{व.}}{\frac{\text{दा अं.}}{\text{२१}}} + \overset{\text{घ.}}{\frac{\text{५}\times\text{दा अं.}}{\text{४२}}} = \overset{\text{व.}}{\frac{\text{दा अं.}}{\text{२१}}} + \overset{\text{घ.}}{\frac{\text{दा अं.}}{\text{८}}}$$

स्वल्पान्तरात् । अत उपपन्नं जैवानयनम् । वस्तुतो "लवतः शरघ्नाद् द्विवेदभागाप्तघटीभिरन्वितम्" इति सुन्दरमिश्रोक्तमेव सुष्ठुतरमित्युपपन्नं सर्वम् ॥२३॥

भा०—(१९ । २५ । १६ । १२ । १५ । २१ । २०) ये क्रम से सूर्यादि सात ग्रहों के पिण्डायु में गुणक होते हैं । और निसर्गायु में २०, १, २, ९, १८, २०, ५०, ये क्रम से सूर्यादि ग्रहों के गुणक हैं । ग्रहों के दायांश को अपने अपने गुणक से गुनाकर ३६० के भाग देने से वर्षादिक पिण्डायु, और निसर्गायु होती है । जीवशर्मायु के लिये दायांश को २१ से भाग देकर लब्धि वर्षादि जीवायु होती है । उस में दायांश को ८ से भाग देकर लब्धि घट्यादि को जोड़ देने से वास्तव आयुःप्रमाण होता है ॥ २३ ॥

उ० दी—अथ रवेः पिण्डादित्रिकायुरंशाः ३०२।५७।३८ गोव्जै-१९ गुणिताः ५७५६।१५।०२ भगणांशै ३६० रेभिर्भक्ताः लब्धं वर्षाद्यं पिण्डायुः १५।११।२६।१५।०२ एवं सर्वेषां पिण्डायुः साध्यम् । परं शनिगुर्वोश्चक्रार्धहानिः पूर्ववदेव कार्या (द्र० ६७ चक्रम्) । एवं रवेः पिण्डादित्रिकायुरंशाः ३०२।५७।३८ नैसर्गजेन गुणेना २० नेन गुणिताः

६०५९।१२।४० एते षष्ट्यधिकशतत्रयेण भक्ताः लब्धं वर्षाद्यं १६।०६। २९।१२।४० निसर्गायुरिति (द्र० ६८ चक्रम्)।

अथ रवेः पिण्डादित्रिकायुरंशाः ३०२।५७।३८ स्वर्गेना २१ नेन भक्ताः १४।०५।०३।३६।३४ अष्टभक्तपिण्डादित्रिकायुरंशेना ३७।५२ नेन घट्यादौ युक्ता १४।०५।०४।१४।२६ जाता वर्षाद्यं जीवायुः। परमिदमानयनं स्थूलम्। वास्तविकन्तु "लवतः शरघ्नाद् द्विवेदभागात्तघटीभिराढ्यम्" इति मिश्रोक्त्या, पिण्डादित्रिकायुरंशाः ३०२।५७। ३८ पञ्चगुणिता १५१४।४८।१० द्विचत्वारिंशद्भक्ताः ३६।०४ एभिर्घटीपलैः स्वर्गात्तदायांशवर्षादिकं १४।०५।०३।३६।३४ युक्तम् १४।५।४। १२।३८ जातं जीवायुः (द्र० ६६ चक्रम्)। एवं हानित्रयकृतदायांशेभ्यः (१०२-१०३-१०४) चक्राणि सिद्धयन्तीत्यलं पल्लवितेन ॥२३॥

अथ सिद्धेषु पिण्डादित्रिषु लग्नायुरानयनमाह—

स्याल्लिप्ताः खनखोद्धृता विभतनोर्वर्षादि पैण्डत्रिके
लग्नायुर्निखिलैस्तदंशकसमं कैश्चिद्भतुल्यं स्मृतम्
यस्येशोऽधिबलस्तदेव हि परैस्तेनाढ्यमन्यैर्यदं-
शायुर्वत्त्वथ चांशतुल्यमखिलोक्तं ग्राह्यमेवादिमम् ॥२४॥

व्या०— विभतनो राशीन् विहाय लग्नस्य लिप्ताः खनखोद्धृताः शतद्वयभक्ताः लब्धं पैण्डत्रिके पिण्डादित्रिके लग्नायुः स्यात्। तदंशकसमं निखिलैः सर्वाचार्यैः स्मृतम। कैश्चित् भतुल्यं लग्नभुक्तराशितुल्यं स्मृतम्। परैर्यस्येशो बली तदेव (यद्यंशेशो बली तदंशतुल्यं, राशीशो बली चेद्राशितुल्यं) स्मृतम्। अन्यैरंशायुर्वत् यदायुस्तत्तेन (राशिपतौ बलिनि राशितुल्यायुषा, अंशेशे बलिनि अशतुल्यायुषा) आढ्यं युक्तं कार्यमिति स्मृतम्। अथ चांशतुल्यमिदमखिलोक्तमादिममेव ग्राह्यम् ॥२४॥

अत्रोपपत्तिः-"होरात्वंशप्रतिमम्" आयुर्ददातीति बृहज्जातकोक्त्या लग्नभुक्तनवांशतुल्यमायुः सिद्धयति। अतोऽनुपातो—यदि शतद्वयकलाभिरेको नवांशस्तदेष्टलग्नांशकलाभिः कतीति लग्ननवांशसंख्या = $\frac{\text{लग्नकला} \times १}{२००}$। पुनरनुपातो—यदि एकनवांशेनैकं वर्षं तदा लग्ननवांशैः

किमिति लग्नायुः $=\frac{१ \times \text{लग्नकला}}{१ \times २००}=\frac{\text{लग्नकला}}{२००}$ । अन्यत् स्पष्टमेवा-गममूलत्वात् ॥२४॥

भा०—राशिरहित लग्न के अंशादि की कला बनाकर उसको २०० से भाग देकर लब्धि पिण्डादि त्रिक में लग्न की आयु होती है। इस अंशायु में सब आचार्यों की सम्मति है। कोई लग्नभुक्तराशि तुल्य लग्नायु कहते हैं। कोई राशीश और अंशेश में जो अधिक बली हो तत्तुल्य कहते हैं। कोई अंशायुवत् आयुर्दाय साधन करके उसमें राशीश बली हो तो राशि तुल्य यदि अंशेश बली हो तो नवांश तुल्य वर्ष और जोड़ने से लग्नायु कहते हैं। इसमें प्रथमोक्त अंशायुतुल्य सर्वाचार्यों का सम्मत है इसलिये वही ग्रहण करना चाहिये ॥ २४ ॥

उ० दी—अथ राशिरहितलग्नं लवाद्यम् । १८।३४।४६ अस्य लिप्ताः १११४।४६ द्विशत्या भक्ताः लब्धं पैण्डत्रिके लग्नायुः ५।६।२६। ३४।४८ (द्र० १०२—१०४ चक्राणि) ॥२४॥

अथ चतुर्णामायुषां कतमं कदा ग्राह्यमित्याह—

अंशायुश्च तनाविनेऽधिकबले पैण्डं निसर्गं विधौ
स्याच्चेत्तुल्यबलं द्वयोर्युतिदलं तज्जायुषोश्चेत् त्रयः
त्र्यायुंषि त्रिबलैर्निहत्य च युतिर्वीर्यैक्यहृद्वा त्रिजा-
युर्युत्यास्त्रिलवोऽथ जैवमुदितं चेद्धीनवीर्यास्त्रयः ॥२५॥

व्या०—तनौ अधिकबलायां ("स्त्रियां मूर्तिस्तनुस्तनूः" इत्यमरो-क्तेस्तनुशब्दस्य नित्यस्त्रीलिंगत्वादधिकबलेऽत्र लिंगविपरिणामेनाधि-कबलयामिति तनुविशेषणं ज्ञेयम्) लग्नेऽधिकबलेंऽशायुः साध्यं, इने सूर्येऽधिकबले पैण्डं पिण्डायुस्तथा विधौ चन्द्रेऽधिकबले निसर्गं नैस-र्गिकं साध्यम्। चेद्द्वयोः (लग्नार्कचन्द्राणामन्यतमयोः) तुल्यबलं तदा तज्जायुषोर्युतिदलं ग्राह्यम्। चेत्त्रयः समबलास्तदा त्र्यायुंषि त्रिबलै-र्निहत्य (लग्नबलेनांशायुः, सूर्यबलेन पिण्डायुः, चन्द्रबलेन निसर्गायुः संगुण्य (युतिः (तेषांयोगः) वीर्यैक्यहृत् तदायुर्भवति। वा त्रिजा-युर्युत्यास्त्रिलवस्तृतीयांश आयुर्भवति। अथ चेत्त्रयो हीनवीर्यास्तदा जैवं जीवशर्मायुरुदितं कथितम् ॥२५॥

अत्र युक्तिः—"अंशोद्भवं विलग्नात् पैण्डं भानोर्निसर्गजं चन्द्रात्। एतेषां यो बलवानेकतमं तस्य चिन्तयेदायुः ॥ लग्नदिवाकरचन्द्रा-

स्त्रयोऽपि बलरिक्ततां यदा यान्ति। परमायुषः स्वरांशं ददति खगा जीवशर्मोक्तम्॥" इति सारावलीवचनेन बलवशादायुर्ग्रहणं यदुक्तं तद्युक्तम्। यदि द्वौ तुल्यबलौ तदा बलद्वयवशादायुर्द्वये प्राप्ते सत्येकतरायुरवलम्बनं न समुचितमित्येवायुर्द्वययोगार्धं ग्राह्यमिति पर्यवसितम्। परमत्र तत्तद्बलवशात्प्राप्तेर्द्वयोर्बलयोरेकाकारतायां तत्तदायुषोऽर्धमयुक्तं विलक्षणयोर्द्वयोर्बलयोरेकाकारता योगार्धे विश्रान्ता। अतस्तत्स्फुटतार्थमनुपातः—यदि बलद्वययोगार्धेनैतदायुरर्धं लभ्यते तदायुःप्रापकैतद्बलेन किमिति $= \frac{\text{आ}}{२} \times \frac{\text{इब}}{\text{बयो}\frac{१}{२}} = \frac{\text{आ} \times \text{इब}}{\text{बयो}}$। एवं द्वितीयस्य $\frac{\text{आ}' \times \text{इब}'}{\text{बयो}}$। अनयोर्योगः $= \frac{\text{आ} \times \text{इब} + \text{आ}' \times \text{इब}'}{\text{बयो}} =$ वास्तवायुः। एवं त्रिषु तुल्यबलेषु तत्तदायुस्तत्तद्बलेन संगुण्य तद्योगं बलत्रययोगेन भजेल्लब्धं मिश्रायुः स्यादित्युपपन्नम्। अत्र बलतुल्यता हीनत्वं मध्यत्वमधिकत्वमादाय मन्तव्या। न च विषष्ट्यंशपर्यन्तबलसमत्वं ग्राह्यम्। विशेषार्थं (१०६) चक्राधस्स्थगद्यं विलोक्यम्॥२५॥

भा०—लग्न, सूर्य और चन्द्रमा इन तीनों में यदि लग्न अधिकबल हो तो अंशायु, यदि सूर्य अधिक बल हो तो पिण्डायु, यदि चन्द्रमा अधिक बल हो तो निसर्गायु ग्रहण करना चाहिये। यदि इनमें किसी दो का बल तुल्य हो तो दोनों की आयु के योगार्ध आयु ग्रहण करना चाहिये (अर्थात् लग्न रवि तुल्य बल हो तो अंशायु पिण्डायु के योगार्ध, यदि लग्न चन्द्र तुल्य बल हों तो अंशायु निसर्गायु के योगार्ध, और रवि चन्द्र तुल्य बल हो तो पिण्डायु निसर्गायु के योगार्ध करना) यदि लग्न, रवि, चन्द्र, ये तीनों तुल्य बल हो तो तीनों आयु को अपने २ बल से गुना कर सबका योग कर उसमें तीनों के बल के योग से भाग देकर जो लब्धि हो अथवा तीनों आयु के योग का तृतीयांश आयु ग्रहण करना चाहिये। यदि तीनों हीन बल हो तो जीवशर्मोक्त आयु ग्रहण करना। यहाँ बल की तुल्यता में यदि दोनों अधिकबल हो अथवा दोनों मध्य बल हो तो तुल्य बल समझे जाते हैं॥२५॥

उ० दी—अथात्रोदाहरणे लग्नचन्द्रयोर्बलं षड्रूपाधिकमतो लग्नबलघ्नदिनीकृतांशायुषश्चन्द्रबलघ्नदिनीकृतनिसर्गायुषश्च योगः तयोर्बलयोगेन भक्तः तदा मिश्रायुः स्यादिति। तद्यथा रवेर्दिनीकृतांशायुः ३०३१।४२।३६ इदं लग्नबलेना ८।०१।३७ नेन गुणितम् २४३३५।२२।०४ एवं सर्वेषां (द्र० १०५ चक्रम्)। एवं रवेर्दिनीकृतनिसर्गायुः

४०३६।२८।२७ चन्द्रबलेना ७।४८।१८ नेन गुणितम् ३१५२८।०५।४५ एवं सर्वेषाम् (द्र० १०६ चक्रम्)। अथ लग्नबलघ्नदिनीकृतांशायुषश्चन्द्रबलघ्नदिनीकृतनिसर्गायुषश्च योगः ५५८६३।२७।४६ सवर्णितः २०११०८४६६ एवं सर्वेषाम् (द्र० १०७ चक्रम्)। अयं लग्नचन्द्रयोर्बलयोगेना १५।४६।५५ नेन सवर्णितेन ५६६६५ भक्तः ३५।२८।३१। ४२ इदं दिनादिमिश्रायुः (द्र० १०६ चक्रम्) ॥२५॥

अथ हीनबलत्वादिलक्षणं तथांशायुषो बहुसंमतत्वं तथा केषामिदमायुर्घटत इत्याह—

त्र्यल्पे हीनबलो बली षडधिके वीर्ये ग्रहश्चोदयो
भिन्नं स्वस्वमते स्मृतायुरिति यत्प्राज्ञैर्व्यवस्थापितम्।
अंशायुर्बहुसम्मतं भवति यत्सत्यं च सत्योदितं
स्याद्धर्मिष्ठसुशीलपथ्यसुभुजां न स्यादिदं पापिनाम् ॥२६॥

व्या०—त्र्यल्पे रूपत्रयाल्पे वीर्ये सति ग्रह उदयो लग्नं च हीनबलः स्यात्। षडधिके षड्रूपाधिके वीर्ये बली। त्र्यधिके षडल्पे च बले मध्यबल इत्यर्थत एव सिद्धयति। इति स्मृतायुः प्राज्ञैः स्वस्वमते भिन्नं यद् व्यवस्थापितं तत्र सत्योदितं सत्याचार्योक्तमंशायुर्बहुसम्मतं स्यात्। इदमायुः धर्मिष्ठसुशीलपथ्यसुभुजां जनानां सत्यं स्यात्। न पापिनाम्। पापिनां न घटते इत्यर्थः ॥२६॥

अत्र युक्तिः—बलानि षडेव सन्ति तत्र प्रत्येकं यदि पूर्णात्मकं रूपतुल्यं गृह्यते तदा षड्रूपाणि भवन्त्यतः षड्रूपबलवान् सम्पूर्णबलोपपन्नो बली स्यादिति समुचितेमेव। तथा षड्रूपाधःसंनिहितं मध्यबलः षड्रूपाणामधः सांनिध्यं तदर्धात्मकरूपत्रयपर्यन्तम्। मध्यबलाधःसंनिहिते रूपत्रयाल्पे हीनबलत्वमित्यपि युक्तमेवेत्यलं पल्लवितेन। तथा च पापकर्मणाऽऽयुःक्षयत्वात्स्वस्वधर्मनिष्ठेष्वेव तत्सत्यता भवितुमर्हतीति ॥२६॥

भा०—ग्रह अथवा लग्न का षड्बल रूपत्रय ३ से अल्प हो तो हीन बली यदि ६ से अधिक हो तो बली होता है। यहाँ ३ से अधिक, और ६ से अल्प जिसका षड्बल हो वह मध्य बली अर्थ से ही सिद्ध होता है। पूर्वोक्त चतुर्विध आयु आचार्यों ने अपने अपने मत से भिन्न भिन्न कही है उनमें सत्याचार्योक्त अंशायु बहुत आचार्यों से स्वीकृत और सत्य होती है। यह आयु धर्मिष्ठ, सुशील और

पथ्य भोजनादि करने वालों को सम्पूर्ण मिलती है। पापियों को पूरी आयु नहीं होती है ॥२६॥

उ० दी—स्पष्टम् ॥ २६ ॥

अथ शिष्यसन्देहनिराकरणार्थमाह—

हानिर्याऽस्तमितेऽरिभेऽप्यनुमताऽंशोत्थेऽल्पबुद्ध्या न तद्
यस्माच्चैष्टिक आश्रयेऽस्ति निखिलैः पिण्डादिषूक्ता ततः।
आयुः सौरमिदं यतोऽब्दगणना सौरात्ततः सूरिभिः
प्रोक्तं सत्यमसद्यदल्पकथितं नाक्षत्रकं सावनम् ॥२७॥

व्या०—अस्तमेतिऽरिभे ग्रहे या हानिः "स्वोच्चोनो द्युचर" इत्यादिनाऽर्धत्र्यंशतुल्या कथिता सा केनचिदाचार्येणांशोत्थे अंशायुर्दायेऽल्पबुद्ध्याऽनुमता स्वीकृता, तन्न, तन्मतं न समीचीनमित्यर्थः। यस्मात् सा हानिश्चैष्टिके, आश्रये गुणकेऽस्ति; ततो निखिलैः सर्वैः पिण्डादिषूक्ता न चांशायुषीत्यर्थः। इदमायुः (वर्षादि) सौरं स्यात् यतोब्दगणना सौराद् भवति। यथोक्तं भास्करेण—"वर्षायनर्तुयुगपूर्वकमत्र सौरात्" इति। ततः सूरिभिः प्रोक्तं सौरं सत्। अल्पकथितं तुच्छजनेन कथितं यन्नाक्षत्रं सावनं वा तदसत् ॥२७॥

अत्र युक्तिः सुगमागममूलैव ॥ २७ ॥

भा०—अस्तमें, अर्धहानि, और शत्रुगृह में त्र्यंशहानि जो कही गई है उसको कोई २ अल्प बुद्धि वाले अंशायु में भी मान लिये हैं किन्तु यह ठीक नहीं है। क्योंकि अर्धत्र्यंशहानि चेष्टा गुणक और आश्रय गुणक में है इसलिये सब आचार्य पिण्डादित्रिकायु में कहे हैं अंशायु में नहीं। और यह आयु वर्षादि सौर होता है। क्योंकि वर्ष की गणना सौर से ही होती है। इसलिये जो आचार्य सौर मानसे आयु कहे हैं वह सत्य (माननीय) है। और जो अल्पज्ञ नाक्षत्र अथवा सावन मानसे कहे हैं वह असत् (मानने योग्य नहीं) है ॥ २७ ॥

उ० दी—स्पष्टम् ॥ २७ ॥

अथ प्राणिनां परमाःपुरस्सरं मनुष्येतरायुरानयनमाह—

पश्चाहं नखभूसमा नृकरिणां व्याघ्राद्यजादेर्नृपा
गोकाल्योश्च जिनास्तथोष्ट्रखरयोस्तत्त्वानि सूर्याः शुनाम्।

अश्वायुः परमं रदा नृवदिहानीयायुरेषां परा-
युर्निघ्नं नृपरायुषा च विहृतं तेषां स्फुटायुर्भवेत् ॥२८॥

व्या०—पञ्चाहं नखभूसमाः (पञ्चदिनाधिकविंशत्यधिकशत-वर्षाणि) नृकरिणां (मनुष्याणां गजानां च) परममायुः स्मृतम् । व्याघ्राद्यजादेर्नृपाः षोडश वर्षाणि, गोकाल्योर्गोमहिष्योर्जिनाश्चतु-र्विंशतिः, तथोष्ट्रखरयोः तत्त्वानि पञ्चविंशतिः, शुनां कुक्कुराणां सूर्या द्वादश, परमं अश्वायू रदा द्वात्रिंशत् समा वर्षाणि परमायुः स्मृतम् । अथैषां स्फुटायुःसाधनम्—नृवदिति । इहैषां व्याघ्रादीनां नृवत् मनुष्यायुर्वदायुरानीय तेषां परायुर्निघ्नं नृपरायुषा विहृतं तेषां स्फुटायुर्भवेत् ॥ २८ ॥

अत्रोपपत्तिः—परमायुषि तु प्रत्यक्षमुपलब्धिरेव प्रमाणम् । मनुष्यपरमायुषा मनुष्यवदानीतमश्वादीनामायुर्लभ्यते तदा स्वस्व-परमायुषा किमिति तत्तत्स्फुटायुःस्यादेवेत्युपपन्नम् ॥ २८ ॥

भा०—एक सौ बीस १२० वर्ष पाँच दिन मनुष्य और हस्ती की परमायु, तथा व्याघ्र मेढ़ा आदि की १६ वर्ष, गाए और भैंस की २४ वर्ष, ऊँट और गदहे की २५ वर्ष, तथा कुत्ते की १२ वर्ष, घोड़े की ३२ वर्ष परमायु होती है । घोड़े आदि की भी मनुष्यवत् आयु साधन करके उसको अपनी अपनी परमायु से गुना कर मनुष्य की परमायु से भाग देकर लब्ध वर्षादि अपनी अपनी स्फुटायु होती है ॥ २८ ॥

उ० दी०—व्याख्यावलोकनेनैव सुगमम्पद्यम् ॥ २८ ॥

अथ दशाध्यायः ।

तत्रादौ दशास्वरूपं तच्छुभाशुभफलं चाह—

यस्यायुर्यदसौ दशास्य च शुभेष्टोच्चस्वभांशे तथाऽऽ-
रोहा नीचपरिच्युतस्य यदि सा कष्टारिनीचांशभे ।
त्यक्तोच्चे त्ववरोहिणी भवति सा मध्योच्चमित्रस्वभां-
शे सद्दृष्टयुतस्फुरत्करबलिष्ठेष्टाधिके स्याच्छुभा ॥२९॥

व्या०—यस्य ग्रहस्य यदायुरसौ अस्य ग्रहस्य दशा भवति ।

इष्टोच्चस्वभांशे (मित्रस्योच्चस्य, स्वस्य वा भांशे राशौ नवांशे वा) स्थितस्य ग्रहस्य दशा शुभा भवति। तथा नीचपरिच्युतस्य ग्रहस्य दशा आरोहा शुभफला भवति। यदि नीचपरिच्युतो ग्रहोऽरिनीचांशभे स्थितस्तदा साऽऽरोहा दशापि कष्टा स्यात् (मिश्रफलदा भवतीत्यर्थः)। त्यक्तोच्चे (उच्चं त्यक्त्वाऽग्रस्थे) ग्रहे त्ववरोहिणी अशुभफलदा दशा स्यात् त्यक्तोच्चे ग्रहे मित्रस्वभांशे स्थिते सावरोहादशापि मध्या मिश्रफलदा भवति। सद्दृष्टेष्टयुतस्फुरत्करवलिष्टेष्टाधिके त्यक्तोच्चे ग्रहे सति सावरोहिणी दशापि शुभा स्यादिति ॥२९॥

अत्र युक्तिः सुगमाऽऽगगमूला च ॥२९॥

भा० – जिस ग्रह की जितनी आयु है उतनी ही उसकी दशा होती है। यदि ग्रह मित्र की राशि वा नवांश में हो अथवा अपनी राशि वा नवांश में हो किंवा अपनी उच्च राशि में वा उच्चराशि के नवांश में हो तो दशा शुभफल देने वाली होती है। यदि ग्रह अपनी नीच राशि को छोड़कर आगे हो तो (उच्चाभिमुख होने के कारण) उसकी दशा आरोहिणी (शुभफलदात्री) होती है। यदि नीचच्युत ग्रह शत्रु नीच राशि वा नवांश में हो तो आरोहा दशा भी अशुभ फल देती है। यदि ग्रह उच्च राशि को छोड़ कर नीचाभिमुख हो तो उसकी अवरोहिणी (अशुभफला) दशा होती है। यदि त्यक्तोच्चग्रह उच्च, मित्र राशि नवांश में वा अपनी राशि वा नवांश में हो तो मिश्र फल देती है। यदि त्यक्तोच्चग्रह शुभ ग्रह से दृष्ट, युत हो वा देदीप्यमान किरण तथा इष्ट अधिक हो तो अवरोहिणी दशा भी शुभ होती है ॥२९॥

उ० दी—अथात्र यस्य ग्रहस्य यदायुर्वर्षाद्यं तदेव दशावर्षाद्यं भवति (द्र० ११३ चक्रम्)। अत्र दशाक्रमो वक्ष्यमाणप्रकारेणैव ज्ञेय इति ॥२९॥

अथ दशाक्रममाह—

स्यादाद्या हि दशाधिकौजस इहाङ्गार्काब्जकानां तत-
स्तत्केन्द्रादियुजामथ द्विबहवो वीर्यक्रमेणैव हि।
चेदोजःसमतायुषोधिकतयायुस्तुल्यता चेद्दशा
मौढ्यात् स्यादुदितक्रमात्क्रमविधौ वीर्यं हि तत्रोच्यते ॥३०॥

व्या०—इहात्र अङ्गार्काब्जकानां लग्नरविचन्द्राणां मध्येऽधिकौजसोऽधिकबलस्याद्या प्रथमा दशा स्यात्। लग्नार्कचन्द्राणां द्वयोस्त्र-

याणां वा चेदोजःसमता बलसाम्यं तदाऽऽयुषोऽधिकतया (यस्यायुर्वर्षाण्यधिकानि तस्य) प्रथमा दशा ज्ञेया। आयुस्तुल्यताऽपि चेत्तदा पूर्वपठितानां प्रथमा दशा भवितुमर्हति। यथा—लग्नार्कयोर्बलायुषोः साम्ये पूर्वपठितत्वात् प्रथमा लग्नस्य, एवं लग्नचन्द्रयोरप्याद्या लग्नस्यैव। तथार्कचन्द्रयोर्बलायुषोः सम्ये प्रथमं पठितत्वात् सूर्यस्यैवाद्या दशा स्यात्। कुत्रचित् पुस्तके 'इहार्केन्दूदयानाम्" इति पाठो दृश्यते तदसङ्गतम्। सर्वेषु जातकग्रन्थेषु "लग्नार्कचन्द्राणामिति" क्रमस्यैव पठितत्वात्। ततोऽनन्तरं तत्केन्द्रादियुजां लग्नार्कचन्द्राणां यस्याद्या दशा तस्मात् केन्द्रपणफरापोक्लिमस्थितानां ग्रहाणां दशा भवन्ति। पूर्वं केन्द्रस्थस्यानन्तरं पणफरस्थस्य तत आपोक्लिमस्थस्य दशा भवतीत्यर्थः। इहास्मिन् केन्द्रादौ चेद् द्विबहवो द्वित्र्यादयो ग्रहा भवेयुस्तदा वीर्यक्रमेणैव दशा ज्ञेया। यस्य वक्ष्यमाणं वीर्यमधिकं तस्य प्रथमा दशा ततस्तदल्पबलस्य ततोऽपि तदल्पबलस्येत्यर्थः। चेदोजःसमता तदा आयुषोऽधिकतया (यस्य ग्रहस्यायुरधिकं तस्याद्या दशा ततो तदल्पायुष इति) चेदायुस्तुल्यतापि स्यात् तदा मौढ्यात् सूर्यसांनिध्येनास्तमयात् उदितक्रमात् दशा ज्ञेया तत्र क्रमविधौ वीर्यं बलमुच्यते ॥३०॥

अत्रापि युक्तावागम एव प्रमाणम् ॥३०॥

भा०—लग्न, रवि और चन्द्रमा इनमें जो अधिक बली हो उसकी प्रथम दशा होती है। यदि लग्न रवि चन्द्र इन तीनों के वा दो के बल तुल्य हो तो जिसका दशावर्ष अधिक हो उसकी प्रथम दशा होती है। दशा वर्ष में भी समता हो तो श्लोक पाठक्रम में जो पूर्व पठित है उसकी दशा प्रथम होती है। इस प्रकार जिसकी प्रथम दशा सिद्ध हो अनन्तर उस ग्रह से केन्द्रस्थित ग्रह की, तदनन्तर पणफरस्थ ग्रह की, बाद आपोक्लिमस्थ ग्रह की दशा होती है। यदि केन्द्रादि स्थान में दो अथवा दो से अधिक ग्रह हों तो उनमें जो अधिक बली हो उसकी प्रथम दशा, यदि बल में तुल्यता हो तो अधिक वर्ष वाले की, यदि वर्ष में भी तुल्यता हो तो सूर्य सांनिध्य से अस्त होकर जिसका प्रथम उदय हुआ हो उसकी प्रथम दशा होती है। अब आगे श्लोक में दशाक्रम में बल को कहते हैं ॥३०॥

उ० टी—अथात्र दशाक्रमज्ञानं ११२ — ११३ चक्रसम्बन्धिगद्यपद्यावलोकनेनैव स्फुटं भवति किं वृथाविस्तरेणेति ॥३०॥

अथ दशाक्रमबलं तथा रिष्टकररिष्टहरबलं चाह—

चेल्लग्नाद्यदशा स्वभावजफलघ्नौजांसि पाकक्रमे-
ऽर्केन्द्वोश्चेत्प्रथमा खगोदयबलांघ्रिर्भेऽन्यवर्गेऽर्धितः।
स्वैर्वर्गेशबलैर्हता बलमिहैक्यं मूलितैक्यं परे-
ऽथैवं रिष्टदभंक्तृजे बहुबलो भङ्क्ता तदा रिष्टहृत्॥३१॥

व्या०—चेद् यदि लग्नाद्यदशा स्यात् तदा स्वभावजफलघ्नौजांसि पूर्वसाधितस्वभावफलेन गुणितानि षड्दलैक्यानि पाकक्रमे दशाक्रमे बलानि भवन्ति। चेदर्केन्द्वोः प्रथमा दशा स्यात् तदा खगोदयबलांघ्रिर्ग्रहाणां लग्नस्य च षड्बलैक्यचतुर्थांशः भे गृहे स्थाप्यः। अन्यवर्गे होरादौ स चतुर्थांशोऽर्धितः स्थाप्यः। ते स्थापितांकाः स्वैर्वर्गेशबलैर्हतास्तेषां एक्यं इह पापक्रमे बलं भवति। परेऽन्ये मूलितैक्यं मूलितं च तदैक्यमिति बलं वदन्ति। अथैवं रिष्टदभंक्तृजे रिष्टकररिष्टहरयोर्बले साध्ये तत्र भंक्ता रिष्टभंक्ता चेद्बहुबलस्तदा रिष्टहृत रिष्टनाशको भवति॥३१॥

अत्रोपपत्तिः—तत्र बलेन दशाक्रमविचारे समभावफलेषु सर्वेषु ग्रहेषु यस्याधिकं बलं तस्य पूर्वं ततस्तदल्पबलस्य ग्रहस्य दशेति यथास्थितबलेन निर्णयः। तत्र रूपतुल्यं समभावफलं प्रकल्प्यानुपातः—यदि सकलग्रहाणां रूपतुल्ये समभावफले ग्रहस्थे तद्बलतुल्यं बलं लभ्यते तदेष्टभावफले किमिति लब्धं दशाक्रमबलम्

$$= \frac{\text{ग्रब} \times \text{इभाफ}}{१}।$$

अथ रविचन्द्रयोश्चेदाद्या दशा तदा तत्र 'होरादिवर्गाद् द्विगुणं गृहं यत्" इति यवनवाक्येन राशेर्द्विवर्गात्मकत्वादष्टौ तुल्यवर्गास्तत्र रिष्टकररिष्टहरयोर्ग्रहयोर्बलं अष्टसु स्थानेषु स्थाप्यमत्र स्थानद्वयं गृहसम्बन्धि, स्थानषट्कं च होरादिसम्बन्धिकम्। अत्रापि सुगमार्थमेकक्रमलाभार्थमष्टतुल्यं समबलं प्रकल्प्यानुपातो यदि राशीशस्याष्टतुल्ये समबले राशिस्थग्रहोदयबलतुल्यबलं लभ्यते तदेष्टराशीशबले किमिति दशाक्रमबलम् $= \frac{\text{ग्रहोदय ब०} \times \text{राशीश ब०}}{८}$।

* बहुषु पुस्तकेषु "भंक्तृजेऽधिकबले" इति प्रामादिकपाठोऽनभिज्ञैः प्रक्षिप्तः।

इदं द्विगुणितं राशिस्थानीयबलम् = $\frac{\text{ग्रहोदयब॰} \times \text{राशीशब॰}}{४}$ ।

गृहाद् होरादेरर्धमितत्वा "दन्यवर्गेऽर्धित" इत्युक्तम्। ततश्चैषामैक्यं सर्वबलमित्यपि समुचितम्। तथा च यद्बलमधिकं तन्मूलमप्यधिकमेवेति सर्वबलस्य मूलग्रहणेऽपि न कापि हानिः। यत्तु मूलितानमैक्यं (प्रत्येकं मूलमादाय तदैक्यं) बलमिति कैश्चिद् व्याख्यातं तन्निर्मूलत्वादसङ्गतमिति सुधीभिर्विभाव्यम्। अन्यत्स्पष्टमेव ॥३१॥

भा॰—यदि लग्न की प्रथम दशा हो तो स्व स्व भावफल से ग्रहके षड्बलैक्य को गुना करने से दशाक्रम में बल होता है। यदि रवि अथवा चन्द्रमा की प्रथम दशा हो तो ग्रह तथा लग्नके षड्बलैक्य का चतुर्थांश करना उसको गृहस्थान में लिखना, तथा उसीका आधा होरादि षड्वर्ग में लिखना फिर उन सबको अपने वर्गेश के बलसे गुना करके सबका योग करना तो दशाक्रम में बल होता है। कोई आचार्य योग के मूल लेकर दशाक्रम में बल मानते हैं। कोई प्रत्येक का अलग अलग मूल लेकर उनके योगको दशाक्रम में बल मानते हैं किन्तु वह युक्तिशून्य मालुम होता है। इसलिये सबका योग अथवा सर्वयोग का मूल ही वास्तव बल है। इस प्रकार रिष्टकर, रिष्टहर दोनों ग्रहके बल साधन करे। यदि रिष्टहर अधिक बली हो तो रिष्टभंग करता है ॥३१॥

उ॰ दी—अथात्रोदाहरणे लग्नबलाधिकत्वाल्लग्नस्यैव प्रथमा दशा तेनात्र स्वस्वग्रहभावजफलेन (१० चक्रस्थेन) ग्रहस्य स्वानि स्वानि षड्बलैक्यानि गुणितानि दशाक्रमबलानि भवन्ति। तद्यथा— रवेर्भावफलेना ००।२८।३३ नेन रवेः षड्बलैक्यं ५।४६।२५ गुणितं जातं रवेर्दशाक्रमबलम् २।४४।५० एवं सर्वेषां ग्रहाणां साध्यम् (द्र॰ ११२ चक्रम्)।

अथ रिष्टकरहरस्योदाहरणम्—रवेः षड्बलैक्यम् ५।४६।२५ एतदंघ्रिः १।२६।३६ रविः शनिगृहे वर्त्तते तेन शनिषड्बलैक्येना ६।१२।५२ नेन गुणितः (१।२६।३६) × (६।१२।५२) = ८।५८।१० इदं रवेर्गृहसम्बंधिरिष्टकरहरबलम्। एवञ्च होरायां रविबलांघ्र्यर्धम् ००।४३।१८ रविः स्वहोरायां वर्त्ततेऽतः स्वबलेना ५।४६।२५ नेन गुणितम् (००।४३।१८) × (५।४६।२५) =४।१०।०० इदं होरासम्बन्धिरिष्टकरहरबलम्। एवं द्रेष्काणादौ बलांघ्र्यर्धं द्रेष्काणादिस्वामिबलेन निघ्नं स्वस्वबलं ज्ञेयम्। तत्र

गृहादिबलानां योगः योगबलं भवति (द्र० १११ चक्रम्) 'मूलितैक्यं परे" एतदर्थमेतच्चक्राधो गद्यपद्यमवलोक्यमिति ॥ ३१ ॥ *

अथ रिष्टकरहरग्रहयोर्बलसाम्ये निर्णयमाह—

भङ्क्तू रिष्टकृतो हिताहितशुभासत्त्वं च नीचोच्चभा-
स्ताद्यस्याश्रयतां विचार्य मतिमान् रिष्टस्य भङ्गं वदेत् ।
श्रेष्ठं रिष्टहृतौ दशाक्रम इहौजः श्रीधराद्योदितं
कष्टेष्टघ्नबलान्तरात्क्व च कृतं तद्युक्तिशून्यं त्वसत् ॥३२॥

व्या०—भङ्क्तू रिष्टभंगकरस्य, रिष्टकृतो रिष्टकरस्य चेति ग्रहद्वयस्यापि हिताहितशुभासत्त्वं (हितमिष्टमहितं कष्टं शुभत्वमशुभत्वं) च पुनर्नीचोच्चभास्ताद्यस्य सकलस्याप्याश्रयतां विचार्य मतिमान् रिष्टस्य भंगं वदेत् । इहात्र रिष्टहृतौ दशाक्रमे श्रीधराद्योदितमोजो बलं श्रेष्ठम् । क्व च कुत्रापि (श्रीपत्यादिपद्धतौ) कष्टेष्टघ्नबलान्तरात् दशाक्रमबलं कृतं तद् युक्तिशून्यमसच्च ज्ञेयमिति ॥ ३२ ॥

अत्र श्रीधराद्योदितबलस्य श्रेष्ठत्वं, श्रीपत्याद्योदितबलस्य युक्तिशून्यत्वमसत्त्वं चोदाहरणदीपिकायां स्फुटं प्रदर्शितमलमत्र लेखप्रपञ्चेनेति ॥ ३२ ॥

---

* अत्र प्रसङ्गाच्छ्रीपतीयरिष्टकरहरचक्रस्योदाहरणम् । तत्र तावत्तदानयनपद्यम् ।

"यच्छुभाशुभबलान्तराद्बलं रिष्टभंगकरखेटयोः पुनः ।
सैकवर्गदलहृद्भसंज्ञकं तद्दलं भवति शेषवर्गजम् ॥ १ ॥
भादिवर्गपतिवीर्यसंगुणं जायते बलमरिष्टकारिणः ।
रिष्टभंक्तुरपि सप्तवर्गजं तद्धि सर्वबलसंयुतिस्तयोः ॥ २ ॥

अथात्रेष्टगुणितं रवेः षड्बलैक्यम् ०२ । ४९ । ५० तथा कष्टगुणितश्च २ । ३७ । ०३ अनयोरन्तरम् ०० । १२ । ४७ चतुर्भक्तं ०० । ०३ । १२ इदं गृहकोष्टके भसंज्ञकं जातम् । एतदर्धम् ०० । ०१ । ३६ होरादिषड्वर्गेषु भसंज्ञकं ज्ञेयम् । अथ गृहकोष्ठस्यभसंज्ञकं ०० । ३ । १२ गृहस्वामिषड्बलेना ६ । १२ । ५२ नेन गुणितं जातं ०० । १९ । ५३ एवं होराकोष्ठस्थभसंज्ञकं ०० । १ । ३६ होरास्वामिबलेना ५ । ४६ । २५ नेन गुणितं ०० । ०९ । १४ एवं स्वस्वभसंज्ञकं स्वस्वस्वामिबलेन गुणितं स्वस्वकोष्ठके लेख्यम् । तेषां गृहादिकोष्ठस्थानां योगः १ । २४ । ५९ इदं रवेःरिष्टकरहरबलम् । एवं सर्वेषां (द्र० ११० चक्रम्) ।

भा०—रिष्टकर और रिष्टहर दोनों ग्रहों के इष्ट, कष्ट, शुभत्व, अशुभत्व तथा नीच, उच्चराशि, अस्त, आदि शब्द से मूल त्रिकोण, अधिमित्र, मित्र, सम, शत्रु, अधिशत्रु की राशि और जय, पराजय के आश्रयत्व विचार करके मतिमान् रिष्टभंग कहे। यहाँ रिष्टभंग में और दशाक्रम में श्रीधर आदि से कथित ग्रहादिकों का बल श्रेष्ठ है। श्रीपति आदि किसी किसी आचार्यों के ग्रन्थ में कष्ट इष्ट से गुणित षड्बलैक्य के अन्तर पर से बल साधन किया है वह युक्तिशून्य और असत् है ॥ ३२ ॥

उ०दी — अत्र श्रीपत्याद्युक्तबलस्यासङ्गतत्वमुक्तं तद्यथा — रिष्टकर्तुर्वा रिष्टहर्तुर्ग्रहस्य बलपरिपूर्णस्य यदि उच्चबलं रूपार्धं ००।३० चेष्टाबलञ्च रूपार्धं ००।३० तदा इष्टं कष्टं सममेव ०।३० तदेष्टकष्टबलसाम्यात्तदन्तरबलं शून्यं स्यात्। तदा षड्बलपूर्णोऽपि ग्रहः शुभाशुभबलान्तरात्साधितबलेन शून्यबलः श्रीपतिमते रिष्टकर्त्ता रिष्टहर्त्ता वा न भवति। न चैतद्युक्तम्। तथान्या युक्तिः—यत्रोच्चबलं शून्यं चेष्टाबलञ्च शून्यं तदेष्टं शून्यं कष्टं रूपं स्यात्। तदा इष्टबलं शून्यं कष्टबलं यथावत्स्यात्। तदा शुभाशुभबलान्तराद्बलमिति कष्टबलशेषाद्बलमुत्पद्यते। तदा तद्बलाधिकोरिष्टहर्त्ता अस्तं गतो नीचगतश्च कथमरिष्टं हरति। अतश्च यच्छुभाशुभबलान्तराद्बलमिति कृतं तत्सर्वथैवायुक्तमुक्तमिति सुधीभिर्भृशं विचिन्त्यम् ॥ ३२ ॥

अथान्तर्दशाक्रममाह—

अर्धस्यैकभगस्त्रिकोणगृहगस्त्र्यंशस्य चास्ते नगां—
शस्यांघ्रेश्चतुरस्रगो निजगुणैः पक्तैकभे स्याद्बली ।
अंशादौ कुरु रूपमत्र समतां कृत्वा च नाशं छिदा-
मंशघ्नाः स्वदशाः पृथक् खलु लवैक्याप्ताः स्युरन्तर्दशाः ॥ ३३॥

व्या०—मूलदशापतेरेकभग एकराशिगतो ग्रहो लग्नं वाऽर्धस्य दशापतिदत्तदशार्धस्य निजगुणैरारोहावरोहोच्चनीचादिभिः पक्ता पाचको भवति। त्रिकोणगृहगः पञ्चमनवमस्थानगतो ग्रहस्त्र्यंशस्य, अस्ते सप्तमस्थानस्थितो ग्रहो नगांशस्य सप्तमांशस्य, चतुरस्रगश्चतुर्थाष्टमस्थानस्थोऽङ्घ्रेश्चतुर्थांशस्य पाचको भवति। एकभे एकराशौ द्वौ, बहवो वा ग्रहाश्चेत्तदा तन्मध्ये यो बली सर्वतो बलाधिकः स (निजगुणैरर्धत्र्यंशादिरूपैरारोहावरोहादिभिश्च) एक एव ग्रहः पक्ता

(अन्तर्दशापाचकः) भवति। अत्रांशादौ रूपं (१) कुरु, च पुनश्छिदां छेदानां समतां कृत्वा नाशं कुरु, ततः स्वदशाः पृथक् पृथगंशघ्ना लवैक्ययाप्ता अंशयोगेन भक्ता अन्तर्दशाः स्युरित्यर्थ ॥३३॥

अत्रोपपत्तिः– येऽर्धत्र्यंशाद्यन्तर्दशानां पाचकास्तेषां सर्वेषामन्तर्दशायोगो दशाब्दतुल्य एव। तस्मात्सर्वांशयोगेन दशाब्दतुल्यान्तर्दशा भवितुमर्हति। तत्र "योगोन्तरं तुल्यहरांशकानाम्" इत्युक्तेः समच्छेदविधानं कृत्वैव योगोऽन्तरं वा कार्यमिति। यथाऽत्र क्रमेण दशापत्यादीनामंशाः $\frac{१}{१}$। $\frac{१}{२}$। $\frac{१}{३}$। $\frac{१}{७}$। $\frac{१}{४}$ समच्छेदीकृता यदि $\frac{अं}{ह}$। $\frac{अं'}{ह}$। $\frac{अं''}{ह}$। $\frac{अं'''}{ह}$

एषांयोगः $\frac{अंयो}{ह}$ अतोऽनुपातो यदि सर्वांशयोगेना ($\frac{अयो}{ह}$) नेन दशातुल्यान्तर्दशा लभ्यते तदा पृथक् पृथगंशेन किमिति $= \frac{दशा \times अं}{\frac{अयो.ह}{ह}}$

$= \frac{दशा \times अँ}{अंयो}$ एवं पृथक पृथगन्तर्दशामानं स्यात्। अत उपपन्नम्। शेषयुक्तिः स्फुटैव ॥३३॥

भा०—दशापति के साथ (एक राशि) में रहनेवाला ग्रह मूल दशा के आधे का पाचक (अन्तर्दशा पति) होता है। दशापति से त्रिकोण ५।९। में रहने वाला दशा के तृतीयांश का पाचक होता है। सप्तम ७ स्थान में रहनेवाला सप्तमांश का, चतुरस्र (४।८) में रहनेवाला चतुर्थांश का पाचक होता है। सब ग्रह अपने अपने गुण (आरोहावरोह उच्च नीच आदि) के अनुसार शुभाशुभ फल का पाचक होता है। यदि एक राशि में अधिक ग्रह हो तो उन में जो सब से बली हो वही एक अपने गुणानुसार अन्तर्दशा पाचक होता है। यहाँ प्रत्येक अन्तर्दशा पाचक के अंशस्थान में रूप (१) लिखकर यथा प्राप्त अर्धत्र्यंशादि लिखे। फिर सब का समच्छेद करके छेदों को त्याग कर दे। फिर मूलदशापति की दशा को पृथक् पृथक् अंश से गुना करके सब अंशों के योग से भाग देने से लब्धि पृथक् पृथक् अन्तर्दशा होती है॥ ३३॥

अन्तर्दशाक्रम—

प्रथम दशापति को अन्तदशा फिर पठितक्रमस्थानस्थित ग्रहको दशा होती है। कहा भी है-

"आदावन्तर्दशापाकपतेस्तत्क्रमतोऽपराः" इति।

उ० दी—अथ लग्नदशायामन्तर्दशाविचारस्तत्र प्रथमान्तर्दशा लग्नस्यैवातः रूपांशतले रूपहरो देयः १/१ । अथ दशापतेर्नवमस्थानस्थितानां मध्ये बुधो बलाधिकस्तेन स त्र्यंशापहारकोतः रूपांशतले हरत्रयं देयम् १/३ । अत्र सप्तमस्थाने ग्रहाभावत्वान्न नगांश इति । चतुरस्रगो गुरुस्तेन चतुर्थांशापहारकः १/४ । अथैषां लग्नबुधगुरूणामंशयोगार्थं न्यासः १/१ । १/३ । १/४ अत्र "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्" इत्यनेन समच्छेदिता अंशाः १२/१२ । ४/१२ । ३/१२ एते समच्छेदीभूताश्छेदविहीनाश्च १२ ॥ ४ ॥ ३ एते गुणकाराः एकीकृताः १९ एष भागहारः । अथ दशापतिदायः । ११ ११ । १९ । ५४ । ०० द्वादशगुणितः १४३ । ७ । २८ । ४८ । ०० अयं भागहारेण १९ नेन भक्तः ७ । ६ । २२ । २ । ३२ इयं मूलदशापतेर्लग्नस्यान्तर्दशा । पुनरपि मूलदशापतिदायस्यास्य ११।११।१९।५४।०० चतुर्गुणितस्य एकोनविंशत्याभागमपहृत्याप्तम् । २ । ६ । ७ । २०।५० इयं त्र्यंशपाचकस्य बुधस्यान्तर्दशा । पुनरपि मूलदशापतिदायस्यास्य ११।११।१९।५४।०० त्रिगुणितस्य ३५।१।२९।४२।०० एकोनविंशत्या भागमपहृत्याप्तम् १।१०।२०।३०।३८ इयं चतुर्थांशपाचकस्य गुरोरन्तर्दशा (द्र० ११४ चक्रम्) । एवं ११५-१२१ चक्राणि ज्ञेयानि) ॥ ३३ ॥

अथ विदशादिकमाह—

इत्याभ्यो विदशास्ततोऽप्युपदशास्ताभ्यश्च सूक्ष्मं फलं
पञ्चांशोनदिनद्वयं तु कलयेत्यायुः कृतं दृश्यते ।
पद्मैः खेटलवान्तरेण च भवेन्मासान्तरं चायुषः
प्रोक्तं यैस्तु दशादिलग्नजफलं तेभ्योऽतिदृग्भ्यो नमः ॥३४॥

व्या०—इत्यनेन विधिना आभ्योन्तर्दशाभ्यो विदशाः साध्याः । यथा—अन्तर्दशा एव दशाः कल्प्याः अन्तर्दशापतिरेव दशापतिः कल्प्यः ततोऽर्धस्यैकभग इत्यादिनाऽन्तर्दशामध्ये विदशा भवन्तीति । ततस्ताभ्यो विदशाभ्य उक्तप्रकारेणोपदशाः साध्याः । ताभ्यः सूक्ष्मं फलं भवति । शिष्यावधानार्थं ग्रहाणां स्पष्टतरं साधनं कार्यमित्याह-पञ्चांशोनदिनद्वयमिति । कलया एकया कलया कृतं साधितमायुः पञ्चांशोनदिनद्वयं (अष्टचत्वारिंशद्घटिकाधिकैकदिनमित्यर्थः) दृश्यते । पद्मैर्ब्राह्मसौरार्यादिभिश्च खेटलवान्तरेण ग्रहाणामंशाद्यन्तरेण आयुषो मासान्तरं भवेत् । तथा सत्यपि यैः श्रीपत्यादिभिर्दशादिल-

ग्रजफलम्प्रोक्तं तेभ्योऽतिदृग्भ्यो दूरदृष्टिभ्यो नमो नमस्कारोऽस्तु। इत्युपहासवचनम् ॥३४॥

एककलातुल्येन ग्रहान्तरेणायुषः पञ्चांशोनदिनद्वयमन्तरं भवति तद्यथा—यदि नवांशकलाभिरेकं वर्षं लभ्यते तदैककलया किमिति = $\frac{१ \times १}{२००}$ = वर्षात्मकमायुः षष्ट्यधिकशतत्रयेण संगुण्य दिनात्मकमायुः = $\frac{३६०}{२००} = २ - \frac{१}{५}$। तथांऽशाद्यन्तरेण मासाद्यन्तरं भवति यथा—यदि नवांशकलाभिः २०० द्वादशमासा लभ्यन्ते तदैकांशकलाभिः किमिति = $\frac{१२ \times ६०}{२००} = \frac{१८}{५} = ३ + \frac{३}{५}$ = मासाद्यायुः। अत आचार्योक्तं सुष्ठुतरम्।

भा०—जैसे अन्तर्दशा साधन किया है इसी प्रकार अन्तर्दशा से विदशा का साधन करे और विदशा से उपदशा साधन करे उस से सूक्ष्म (स्पष्ट) फल होता है। ग्रह में एक कलातुल्य अन्तर होने से आयुर्दायों में एक दिन ४८ घटी अन्तर होता है क्योंकि एक कला पर से आयुर्दाय बनाते हैं तो १ दिन, ४८ घटी होती है। और भिन्न भिन्न पक्ष (ब्राह्म सौर आदि से) ग्रह साधन करने से अंशादिक अन्तर होता है। इसलिये आयुर्दाय में मासादि अन्तर हो सकता है। तब भी उसी रीति से बनाये हुये ग्रहादिक से जो श्रीपति आदि आचार्य दशा फल लग्नफल आदि कहे हैं उन दूर दर्शियों को मेरा नमस्कार है ॥ ३४ ॥

उ० दी—अथात्रान्तर्दशावर्षादय एव दशाः कल्प्याः। अन्तर्दशाधीशो दशाधीशः कल्प्यः। ततोऽर्द्धस्यैकभग इत्याद्युक्तरीत्यान्तर्दशामध्ये विदशा ज्ञेयाः। तद्यथा—गुरोर्दशान्तर्दशामध्ये प्रथमा गुरोर्विदशा। तेन गुरोरंशस्या $\frac{१}{१}$ स्य। तथा सप्तमस्थानस्थितचन्द्रस्यां $\frac{१}{७}$ शस्य। तथा चतुरस्रगतशुक्रस्या $\frac{१}{४}$ स्य च। पूर्वोक्तरीत्या समच्छेदितांशाश्छेदविहीनाश्च २८ ॥ ४ ॥ ७ एते गुणकाराः, एकीकृताः ३९ एष भागहारः। अथ दशापतिदायः ४। ५। ८। २९। २८ अष्टाविंशतिगुणितः १२४। ०३। २७। ४५। ०४ भागहारेणा ३९ नेन भक्तः ३। २। ७। ३८। ४ इयं गुरोर्दशान्तर्दशामध्ये गुरोर्विदशा। अथ दशापतिदायस्या ४। ५। ८। २९। २८ स्य चतुर्गुणितस्यै १७। ९। ३। ५७। ५२ कोनचत्वारिंशद्भागमपहृत्याप्तं ००। ५। १३। ५६। ५२ इयं चन्द्रस्य विदशा। अथ दशापतिदायस्या ४। ५। ८। २९। २८ स्य सप्तगुणितस्यै ३१।००।२९।२६।१६ कोनचत्वारिंश-

ऽगमपहृत्याप्तं ०० । ६ । १६ । ५४ । ३१ इयं शुक्रस्य विदशा (द्र० १२२ चक्रम्)। एवं विदशा एव दशाः कल्प्याः। विदशापतिर्दशापतिः कल्प्यः। ततोऽर्द्धस्यैकभग इत्याद्युक्तप्रकारेण विदशामध्ये उपदशाः साध्याः किमत्र लेखप्रपञ्चेन (द्र० १२३ चक्रम्) ॥३४॥

अतः सूक्ष्मदशाफलार्थं दशाप्रवेशकालिकलग्नसाधनमाह—

शाकोऽब्दा जनिमध्यमार्कभमुखं मासादि तद्युग्दशा-
ऽब्दाद्यं तत्र शके स भादितरणिर्मध्यो दशादौ भवेत्।
घस्त्रीभूतदशा पृथक् त्रिकुहता खाङ्काष्टहृत्तद्युता
सा स्यात्सावनिका दशाऽब्दपलयुक्तद्युग्जनिद्युव्रजः ॥३५॥
तस्मात् सावयवाद्गणात्स्वकरणात् साध्या दशादौ खगाः
क्षेपान् जन्मखगान् प्रकल्प्य यदि वा साध्या दशा सावनात्।
ते स्पष्टाश्च तिथिश्च संक्रमवशान्मासो दशादौ तनुः
पूर्वोक्तं जडकर्म चात्र तु मया तल्लाघवं दर्शितम् ॥ ३६ ॥

व्या०—शाको जन्मकालिकशाकोऽब्दाः कल्प्याः, जनिमध्यमार्कभमुखं जन्मकालीनार्कराश्यादिकं मासादिकं कल्प्यम्, तद्युग्दशाब्दाद्यं (तेनाब्दादिना युक्तं दशाब्दाद्यं) कार्यम्। एवं यः शाको यच्च राश्यादिकमुत्पद्यते तत्र तस्मिन् शके दशादौ अग्रिमदशाप्रवेशकाले स मध्यो भादितरणिर्मध्यमः सूर्यो भवेत्। तत्र शाके तत्तुल्यो मध्यमसूर्यो यदा भवति तदैवाग्रिमदशाप्रवेशो भवतीत्यर्थः। अथ तात्कालिकमासाद्यानयनमाह—घस्त्रीभूतदशेति। घस्त्रीभूतदशा दिनीकृतदशा पृथक् स्थानान्तरे स्थाप्या सा त्रिकुहता त्रयोदशगुणा खाङ्काष्टहृत् तद्युता (तेन लब्धेन दिनाद्येन युक्ता) पृथक्स्था कार्या (तथा) दशाब्दपलयुक् (दशाब्दतुल्यैः पलैर्युक्ता कार्या) एवं सा सावनिका सावनदिनात्मिका दशा भवति। तद्युग्जनिद्युव्रजः (तया सावनात्मिकया दशया युक्तो जन्मकालिकोऽहर्गणः) कार्यः स दशाप्रवेशकालिकोऽहर्गणो भवति। जन्मदिनीयसूर्योदयकालिकोऽहर्गणस्सूर्योदयाद्गतेष्टघटीपलयुतो जन्मकालिकोऽहर्गणः सावयवो भवतीति ज्ञेयम्। तस्मात् सावयवाद् गणादहर्गणात्, स्वकरणात् (जन्मकाले यस्मात् करणात् साधिता ग्रहास्तस्मादेव करणग्रन्थात्)

दशादौ खगाः साध्याः। यदि वा जन्मखगान् जन्मकालिकचरदेशान्तरादिसंस्कृतमध्यग्रहान् क्षेपान् प्रकल्प्य दशासावनात् (दशासावनदिनाद्यमेव सावयवाहर्गणं प्रकल्प्येत्यर्थः) स्वकरणाद्ग्रहाः साध्याः। (अत्र दशासावनं जन्मकालमारभ्य व्यतीतदशासावनयुक्तं ग्राह्यमिति ध्येयम्)। यद्वा केवलदशासावनात्पूर्वदशाप्रवेशकालिकग्रहान् क्षेपान् प्रकल्प्य ग्रहाः साध्याः।) ते च साधिता ग्रहाः स्पष्टाः कार्याः। तथा स्पष्टार्कचन्द्राभ्यां तिथिश्च साध्या। तथा संक्रमवेशान्मासो ज्ञेयः दशादौ तनुः साध्या। ततः फलं वाच्यमिति शेषः। पूर्वोक्तं (पूर्वाचार्यैः श्रीपत्यादिभिरुक्तं) जडकर्म अस्ति। अत्रास्मिन् ग्रन्थे तु मया तल्लाघवं दर्शितम् ॥ ३५ ॥ ३६ ॥

अत्रोपपत्तिः—सौरवर्षादावेव शाकारम्भो भवति, तथा रवेरेकराशिभोगकालश्चैकः सौरो मासो भवतीति "शाकोब्दा इत्यादि स भादितरणिर्मध्यो दशादौ भवेदित्यन्तं "सयुक्तिकमेव। परञ्चैवं दशादिवसाः सौरा एव। अतस्तेषां सावनीकरणायानुपातो—यदि युगसौरदिनैर्युगसौरसावनयोरन्तरं लभ्यते तदेष्टदशादिनाद्यैः किमिति

$$\text{तीष्टान्तरम्} = \frac{\text{दशादि} \times २२७१७८२८}{१५५५२००००००} = \frac{\text{दशादि} \times १३}{८८९ + \frac{१६५०२७५}{१७४७५२५}} =$$

$$\frac{\text{दशादि} \times १३}{८९०}$$ । स्वल्पान्तरात्। एतेन पृथक्स्था युक्ता सावनिका दशा भवितुमर्हति। किञ्चात्र हरः किञ्चिदधिको गृहीतोऽतः फलेऽल्पत्वं जातम्। अतो युगसौरास्त्रयोदशगुणिताः खाङ्काष्टभक्ता लब्धयुता युगसौरा युगसावनेभ्योऽल्पा भवन्ति तेषां युगसावनानां चान्तरं = १४२३। अतोऽनुपातो—यदि युगसौरवर्षैरिदं १४२३ दिनात्मकमन्तरं लभ्यते तदेष्टदशावर्षैः किमिति दिनात्मकनन्तरं =

$$\frac{१४२३ \times \text{दशाव}}{४३२००००}$$ । षष्टिवर्गगुणितम्पलात्मकमिष्टान्तरम्

$$= \frac{\text{दशाव} \times ५१२२८००}{४३२००००} = \text{दशाव}$$ । स्वल्पान्तरात्। पूर्वसाधितसावनेष्वेतावती न्यूनताऽऽसीदतो दशाब्दतुल्यं पलं योज्यमेवेत्युपपन्नम्। स्पष्टार्कस्य प्रतिक्षणं विलक्षणत्वान्मध्यमार्क एव दशामासादि योजनं समुचितम्। शेषवासना सुबोधा ॥ ३५–३६ ॥

भा०—जन्मकालिक शाके को वर्ष, और मध्यम सूर्य के राश्यादि को मासादि मानकर पूर्वदशा वर्षादि में जोड़ने से वर्ष स्थान में जो संख्या हो उस शाकाब्द में अग्रिम दशा प्रवेश समय में मासादि तुल्य राश्यादिक मध्यम सूर्य होते हैं। तथा दशा को दिनात्मक वनाकर दो जगह रखे एक स्थान में दिनात्मक को १३ से गुना कर ८९० का भाग देकर लब्धि दिनादि को पृथक् स्थित दिनात्मक दशा में जोड़े और उसमें दशावर्ष संख्या तुल्य पल जोड़ने से सावनात्मक दशा होती है। उसको जन्मकालिक अहर्गण में जोड़े तो अग्रिमदशा प्रवेशकालिक सावयव अहर्गण होता है ॥ ३५ ॥

जन्मदिन के सूर्योदयकालिक अहर्गण में इष्ट घटीपल जोड़ने से जन्मकालिक सावयव अहर्गण होता है। उस दशाप्रदेशकालिक सावयव अहर्गण से जन्मकाल में जिस करण ग्रन्थ से ग्रहादिक साधन किया हो उसी करण ग्रन्थ से दशारम्भ काल में ग्रह साधन करै। अथवा सावन दशा को अहर्गण मानकर जन्मकालिक ग्रह को क्षेपक मान कर स्वकीय करण ग्रन्थ से ग्रह साधन करे। फिर उस ग्रह को स्पष्ट क्रिया से स्पष्ट करै। और स्पष्ट सूर्य चन्द्रमा पर से तिथि साधन करै। और संक्रान्ति के वश से मास का ज्ञान करै। फिर दशारम्भ काल से लग्न साधन करै। पूर्वाचार्य (श्रीपति आदि) इस सावनीकरण को विस्तरता पूर्वक कहे हैं। परञ्च मैं यहाँ उससे लाघप से किया हूँ ॥ ३६ ॥

उ० दी—अत्र जन्मकालिकशकाऽब्दे १७८० स्मिन् जनिमध्यमार्कभमुखं १०।११।११।४३ मासादितुल्यं युक्तं १७८०। १०। ११।११।४३ इदं लग्नदशाब्दाद्येना ११। ११। १६। ५४। ०० नेन च युतं जातः शनिदशारम्भकालिकशकाब्दः १७९२ मध्यमार्कश्च १०। १। ५। ४३ अत्र शकोनवाद्रीन्दुकृशानुयुक्त इत्यादिना कलिगताब्दा ४९७१। लग्नदशारम्भकाले जन्मकालिकः शकाब्दा एव प्रसिद्धाः। अथ गुरुदशारम्भकाले शनिलग्नयोर्दशादियोगेन २६। ११। '२। ५२। १६ नेन जन्मकालिकशकाब्दादयः १७८० १०।११।११।४३ युक्ता जाताः शकाब्दाः १८०७ मध्यमार्कश्च ९। १४। '३। ५६ अत्रापि पूर्ववत्कलिगताब्दा ४९८६ एवं सर्वेषाम् (द्र० १२४ चक्रम्)।

अथ गुरुदशारम्भकाले लग्नशनैश्चरयोर्दशा व्यतीताऽतस्तयोर्योगः (११। ११। १६। ५४। ००)+(१४। ११। १२। ५८। १६) =२६। ११। '२। ५२। १६ दिनीकृताः ९६९२। ५२। १६ अयं

पृथक् स्थाप्यः। एकत्र त्रयोदशगुणः १२६००७।१६।२८ खाङ्काष्ट ८६० भिभक्तः १४१।३४।५३ अनेन द्वितीयस्थो युतः ६८३४।२७।·६ अयं दशाब्दतुल्यै २६ रेभिः पलैर्युतो जाता साविनका दशा ६८३४।२७।३५। अथात्र जन्मकालिकाहर्गणज्ञानार्थं (१२४) चक्राधः स्थितम् "देशान्तरेष्टमिश्राख्ये" त्यादि पद्यमवलोक्यम्। तत्र मिथिला-देशान्तरं १।३५ चालनघटिका च ३।३१ ऋणात्मकयोरनयोर्योगः ५।·६ पूर्वानीताहर्गणेभ्यः १८११६३४ शोध्यो जातो जन्मकालिका-हर्गणः १८११६३३।५४।५४। अथ सावनिका दशा जन्मकालिका-हर्गणयोर्योगे कृते दशारम्भकालिकाहर्गणो जातः (६८३४।२७।३५) +(१८११६३३।५४।५४)=१८२१४६८।२२।२६। अस्मात् (सावयवादहर्गणात्) पूर्ववद्ग्रहादयः साध्याः। तत्र १२४—१२५—१२६—१२७ चक्रसम्बन्धिगद्ये विशेषो द्रष्टव्यश्चक्राणि च द्रष्टव्यानी-त्यलं पल्लवितेन ॥ ३५—३६ ॥

अथ दशाशुभाशुभफलमाह—

चन्द्रः प्राप्तदशेश्वरस्य सुहृदुच्चस्वर्क्षसंस्थो दशा-
नाथाद् धीनवसप्तमोपचयगो दद्याच्छुभानीति च।
यस्मिन्भेऽत्र विधुः स जन्मनि तनुस्वायादिभावो यदा*
तत्तद्वृद्धिकरोऽथ तत्क्षयकरः प्रोक्तेतरस्थानगः ॥३७॥

व्या०—प्राप्तदशेश्वरस्य सुहृदुच्चस्वर्क्षसंस्थो वर्त्तमानदशास्वामिनः सुहृद्भे वा तस्योच्चभेऽपिवा स्वर्क्षे कर्कटे स्थितश्चन्द्रः शुभानि शुभ-फलानि दद्यात्। वा दशानाथात् धीनवसप्तमोपचयगश्चन्द्रः शुभानि दद्यात्। इत्येवं शुभफलप्रदे सति अत्र दशाकाले विधुश्चन्द्रो यस्मिन्राशौ स्थितः स राशिर्जन्मनि तनुस्वायादिभावो (तनुधनसहजसुहृदित्या-दिकः) यो भवति तत्तद्वृद्धिकरो भवति। यथा-यदि चन्द्राक्रान्तराशि-स्तनुभावे तदा जनस्य देहसौख्यं, यदि धनभावे तदा धनवृद्धि-रित्यादि ज्ञेयम्। किन्त्वत्र "कथयति विपरीतं रिष्फषष्ठाष्टमेषु" इति वराहवाक्येन यदि शत्रुमृत्युव्ययभावेषु स्थितस्तदा तद्भावस्य नाश एव भवति। अथ यदि प्रोक्तेतरस्थानगश्चन्द्रो भवति तदा तत्तद्भावनाशः

* "तनुस्वायादिभावेषु यः" इति पाठान्तरं साधु।

स्यात्। अत्रापि शत्रुमृत्युव्ययेषु चन्द्राक्रान्तराशिस्तदा तत्तद्भाववृद्धिरेवेत्यनुक्तमपि बुद्धिमता ज्ञेयम् ॥३७॥

अत्र युक्तिः सुगमागममूलैव ॥३७॥

भा०—चन्द्रमा यदि वर्तमान दशापति के मित्र की राशि में वा उच्चराशि में वा अपनी राशि (कर्क) में हो अथवा दशानाथ से ५।९।७।३।६।१०।११ इन स्थान में हो तो शुभफल देते हैं। ऐसे शुभफलद होने पर चन्द्रमा वर्तमान दशाकाल में जिस राशि में हों वह राशि जन्म समय में तन्वादिक जिस भाव में हो उन उन भावों को पुष्ट करता है। जैसे तनुभाव में हो तो शरीर सुख की वृद्धि इत्यादि समझना। परञ्च शत्रु मृत्यु व्यय भाव में हो तो उस भाव फलका नाश समझना। जैसे—शत्रुभाव में हो तो शत्रु का नाश इत्यादि। यदि उक्तस्थान से भिन्नस्थान में चन्द्रमा हो तो चन्द्राक्रान्तराशि जन्म समय में जिस भाव में हो उसका नाश होता है। यहाँ भी शत्रु मृत्यु और व्यय इन तीनों भाव में विपरीत फल समझना ॥३७॥

उ० दी – स्पष्टम् ॥३७॥

अथान्यविशेषमाह—

यद्द्रव्यं खचरस्य भावगृहदृग्योगादि सर्वं फलं
योज्यं वृत्तिकृतिर्बलादिह दशायां चाथ यो वैरयुक्।
पापः पापदशां विशेत्स च विपत्कर्त्ताऽथ तद्भङ्गद-
स्तत्काले बलवान् खगः शुभसुहृद्दृष्टेष्टषड्वर्गगः ॥३८॥

व्या०—खचरस्य ग्रहस्य यद्द्रव्यं "ताम्रं स्यान्मणिहेमेत्यादि"। ग्रन्थान्तरोक्तं तथा भावगृहदृग्योगादि (भावफलराशिफलदृष्टिफलयोगादिकं) सर्वं फलं बलाद् (बलमवलम्ब्येति ल्यब्लोपे पञ्चमी) दशायां योज्यम्। पूर्णबले ग्रहे यथोक्तं फलं पूर्णं, मध्यबले मध्यं, हीनबलेऽल्पमित्यर्थः। तथा वृत्तिकृतिराजीविका च दशायामनुयोजनीया। अथात्र यो ग्रहो वैरयुक् वैरेण शत्रुतया युक्तः (पापस्य मूलदशापतेः शत्रुः) वा पापः पापग्रहो यदि पापदशां विशेत् (पापदशामध्ये तच्छत्रुः, पापग्रहो वा यद्यन्तर्दशां कुर्यात्तदा) स विपत्कर्ता स्यात्। अथ तत्कालेन्तर्दशाकाले कश्चित् बलवान् खगः शुभसुहृद्दृष्टेष्टषड्वर्गगस्तदा स तद्भङ्गदो रिष्टभङ्गकारको भवति ॥ ३८ ॥

अत्रापि युक्तिरागममूलैव ॥३८॥

भा०—जिस ग्रह का जो द्रव्य (बृहज्जातक आदि में कहा) है और भाव फल राशिफल-दृष्टिफल, योग (राजयोग आदि) तथा आजीविका इत्यादि सब फल ग्रह के बलानुसार दशा में विचार करे। जैसे यदि ग्रह पूर्ण बली हो तो उक्त फल पूर्ण, मध्यबल हो तो मध्यम, हीन बल हो तो अल्प फल कहना। तथा पापग्रह की दशा में यदि पाप ग्रह की शत्रु की वा पाप ग्रह की अन्तर्दशा हो तो उसमें विपत्ति होती है। यदि दशा काल में कोई ग्रह बलवान् होकर शुभग्रह-मित्र से दृष्ट हो वा शुभ ग्रह के वा मित्र के षड्वर्ग में हो तो विपत्ति का नाशकारक होता है॥३८॥

उ० दी—सुगमम्॥ ३८॥

अथाष्टवर्गफलस्याल्पत्वाधिकत्वकल्पनामाह--

खेटस्तस्य यदष्टवर्गजफलं पूर्णं शुभं जन्मत-
न्विन्द्वोर्वृद्धिषु च स्वभोच्चभसुहृद्भस्वत्रिकोणेऽस्ति यः।
दुष्टं मध्यफलं विपर्ययगतस्यानिष्टमत्युत्कटं
शस्तं स्वल्पतरं खगस्य च वदेज् ज्ञात्वा बलं तत्त्वतः॥३९॥

व्या०--यः खेटो जन्मतन्विन्द्वोर्जन्मकालिकलग्नचन्द्रयोर्वृद्धिषूपचयभवनेषु च (तथा) स्वभोच्चभसुहृद्भस्वत्रिकोणे (स्वराशौ स्वोच्चराशौ मित्रराशौ, स्वमूलत्रिकोणे एष्वन्यतमे) अस्ति वर्तते तस्य ग्रहस्य यत् शुभमष्टवर्गजफलं तत् पूर्णं भवति। यद् दुष्टमशुभं तन्मध्यफलं (उक्तग्रहस्याशुभाष्टवर्गजफलं मध्यं भवतीत्यर्थः) तथा विपर्ययगतस्य जन्मलग्नचन्द्रयोरुपचयभिन्नस्थानेषु शत्रुनीचराशिषु च स्थितस्य ग्रहस्य यदनिष्टमष्टवर्गजफलं तदुत्कटं पूर्णं, यच्च शस्तं शुभमष्टवर्गजफलं तत्स्वल्पतरं भवति। अतः खगस्य बलं तत्त्वतो ज्ञात्वा फलं वदेत्। गणक इति शेषः। अन्यदपि स्वबुद्धया विचारयेत्॥ ३९॥

अत्रापि युक्तिः—स्फुटाऽऽगममूलैवेति॥ ३९॥

भा०—जो ग्रह जन्मलग्न तथा जन्मकालिक चन्द्रमा से उपचय (३। ६। १०। ११) स्थान में होकर अपनी राशि, स्वोच्चराशि, मित्रराशि वा अपने मूलत्रिकोण इनमें किसी स्थान में हो तो उस ग्रह के शुभ अष्टवर्गज फल पूर्ण, और अशुभाष्टवर्गजफल मध्यम होता है। तथा जो ग्रह जन्मलग्न और जन्मकालिक चन्द्रमा से उपचयभिन्न (१।२।४।५।७।८।९।१२) स्थान में हो और शत्रु, नीच राशि में हो तो उस ग्रह का अशुभाष्टवर्गज फल पूर्ण, तथा शुभाष्टवर्गज फल अल्प होता है। अतएव ग्रहों के बल को सम्यक् प्रकार से जानकर अष्टवर्गज फल कहना चाहिए। इसमें विशेष विषय भी अपनी बुद्धि से विचार करना चाहिए॥

उ० दी—स्पष्टम् ॥ ३९ ॥

अथ क्वचित् फलस्य व्यभिचारे किं करणीयमित्याह—

जीवेत्क्वापि विभङ्गरिष्टजशिशू रिष्टं विना मीयतेऽ-
थाद्योऽब्दः शिशुदुस्तरोऽपि च परौ कार्येषु नो पत्रिका।
कार्या प्रश्ननिमित्तपूर्वशकुनैर्मानं धिया रक्षता- *
होराज्ञेन सुबुद्धिनाऽत्र बहुधोदर्कश्च कालो बली ॥४०॥

व्या०—क्वापि कुत्रचित् विभङ्गरिष्टजशिशुः विगतो भङ्गो यस्य तच्च तद्रिष्टं चेति विभङ्गरिष्टं तत्र जातः शिशुः (प्रबलरिष्टजातोऽपीत्यर्थः) जीवेत्। तथा क्वापि रिष्टं विनाऽपि मीयते (म्रियते इत्यर्थः) अथाद्यः प्रथमोऽब्दः शिशुदुस्तरः, परौ द्वितीयतृतीयावप्यब्दौ शिशोर्दुस्तरौ दुर्लंघ्यौ। अत एवैषु प्रथमादित्रिषु वर्षेषु पत्रिका जन्मपत्रिका नो कार्या। अथ यदि कश्चिदाग्रहशीलोवर्षत्रयमध्य एव पत्रिका क्रियतामिति वदेत्, तदा तत्र सुबुद्धिना होराज्ञेन प्रश्ननिमित्तपूर्वशकुनैः धिया स्वबुद्ध्या स्वमानं रक्षता (सूक्ष्मतरजन्मकालादिकं प्रश्नलग्नाद्यं शुभशकुनाद्यं ज्ञात्वा) पत्रिका कार्या। यत उदर्को भाविफलं बहुधा, कालश्च बली स्यात्। "उदर्कः फलमुत्तरम्" इत्यमरः। अथवा बहुधोदर्को यत्र स बहुधोदर्क इति कालस्य विशेषणं ज्ञेयम् ॥ ४० ॥

अत्र युक्तिः—ज्योतिःशास्त्रविचारस्यानन्त्यात्कुत्रचित् ज्योतिर्विदापि भङ्गो नोपलब्धुं शक्यते। कुत्र चिद् रिष्टाभंगेऽपि भंगभ्रमोभवितुमर्हति। अत एव रिष्टं विना मरणं, रिष्टसत्त्वेऽपि जीवनं भवितुमर्हति। तथा सर्वेषु होराग्रन्थेषु प्रथमादिवर्षत्रये बहुधारिष्टान्युक्तान्यत एव तत्र पत्रिकाकरणनिषेध इति समुचितमेवेति ॥ ४० ॥

भा०—कहीं प्रबलरिष्ट रहने पर भी बालक जीता है। और कहीं विना रिष्ट के भी मर जाता है। बालकों के लिए पहिला दूसरा तीसरा ये वर्ष दुस्तर (कठिन) होते हैं इसलिए जन्म से तीन वर्ष पर्यन्त पत्रिका नहीं बनाना चाहिए। यदि आग्रह वश कोई बनाने को कहे तो अपनी बुद्धि से अपनी मर्यादा की रक्षा करते हुए होरा शास्त्र को जाननेवाले सूक्ष्म जन्मकाल से स्पष्ट ग्रहादिक, तथा प्रश्न से शुभाशुभ, और पूर्णकलश आदि शुभ शकुन देखकर पत्रिका बनावे। क्योंकि भाविफल बहुत प्रकार के हैं और काल यह बली है ॥ ४० ॥

* "रक्षनूस्वमानं धिया" इति पाठान्तरं बहुषु पुस्तकेष्वस्ति।

उ० दी—व्याख्यावलोकनेनैव स्पष्टमलं प्रपञ्चेनेति ॥ ४० ॥

इति घोंघयानिवासि-ज्यौ० ती० पं० ठक्कुरोपाह्वश्रीरामधीनशर्म-मैथिलकृता जातकपद्धतेरुदाहरणदीपिका ॥

मिथिलादेशमध्यस्थ—घोंघयाग्रामवासिनः ।
ठक्कुरोपाभिधानश्री—भाइजीशर्मणः सुतः ॥
रामाधीनः सुधीरेतां स्फुटां जातकपद्धतेः ।
कृतवान् बालबोधार्थ-मुदाहरणदीपिकाम् ॥

अथ ग्रन्थालङ्करणमाह—

नन्दिग्रामे केशवो विप्रवर्यो
योऽभूद्धोराशास्त्रसङ्घं विलोक्य ।
तेनोक्तेयं पद्धतिर्जातकीया
चत्वारिंशद्वृत्तबद्धा सुबोधा ॥४१॥

व्या०—नन्दिग्रामे विप्रवर्यो यः केशवोऽभूत् तेन होराशास्त्रसंघं विलोक्येयं चत्वारिंशद्वृत्तबद्धा सुबोधा जातकीया पद्धतिरुक्ता ॥४१॥

भा०—नन्दिग्राम में ब्राह्मणों में श्रेष्ठ जो केशवाचार्य हुये। उन्होंने अनेक होराशास्त्र ग्रन्थों को देखकर यह चालिस श्लोकों से बद्ध अतिसरल जातक-पद्धति बनाई है ॥४१॥

अथ ग्रन्थप्रशंसामाह—

ये सुबोधां पठन्तीमामग्र्यां जातकपद्धतिम् ।
होरावित्पदवीं यान्ति लोके मानं यशश्च ते ॥४२॥

इति श्री केशवदैवज्ञविरचिता जातकपद्धतिः समाप्ता ॥ शुभम् ॥

व्या०—ये जना इमां अग्र्यां श्रेष्ठां सुबोधां जातकपद्धतिं पठन्ति ते होरावित्पदवीं यान्ति। तथा लोके मानं यशश्च यान्ति प्राप्नुवन्ति ॥४२॥

भा०—जो इस परम श्रेष्ठ और सुबोध जातकपद्धति को पढ़ता है वह गणकों की प्रतिष्ठा और लोक में मान तथा यश को पाता है ॥४२॥

इति श्रीबछरनशर्मात्मजज्यौतिषाचार्य-मैथिल-पण्डित-श्रीसीताराम-शर्मकृता सर्वमनोरमाख्या श्रीकेशवदैवज्ञकृतजातकपद्धतेः सोपपत्तिसंस्कृतभाषाव्याख्या सम्पूर्णा ॥ सिद्धिरस्तु ॥

अथ टीकाकारस्य संक्षिप्तपरिचयः ।

मिथिलादेशमध्यस्थो विप्रमण्डलमण्डितः ।
पूर्वस्यां दरिभङ्गातः सप्तक्रोशान्तरे शुभः ॥
ग्रामोऽस्ति चौगमा-नाम तत्र मत्प्रपितामहः ।
भरद्वाजकुले श्रीमा-नभूत्सर्वगुणान्वितः ॥
गूनाख्यो झोपसंज्ञोऽस्य पुत्रः सर्वजनप्रियः ।
मोहनो नाम धर्मज्ञस्तत्सुतः सर्ववित्सुधीः ॥
विज्ञो बछरनो नाम सर्वलोकहिते रतः ।
तस्य पञ्चाभवन् पुत्रास्तेषु सर्वानुजोऽल्पधीः ॥
सीतारामोऽहमुत्पन्नो द्वयेकाष्टैकमिते १८१२ शके ।
माघकृष्णतृतीयायां बुधे भे भगदैवते ॥
शुभे कर्कोदये लग्नात् केन्द्रसंस्थे बृहस्पतौ ।
ततो दुर्दैवसंयोगादपूर्णे पञ्चमेऽब्दके ॥
मदग्रजाय विज्ञाय गृहभारं पिता मम ।
रामप्रसादसंज्ञाय दत्वा ज्ञानपुरस्सरम् ॥
पीत्वा गंगाजलं ध्यात्वा श्रीपतिं तत्पदं गतः ।
अथोक्तेनाग्रजेनाहं पालितो लालितस्तथा ॥
जनन्या जानकीदेव्या पठने च नियोजितः ।
निजग्रामसमीपस्थ — जरिसोग्रामवासिन ॥
गुरोर्ज्योतिर्विदश्च — श्री — कपिलेश्वरशर्मणः ।
संनिधौ ज्यौतिषग्रन्थान् कांश्चित् सम्यगधीत्य च ॥
प्रथमायां परीक्षायां समुत्तीर्णस्ततः परम् ।
"ज्यौतिषाचार्यवर्येण श्रीश्रीनन्दनशर्मणा ॥
कन्हौलीसंज्ञके स्वीये ग्रामे पाठालयः कृतः ।
छात्राश्चासंख्यकास्तत्र पाठ्यन्ते यत्नतोऽनिशम् ॥
तथा च छात्रवर्गेभ्यो दीयते भोजनादिकम् ।
तत्रत्यैः सद्गुणोपेतैः सुजनैरेव सादरम् ॥"
श्रुत्वेति तत्र गत्वा च मया दृष्टं यथाश्रुतम् ।
कन्हौली नगरी तेन गुरुणा समलङ्कृता ॥
सहिता छात्रवृन्देन दृष्टा देवपुरीव सा ।
तत्रोक्तगुरुपादाब्जमूलेऽहं पठितुं स्थितः ॥

मद्भोजनादिभारश्च पत्न्या झिंगुरशर्मणः ।
सहर्षं स्वीकृतः सर्वः सुमत्या शुभशीलया ॥
पठंस्तत्र विचिन्तोऽहं तया मात्रेव लालितः ।
अन्येऽपि देशदेशेभ्यः श्रुत्वा श्रीमद्गुरोर्गुणम् ॥
आगतास्तत्पदं पद्मं वनेभ्यो मधुपा इव ।
वर्द्धयन्तो मिथः प्रीतिं छात्राश्च सहजा इव ॥
पाठिता गुरुणा तेन गुरुणा त्रिदशा इव ।
कः समर्थो जगत्यस्मिन् प्रवक्तुं मद्गुरोर्गुणम् ॥
मयाप्यल्पधियाऽज्ञेन यत्पदाब्जकृपाबलात् ।
लब्ध्वा बोधलवं दत्वा मध्यमां च तथोत्तमाम् ॥
राजकीयपरीक्षां च लब्ध्वा तीर्थपदं ततः ।
काव्ये स्वमातृभाषाया मिथिलेशप्रवर्तिताम् ॥
परीक्षां हि समुत्तीर्य तत्प्रतिष्ठामवाप्य च ।
तेनैव गुरुणाज्ञप्तो नत्वाहं तत्पदाम्बुजम् ॥
आचार्याख्यपरीक्षां च दातुं काशीं समागतः ।
राजकीये प्रधानेऽत्र ख्याते विद्यालये शुभे ॥
प्राधानाध्यापकस्य श्री—मुरलीधरशर्मणः ।
महादिकमहोपाध्या-याग्रगण्यस्य सन्मतेः ॥
भूपालजनमान्यस्य सर्वज्ञस्य जगद्गुरोः ।
चरणं शरणं लब्ध्वा पठित्वा तत एव हि ॥
सर्वानभीप्सितग्रन्थान् तत्पदाब्जानुकम्पया ।
लब्धवान् ज्योतिषे शास्त्रे "आचार्यपदवीं" ततः ॥
गोविन्दानन्द-संज्ञैश्च स्वामिभिर्मण्डलेश्वरैः ।
ज्यौतिषाध्यापकस्थाने काश्यामेव नियोजितः ॥
तत्रैव पाठयंश्छात्रानङ्गवेदाष्टभू १८४६ मिते ।
शकाब्दे कृतवानेतां टीकां सर्वमनोरमाम् ॥
यत्पदाब्जानुकम्पातष्टीकेयं पूर्णतां गता ।
तानेव गुरुवर्यांश्च प्रणमामि पुनः पुनः ॥

शुभम् ।

देशान्तरसारणी ।

	अक्षांशाः	पलभाः	पलकर्णाः	मध्यरेखातो देशांतर नाडिकाः	श्रीकाशीतश्च देशान्तरनाडिकाः	
नगरनामानि	अं. क.	अं. व्यं.	अं. व्यं.	घ. प.	घ. प.	मिनिट
अजमेर	२६।२७	५।५८	१३।२४	०।१४प.	१।२३प.	३३ प.
अमरावती	२०।५६	४।३५	१२।५१	०।१७पू.	०।५२प.	२१ प.
अमृतसर	३१।३७	७।२३	१४।५	०।१२प.	१।२१प.	३२ प.
अमेठी	२६।७	५।५३	१३।२२	०।५७पू.	०।१२प.	५ प.
अयोध्या	२६।४८	६।४	१३।२७	१।१ प.	०।८ प.	३ प.
अलवर	२७।३४	६।१६	१३।३२	०।४ पू.	१।५ प.	२६ प.
अलीगंज, हथुवा	२६।१२	५।५४	१३।२२	१।२३पू.	०।१४पू.	६ पू.
अलीगढ़	२७।५४	६।२१	१३।३५	०।२०पू.	०।४९प.	२० प.
अहमदाबाद	२३।१	५।६	१३।२	०।३५प.	१।४४प.	४२ प.
आगरा	२७।१२	६।१०	१३।३०	०।२०पू.	०।४९प.	२० प.
आजमगढ़	२६।४	५।५२	१३।२२	१।११पू.	०।२ पू.	१ पू.
इन्दौर	२२।४४	५।२	१३।१	०।३ प.	१।१२प.	२९ प.
उज्जयिनी	२३।१०	५।८	१३।३	०।०	१।९ प.	२८ प.
उदयपुर	२४।३५	५।२९	१३।१२	०।२४प.	१।३३प.	३७ प.
औरंगाबाद	१९।५३	४।२०	१२।४६	०।७ प.	१।१६प.	३० प.
कटक	२०।२८	४।२९	१२।४९	१।३८पू.	०।२९पू.	१२ पू.
कपूरथला	३१।२३	७।१९	१४।३	०।७ प.	१।१६प.	३० प.
कलकत्ता	२२।३२	४।५९	१३।०	२।२ पू.	०।५३पू.	२१ पू.
कांची	९।२९	२।०	१२।१०	०।१७पू.	०।५२प.	२१ प.
काठमांडू, नेपाल	२७।४५	६।१९	१३।३४	१।३१पू.	०।२२पू.	९ पू.
कानपुर	२६।२८	५।५८	१३।२४	०।४२पू.	०।२७प.	११ प.
काशी	२५।१८	५।४०	१३।१६	१।९ पू.	०।०	०
काश्मीर	३४।६	८।७	१४।२९	०।१३प.	१।२२प.	३३ प.
कुरुक्षेत्र	२९।५५	६।५४	१३।५१	०।०	१।९ प.	२८ प.
कोचीन	९।५८	२।७	१२।११	०।२ पू.	१।७ प.	२७ प.
कोटा	२५।१०	४।३८	१३।१६	०।२ प.	१।११प.	२८ प.
कोलापुर	१६।४२	३।३६	१२।३२	०।१८प.	१।२७प.	३५ प.
गया	२४।४९	५।३३	१३।१३	१।२९पू.	०।२०पू.	८ पू.
गाजीपुर	२५।३५	५।४५	१३।१८	१।१५प.	०।६ पू.	२ पू.
गिद्धौर	२४।५१	५।३३	१३।१३	१।४२पू.	०।३३पू.	१३ पू.
गोरखपुर	२६।४५	६।३	१३।२६	१।१२पू.	०।३ पू.	१ पू.
ग्वालियर	२६।१२	५।५४	१३।२२	०।२१पू.	०।४८प.	१९ प.

	अक्षांशाः	पलभाः	पलकर्णाः	मध्यरेखातोदेशांतरनाडिकाः	श्रीकाशीतश्च देशान्तरनाडिकाः	
नगरनामानि	अं. क.	अं. व्यं.	अं. व्यं.	घ. प.	घ. प.	मिनिट
चित्रकूट	२९।१२	९।३९	१३।१६	०।४८पू.	०।२१प.	८ प.
छपरा	२५।४७	९।४८	१३।२०	१।२६पू.	०।१७पू.	७ पू.
जगन्नाथपुरी	१९।४८	४।१९	१२।४५	१।३७पू.	०।२८पू.	११ पू.
जब्बलपुर	२३।१०	५।८	१३।३	०।३९पू.	०।३०प.	१२ प.
जम्बू	३२।४४	७।४३	१४।१६	०।१२प.	१।२८प.	३२ प.
जयपुर	२६।५५	६।६	१३।२७	०।२ प.	१।११प.	२८ प.
जामनगर	२२।२७	४।९७	१२।९९	१।० प.	२।९ प.	५२ प.
जूनागढ़ सोरठ	२१।३१	४।४४	१२।५४	०।५६प.	२।५ प.	५० प.
जोधपुर	२६।१८	५।५६	१३।२३	०।३०प.	१।३९प.	४० प.
जौनपुर	२९।३५	९।४७	१३।१९	१।६ पू.	०।३ प.	१ प.
झालरापाटन	२४।३२	५।२९	१३।११	०।१ पू.	१।८ प.	२७ प.
झांसी	२५।२७	५।४३	१३।१७	०।२९पू.	०।४४प.	१८ प.
टेकारी	२४।५८	५।३५	१३।१४	१।२६पू.	०।१७पू.	७ पू.
डुमरांव	२५।२२	५।४४	१३।१८	१।२१पू.	०।१२पू.	५ पू.
ढांका	२३.४३	५।१६	१३।६	२।२३पू.	१।१४पू.	३० पू
तजावर	१०।४८	२।१७	१२।१३	०।३८पू.	०।३१प.	१२ प.
दरभंगा	२६।१०	०।५४	१३।२२	१।३८पू.	०।२९पू.	१२ पू.
दिल्ली	२८।३९	६।३३	१३।४१	०।१२पू.	०।५७प.	२३ प.
द्वारका	२२।१४	४।९४	१२।५८	१।११प.	२।२०प.	९६ प
धवलपुर	२६।४२	६।२	१३।२६	०।१८पू.	०।५१प.	२० प.
नागपुर	२१।९	४।३९	१२।५२	०।३१पू	०।३८प.	१५ प
नाथद्वारा	२४।५२	५।३४	१३।१४	०।२२प.	१।३१प.	३६ प.
नाभा	३०।२३	७।२	१३।५५	०।१ पू.	१।८ प.	२७ प.
नैनीताल	२९।२३	६।४५	१३।४६	०।३५पू.	०।३४प.	१४ प.
पटना	२५ ३७	५।४५	१३।१८	१।३१पू.	०।२२पू	९ पू.
पटियाला	३०।२०	७।१	१३।५४	०।४ पू.	१।५ प.	२६ प.
पुरनियां	२९।४६	५।४८	१३।२०	१।५४पू.	०।४९पू.	१८ प.
पूना	१८।३०	४।१	१२।३९	०।२२प.	१।३१प.	३६ प.
पेशावर	३४।२	८।३	१४।२९	०।४५प.	१।५४पू.	४६ प.
पोरबन्दर	२१।३८	४।४६	१२।५५	१।५ प.	२।१४प.	५४ प.
प्रतापगढ़	२४।२	५।२१	१३।८	०।१३प.	१।२२प.	३३ प.
प्रयाग	२५।२८	५।४३	१३।१७	०।५७पू.	०।१२प.	५ प.
फर्रुखाबाद	२७।२४	६।१३	१३।३१	०।३५पू.	०।३४प.	१४ प.

	अक्षांशाः	पलभाः	पलकर्णाः	मध्यरेखातोदेशांतर नाडिकाः	श्रीकाशीतश्च देशान्तरनाडिकाः	
नगरनामानि	अं. क.	अं. व्यं.	अं. व्यं.	घ. प.	घ. प.	मिनिट
बड़ोदा	२२।१८	४।५५	१२।५८	०।२८प.	१।३७प	३९ प.
बम्बई	१८।५८	४।७	१ ।४१	०।३२प.	१।४१प.	४० प.
बरेली	२८।२२	६।२९	१३।३८	०।३४पू.	०।३२प	१४ प.
बर्द्वान	२३।१६	५।१०	१३।४	१ ५८पू.	०।४९पू.	२० पू.
बलरामपुर	२७।२७	६।१४	१३।३१	१।१ पू	०।८ प.	३ प
बांदा	२५।२८	५।४३	१३।१७	०।४२पू.	०।२७प.	११ प.
बांसवाड़ा	२३।३०	५।१३	१३।५	०।१७प.	१।२६प	३४ प.
बीकानेर	२८।१	६।२३	१३।३६	०।२७प.	१।३६प	३८ प.
बुन्दी	२५।२७	५।४३	१३।१७	०।४ प	१।१३प.	२९ प.
बेतिया	२६।४२	६।२	१३।२६	१।२४पू.	०।१५पू.	६ पू.
भरतपुर	२७।१३	६।१०	१३।३०	०।१४पू	०।५५प.	२२ प.
भागलपुर	२५।१५	५।४०	१३।१६	१।३९पू.	०।४०पू	१६ पू.
भूपाल	२३।१६	५।१०	१३।४	०।१५पू.	०।५४प.	२२ प.
मकसूदाबाद	२४।११	५।२३	१३।९	२।२ पू.	०।५३प.	२१ पू.
मथुरा	२७।३०	६।१५	१३।३२	०।१६पू.	०।५३प.	२१ प.
मदरास	१३।४	२।४७	१२।११	०।४१पू.	०।२८प.	११ प.
मिरजापुर	२५।९	५।३८	१३।१५	१।५ पू.	०।४ प	२ प.
मुंगेर	२५।२३	५।४२	१३।१७	१।४४पू	०।३५पू.	१४ पू
मुलतान	३०।१२	६।५९	१३।५३	०।४६प	१।५५प.	४६ प.
मेसूर	१२।१८	२।३७	१२।१७	०।६ पू.	१।३ प	२५ प.
रामेश्वर	९।१८	१।५८	१२।१०	०।३२पू.	०।३७प	१९ प.
रायपुर	२१।१५	४।४०	१२।५३	०।५३पू.	०।१३प	५ प.
रावलपिण्डी	३३।३७	७।५९	१४।२५	०।३१पू	१।४०प.	४० प.
रीवाँ	२४।३१	५।२८	१३।११	०।५२पू.	०।१७प	७ प.
लखनऊ	२६।५५	६।६	१३।२७	०।४१पू.	०।२०प	८ प.
लन्दन, विलायत	५१।३१	१५।६	१९।१७	१२।१२प.	१३।५ प	३३२ प.
लाहौर	३१।२५	७।२३	१४।५	०।१७प.	१।२६प	३४ प.
वटेश्वर	२६।३८	६।४	१३।२७	०।२३पू	०।४५प.	१८ प.
शिमला	३१।६	७।१४	१४।१	०।११पू.	०।४८प	२३ प.
सूरत	२१।१२	४ ३९	१२ ५२	०।३२प.	१।४१प.	४० प.
हरिद्वार	२९ ५८	६।५५	१३।५१	०।२१पू	०।४८प.	१९ प.
हैदराबाद, दक्षिण	१७।२३	३।४५	१२।३४	०।२४पू	० ४ प.	१८ प.
हैदराबाद, सिन्ध	२५।२५	५।४२	१३।१७	१।१७प.	२ २६प.	५८ प.
श्रीनगर गढ़वाल	२९।२७	६।४६	१३।४८			

श्रीगणेशाय नमः ।

अथ जातकपद्धतेः

श्रीमदपूछशर्मकृतोदाहरणम्

श्रीपतिकेशवपद्धतिसिद्धां लाघवरीतिविशेषसमेताम् ।
संविलिखामि निजां जनिपत्रीं साम्बशिवांघ्रियुगं प्रणिपत्य ॥ १ ॥

शालिवाहनशके १७८० फाल्गुनकृष्णषष्ठ्यां बुधे घट्यः ·६ पले २ परतः सप्तमीं विशाखानक्षत्रघट्यः ५० पलानि ४८ ध्रुवयोगघट्यः २२ पलानि ३३ परतो व्याघातयोगः । इह दिवसे सूर्योदयादिष्टघटिकासु ४० पलेषु ३६ मम जनिरभूत् तत्र कल्याद्यहगणः १८११६३४ अयनांशाः—२०।२३।५३ मिथिलाक्षभा ·६ चरखण्डानि ६०।४८।२० तात्कालिकचरपलानि ५३ मिश्रमानम् ४४।·७ दिनार्धम् १४।·७ रात्र्यर्धम् १५।५३ दिनमानम् २८।१४ रात्रिमानम् ३१।४६ देशान्तरयोजनानि १२७ ऋृणानि । चालनमृणं घट्यादि ००।०३।३१ ॥ ❀ ॥

(१)

अथ मध्यमग्रहास्सगतिकाः

र.	चं.	मं.	बु.	बृ.	शु.	श	रा.	के.
१०	·६	००	१०	·१	१०	·३	१०	·४
११	२६	११	११	२६	११	१४	·९	·९
११	२५	१६	११	५८	११	४४	१५	१५
४३	२३	४३	४३	४३	४३	३९	४९	४९
५९	७९०	३१	५९	·५	५९	·२	·३	३
·८	३५	२६	·८	००	·८	००	११	११

(२)

शीघ्रोच्चानि च ।

मं.	बु.	बृ.	शु.	श.
१०	१०	१०	·५	१०
११	·८	११	२७	११
११	४६	११	४७	११
४३	२२	४३	१०	४३
५९	२४५	५९	९६	५९
·८	३२	·८	·८	·८

(३)

मन्दोच्चानि च

र.	चं.	मं.	बु	बृ	शु.	श.
·२	·९	·४	·७	·५	·२	·७
१७	३	१०	१०	२१	१९	२६
१७	२४	·२	२८	२२	५२	३७
२३	१७	४०	१९	१६	१६	३५
२०	·६	००	००	००	००	००
००	४१	००	००	००	००	००

(४)

स्पष्टग्रहाः सगतिकाः

र.	चं.	मं.	बु.	बृ	शु	श.
१०	७	११	१०	·१	·८	·३
१२	·१	२४	·७	१९	२५	१८
५७	·४	२७	१७	५७	४३	·८
३८	१५	१८	१९	३०	१८	१६
६०	७६२	४३	१०८ ५०	३	६१	·४
२४	४२	७	प. अ.	२२	१९	२९

यद्यपि दृग्गणितैक्यकृत्प्रकारेण साधितग्रहेभ्य एवादेशः कर्तव्य इति सकलाचार्यमतं तथापि केवलमकरन्दप्रकाराभिज्ञशिष्योपयोग्युदाहरणप्रदर्शनार्थं मकरन्दोक्त्यैव साधिताः ।

(५)

	मे	वृ.	मि	क	सिं	क.
लङ्कोदयाः	२७८	२९९	३२३	३२३	२९९	२७८
	मी	कु.	म	ध.	वृ.	तु

(६)

मे	वृ	मि.	क	सिं.	क.	
२१८	२५१	३०३	३४३	३४७	३३८	स्वदेशोदयाः
मी.	कु	म	ध.	वृ.	तु.	

रात्रौ पश्चिमनतम् २६।२६ उन्नतश्च ३।३१

(७)

त.	ध.	स	सु	सु	रि.	जा.	मृ.	ध	क	आ.	व्य.	
·६	·७	·८	·९	१०	११	००	·१	·२	·३	·४	·५	भावाः
१८	१९	२०	२१	२०	१९	१८	१९	२०	२१	२०	१९	
३४	३४	३३	३३	३३	३४	३४	३४	३३	३३	३३	३४	
४६	१६	४६	१५	४५	१५	४६	१६	४६	१५	४५	१५	
·७	·८	·९	१०	११	००	·१	·२	·३	·४	·५	·६	सन्धयश्च
·४	·५	·६	०६	०५	०४	·४	·५	·६	·६	·५	·४	
·४	·४	·३	०३	०४	०४	·४	·४	·३	·३	·४	·४	
३१	·१	३०	३०	००	३०	३१	·१	३०	३०	००	३०	

अत्र भावद्वययोगार्द्धं प्रथमभावस्य विरामसन्धिरग्रिमस्यारम्भसन्धिस्तथा भावद्वययोगकरणे चक्राधिकतायां चक्रन्न त्याज्यम्। यदा प्रथमभावे दशैकादश राशयोऽग्रिमभावे शून्यमेको वा राशिस्तदा शून्यैकस्थाने द्वादश राशयोऽधिका ग्राह्याः, उत्तरभावेन सह सन्धिकरणे तु शून्यमेको वा राशिर्यथास्थित एव इत्यभिसन्धिः। अथ घनर्णलग्नानयने विशेषो हायनरत्ने—

सूर्योदयाद्यातघटीषु भोग्यैर्दिवावशेषे सरसार्कभुक्तैः।
निशागते त्वङ्गयुतार्कभाग्यैर्निशावशेषे रविभुक्तभागैः। इति ॥ १ ॥

अथ प्रथमभावचतुष्टये सन्धित्रये च सिद्धे सुगमोपायेनान्यभावसन्धिसाधनमुक्तं सुन्दरमिश्रपद्धतौ—

त्रिद्विभावौ क्रमाद्युक्तौ द्वाभ्यां वेदैः सुतद्विषौ।
लग्नादिभावाः षट् षड्भयुक्ताः सप्तमकादयः॥
त्रिद्व्येकसन्धयस्त्वेकत्रीषु राशियुताः क्रमात्।
संधयः स्युश्चतुर्थाद्याः सषड्भाः षडमी परे॥

(८)
ग्रहकुण्डली

(९)
भावकुण्डली

अथ भावकुण्डलीनिर्णयः। आरम्भसन्धेरधिको विरामसन्धेरल्पो ग्रहः स्वाधिष्ठितभाव एव स्थाप्यः। आरम्भसन्धेरूनो गतभाव एव स्थाप्यः, विरामसन्धेरधिकोऽग्रिमभावे स्थाप्यः, सन्धिराश्यादितुल्यो ग्रहः पूर्वापरभावसन्धिस्थरेखायामेव स्थाप्यः। अथ च भावकुण्डली केवलं फलार्थमेवान्यः सर्वोपि जातकविचारो ग्रहकुण्डल्यैव विधेयः—इति प्रामाणिकप्राचीनाः।

(१०) रूपात्मकभावफलानि ।

र.	चं.	मं.	बु	बृ	शु.	श.
००	००	००	००	००	००	००
२८	११	३९	·५	५८	४०	४६
३३	३८	०८	·५	३०	·१	४६
च	क्ष	क्ष	च	क्ष	क्ष	च

(११) विशोपकात्मकभावफलानि ।

र.	चं.	मं	बु.	बृ.	शु	श.
·९	·३	१३	·१	१९	१३	१५
१२	५२	१५	४१	३०	२०	३५
·३	४०	५५	३३	·१	२९	२६

अत्रान्तरकरणे विशेष उक्तः पद्धतिचिन्तामणौ—"आद्यसन्धिर्ग्रहो भावाच्छोध्यो भावोनके खगे । भावस्थसन्धितश्शोध्यो ग्रहो भावस्तथाधिकः ॥" रूपात्मकफलाद्विशोपकात्मकभावफलानयनमुक्तं मुक्तावल्याम्-"ग्रहसन्ध्यंतरं भावसन्ध्यन्तरविभाजितम् । लब्धम्भावफलं ज्ञेयं तत्त्रिभागो विशोपकाः ॥

(१२)

ग्रहोपरि ग्रहदृष्टिचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
र.	००।००।००	००।२०।५७	००।०५।४५	००।००।००	००।४१।३०	००।००।००	००।१०।२१
चं.	००।३९।०३	००।००।००	००।०६।३७	००।४१।५४	००।५०।३३	००।१२।२०	००।२१।१८
मं.	००।००।००	००।५३।२३	००।००।००	००।००।००	००।१२।४५	००।१४।२२	००।३६।१९
बु	००।००।००	००।१८।०६	००।०८।३५	००।००।००	००।३८।४०	००।००।००	००।२१।४२
बृ.	००।२५।३०	००।२२।१३	००।००।००	००।३४।०१	००।००।००	००।४७।५३	००।१४।०५
शु.	००।०८।३७	००।००।००	००।४३।४४	००।०५।४७	००।०५।४६	०० ००।००	००।४८।४८
श	००।५७।३५	००।३८।३२	००।३६।१९	००।५०।२६	००।००।००	००।१५।१०	००।००।००

(१३)

अथ भावोपरि ग्रहदृष्टिचक्रम् ।

ग्र.	त.	ध.	स.	सु.	सु.	रि.	जा.	मृ.	ध.	क.	आ.	व्य.
र.	००।२७।११	००।११।४२	००।००।००	००।००।००	००।००।००	००।०३।१८	००।२०।३७	००।४१।४२	००।२२।२४	००।१७।११	००।५६।१२	००।४१।४२
चं.	००।००।००	००।००।००	००।०९।४५	००।३५।१५	००।३५।१५	००।११।३०	००।३५।०१	००।५०।४५	००।३५।१५	००।१९।४५	००।०९।१५	००।००।००
मं.	०१।००।००	००।३४।५३	००।१६।५७	००।०१।२७	००।००।००	००।००।००	००।००।००	००।१२।३३	००।९४।१०	००।३२।१४	००।०३।५४	००।५०।१४
बु.	००।२४।२१	००।०८।५१	००।००।००	००।००।००	००।००।००	००।०६।०९	००।२६।१८	००।३८।९१	००।१६।४३	००।२८।३२	००।५३।२२	००।३८।०१
बृ.	००।०२।४९	००।५९।१४	००।४५।१८	००।५७।३६	००।१४।४२	००।००।१२	००।००।००	००।००।००	००।००।१८	००।१६।३६	००।४५।१८	००।५९।४८
शु.	००।०३।३४	००।००।००	००।००।००	००।००।००	००।१२।२५	००।३८।५१	००।३३।३४	००।०६।०९	००।४९।४१	००।४७।०५	००।३२।३५	००।१८।०९
श.	००।४४।४७	००।२८।३४	००।०४।५१	००।५८।१८	००।४३।४७	००।३१।२६	००।५९।०७	००।००।००	००।००।००	००।००।००	००।०४।५१	००।५९।१७

अत्र सुगमोपायः कृष्णदैवज्ञैरुक्तः—“ द्रष्ट्रा वर्जितदृश्यस्य क्रमादेकादिभे दृशः । भागार्द्धं तिथियुग्भागा भागार्द्धोनशराब्धयः । भोग्यांशाः द्विगुणांशाश्च तथा षड्भाधिके क्रमात् । षष्टिः शराब्धयस्त्रिंशत्तिथयोंशदलोनिताः ॥ एकभे नवभे चार्कैर्भुक्तभोग्या द्विसंगुणाः । द्विभशार्द्धोनिता षष्टिरष्टभे खाग्नियुग्लवाः । त्रिसप्तमे तु भौमस्य षष्टिरत्र लवोनिता । सार्द्धांशस्तिथिसंयुक्ता द्विभे रूपं सदाङ्कमे ॥ त्रिसप्तमे तु जीवस्य भागार्धं शरवेदयुक् । द्विगुणैः सदलैश्चोनाः खरसाश्चतुरष्टमे ॥५॥ इति ॥ परमनेन प्रकारेण षष्ट्यंशात्मिका दृष्टिः स्यात् षष्टिभक्ता सती रूपादिका स्यादिति बोद्धव्यम् ।

(१४)

ग्रहाणामुच्चबलम् ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
४०	००	४१	१२	४४	२९	२९
५९	३९	११	३४	५९	३४	२३

अत्र केशवोक्तावयमभिसन्धिः—यदि नीचोनग्रहस्य सम्पूर्णाः षड्राशयः स्युस्तदा रूपमितं बलं स्यात्। यदि षडल्पास्तदा प्रथमं रूपस्थाने शून्यं ग्राह्यं षष्ट्या तद्राश्याद्यं संगुण्यम् ततो विकलास्थानोत्प्रतीपं स्वस्वहारेण लब्धमुपर्युपरि संयोज्य यदूर्ध्वस्थानं भवति तत्पुनः षड्भिर्भाज्यं लब्धं शून्याधः षष्ट्यंशा ज्ञेयाः। शेषं राश्यादिस्थानीयम्, पुनः षष्ट्या संगुण्य प्राग्वत्कृते यदूर्ध्वस्थाने निष्पद्यते तदपि षड्भिर्भाज्यं लब्धं तदधो विषष्ट्यंशाः एवं त्रिष्ठं रूपाद्युच्चबलं भवति सुगमोपायश्च—"नीचखेटान्तरं कार्यं यथा षड्भाल्पकं भवेत्। तदंशा रामभक्ताः स्याल्लिप्ताद्यं तुंगजं बलम्" ॥ १ ॥

(१५)

निसर्गमित्रसमशत्रुचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
मित्र	चं.मं बृ	र. बु.	र.चं.बृ	र.शु.	र.चं.मं	बु.शु.	बु.शु.
सम	बु.	मं बृ.शु.श	शु. श.	मं.बृ.श	श.	बृ.मं	बृ.
शत्रु	शु. श.	०	बु.	चं.	बु.शु.	र.चं.	र.चं.मं

(१६)

तात्कालिकमित्रामित्रचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु	श.
मित्र	मं.चं. बृ.शु.	र.बु.शु	र.बु.बृ. श.	मं.चं.बृ शु.	र.मं.बु. श.	र.मं. चं बु.	बृ.
शत्रु	बु.श.	मं.बृ.श	चं.श.	र.श.	चं. शु.	बृ.श.	र. चं. मं. बु. श.

यत्तु शिवदासनाम्ना जातकमुक्तावल्याम्—"एवं ग्रहेभ्यस्तनुरूपखण्डैः सूर्य्याद्यथावत्समयं विदित्वा। रविद्युमानेन नतं प्रसाध्य खभं ततः प्रोक्तवदेव भावाः। यद्वा ग्रहेभ्यस्तनुरूपकेभ्यो निशार्द्धमर्कादिव साधनीयम्॥ तन्नाड़िकाभिर्द्युचराद्विलग्नं सूर्यं ततो भावविधिर्विधेयः। प्रयोजनन्त्वस्य दशाक्रमादौ केन्द्रादिगानामवबोधनञ्च॥ तत्कालमैत्र्यादिषु चात्र सम्यग् ज्ञेयं बुधैर्यौक्तिकसम्मतत्वादिति" ग्रहभावसाधनं सप्रयोजनमुक्तं तत्प्रामाणिकैर्नीलकण्ठश्रीधरादिभिरनुक्तत्वादुपेक्ष्यम्।

(१७)

अधिमित्रादिचक्रम्।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
अधिमित्र	चं.मं.बृ	र.बु.	र. बृ.	शु.	र.मं.	बु.	०
मित्र	०	शु.	शु.	मं.बृ.	श.	मं.	बृ.
सम	शु.	०	चं.बु.	र. चं.	चं. मं.	र.चं.श.	बु.शु.
शत्रु	बु.	मं.बृ.श	श.	श.	०	बृ.	०
अधिशत्रु	श.	०	०	०	शु.	०	र.चं.मं.

अत्र चण्डेश्वरः—"तत्कालमित्रञ्च निसर्गमित्रं सदाधिमित्रं कथयन्ति सन्तः। मित्रं समो मित्रमिति ब्रुवन्ति मित्रञ्च शत्रुञ्च समम्प्रवीणाः॥ समश्च शत्रुर्भवतीह शत्रुः शत्रुश्च शत्रुर्ह्यधिशत्रुसंज्ञः। विचार्यमेवं गणितागमज्ञैस्तत्कालचक्राच्च निसर्गचक्रात्।"

(१८)

सप्तमांशखण्डकाः।

॰१	॰२	॰३	॰४	॰५	॰६	॰७
४।१७	॰८।३४	॰१२।५१	३७। ९	२१।२६	२५।४३	३०

(१९)

नवमांशखण्डकाः।

०१	०२	०३	०४	०५	०६	०७	०८	०९
३।२०	६।४०	१०। ०	१३।२०	१६।४०	२०।००	२३।२०	२६।४०	३०।००

(२०)

द्वादशांशखण्डकाः ।

०१	०२	०३	०४	०५	०६	०७	०८	०९	१०	११	१२
२।३०	५।००	७।३०	१०।००	१२।३०	१५।००	१७।३०	२०।००	२२।३०	२५।०	२७।३०	३०।०

(२१)

विषमराशौ त्रिंशांशपतयः ।

मं.	श.	बृ.	बु.	शु.
५	५	८	७	५

(२२)

समराशौ त्रिंशांशपतयः ।

शु.	बु	बृ.	श	मं.
५	७	८	५	५

(२३)

सप्तवर्गेश्वरचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ	श अ श	मं श	बृ अमि	श श	शु अ श	बृ श	चं अ श
हो	स्व	स्व	र अमि	र सम	र अमि	चं स	र अ श
द्रे	बु श	मं श	स्व	श श	बु सम	र सम	मं अ श
स	शु सम	शु मि	श श	बृ मि	स्व	बु अमि	शु सम
न	श अ श	स्व	श श	बृ मि	बु सम	मं मि	बृ मि
द्वा	चं अमि	मं श	बृ अमि	मं मि	स्व	स्व	स्व
त्रिं	बृ अमि	शु मि	श श	श श	स्व	स्व	बृ मि

अत्र षड्वर्गस्तु बृहज्जातकादिप्रसिद्ध एवास्ति सप्तांशानाह सारावल्यां कल्याणवर्म्मा- मेषालिमिथुनमृगहरिमीनतुलावृषभचापधराः । कर्कटघटभृत्कन्या पूर्वाश्च सप्तमांशानामिति ।

कं च ०५ में उच्च भउःपं१० अलं० भउःपं मुक

ध : मं ३ उच्च भउःपं३० मूलत्रिकोणे

(२४)
सप्तवर्गबलचक्रम्।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	००।०१।९२	००।०३।४५	००।२२।३०	००।०३।४९	००.०१।५२	००।०३।४५	००।११।५२
हो.	००।३०।००	००।३०।००	००।२२।३०	००।०७।३०	००।२२।३०	००।०७।३०	००।०१।५२
द्रे.	००।०३।४९	००।०३।४५	००।३०।००	००।०३।४५	००।०७।३०	००।०७।३०	००।११।९२
स.	००।०७।३०	००।१५।००	००।०३।४९	००।१५।००	००।३०।००	००।२२।३०	००।०७।३०
न	००।०१।५२	००।३०।००	००।०३।४५	००।४५।००	००।०७।३०	००।१५।००	००।१५।००
द्वा.	००।२२।३०	००।०३।४९	००।२२।३०	००।१५।००	००।३०।००	००.३०।००	००।३०।००
त्रिं	००।२२।३०	००।१५।००	००।०३।४५	००।०३।४५	००।३०।००	००।३०।००	००।१५।००

यत्त्वत्र गृहादिवर्गस्वामी स्वर्क्षादिषु यद्गृहे तदुक्तं बलं ग्राह्यमिति केषाश्चिन्मतं तद्बहुसम्मतत्वादुपेक्ष्यम्। अथ स्वोच्चत्रिकोणस्वगृहाणां त्रयाणां द्वयोर्वा सम्भवे सति सारावल्यां निर्णय उक्तः। "विंशत्यंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य, उच्चंभागतृतीयं वृष इन्दोः स्यात्त्रिकोणमपरेंशाः। द्वादश भागा मेषे त्रिकोणमपरे स्वभन्तु भौमस्य। उच्चमथो कन्यायां बुधस्य तिथ्यंशकैः सदा चिंत्यम्॥ परतस्त्रिकोणजातं पञ्चभिरंशैः स्वराशिजं परतः। दशभिर्भागै-र्जीवस्य त्रिकोणफलं स्वभं परश्चापे॥ शुक्रस्य तु तिथयोंशास्त्रिकोणमपरे तुले स्वराशिश्च। कुम्भे त्रिकोणनिजभे रविजस्य रवेर्यथा सिंहे।"

(२५) सप्तवर्गजबलम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
·१	१	·१	·१	·:	·१	·१
२६	४१	४८	·३	·९	५६	१३
५९	१५	४६	४५	२२	१५	६

(२६) युग्मायुग्मभांशबलम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
१५	३०	१५	३०	१५	१५	१५
००	००	००	००	००	००	००

यद्येषां राशिर्नवांशश्चेति द्वयमपि सममसमं वा भवति तदा चरणद्वयं बलमर्थतः सिद्धं प्रति निमित्तं नैमित्तिकस्य युक्तत्वादिति कृष्णोक्तिरेवात्र गरीयसी, अन्यमतं प्रौढमनोरमाकारेण दूषितम्।

(२७)

केन्द्रादिबलम् ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	०१
३०	३०	१५	३०	३०	१५	००
००	००	००	००	००	००	००

अत्र "केन्द्रादेः खण्डका ज्ञेयाः षष्टित्रिंशच्छरेन्दवः। खण्डान्तरेण गुणितात् पूर्वभावग्रहान्तरात् ॥ भावान्तरविभक्तात्तहीनयुक्तस्तया-ढ्कितः। बलं केन्द्रादिजं तत्स्याल्लिप्ताद्यमनुपातत" इति धर्मेश्वरोक्तिरग्राह्या प्रामाणिकाचार्यानुक्तेः।

(२८)

द्रेष्काणबलम् ।

र.	चं	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
००	००	००	००	००	१५	१५
००	००	००	००	००	००	००

(२९)

स्थानबलम् प्र ।

र.	चं.	मं.	बु	बृ.	शु.	श.
·२	·२	·२	·२	·३	·३	·३
५५	४१	५९	१६	३६	१०	१२
५८	५४	५६	१९	२१	४९	२९

(३०)

दिग्बलम् द्वि. ।

र.	च.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
·७	३३	२०	२३	१०	५१	३०
·८	१०	५८	४६	२८	२३	·९

अत्र विधिः सुगमोपायश्चोच्चबलानयने वेद्यः।

(३१)

नतोन्नतबलम् ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	०१	००	००	००
७	५२	५२	००	७	·७	५२
·२	५८	५८	००	·२	·२	५८

अत्र सुगमोपाय उक्तः कृष्णदैवज्ञेन—"शशाङ्कभौममन्दानां नतं द्विघ्नं कलादिकम्। षष्टिशुद्धं तदन्येषां सदा रूपं बुधस्य तु" इति।

(३२)

पक्षबलम् ।

र.	चं.	मं.	बु.	बृ	शु.	श.
००	००	००	००	००	००	००
२६	३३	२६	२६	३३	३३	२६
०२	५८	०२	०२	५८	५८	०२

पद्धतौ सर्वत्र ग्रहाणां सौम्यपापत्वं यवनेश्वरवाक्याद्बोध्यम्। तद्वाक्यं यथा—'क्रूरग्रहार्कः कुजसूर्य्यजौ तु पापौ शुभाः शुक्रशशांकजीवाः। सौम्यस्तु सौम्यो व्यतिमिश्रितोन्यैः पापैश्च तुल्यप्रकृतित्वमेतीति"। अथ गतैष्यतिथ्यनपेक्षः सुगमोपायः कमलनयनमिश्रपद्धतौ — "अर्केन्द्वोरन्तरादंशाद्रामाप्तं पक्षजं बलम्। शुभानां तद्बलं ज्ञेयं पापानां षष्टितश्च्युतमिति। अथ गतैष्यतिथ्यानयनं प्रौढमनोरमायाम्—"सूर्य्योनचन्द्रस्य लवार्क-

भागो गता तिथिः षष्टिगुणावशेषात् । द्विचन्द्रलब्धं घटिकादि चान्द्रं भवेदिदं पक्षबलस्य सिद्धयै। कृष्णे तु पक्षे खगुणाच्च्युतासौ गता तिथिः सावयवा गता स्यात्।" इति। भक्ताव्यर्कविधोर्लवा इत्यादिनानीता घटिका नात्रोपयुज्यन्ते। तासां सावनत्वादिति न साध्याः।

(३३)

दिनरात्रित्रिभागबलम्।

र.	च.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	·१	·१	००
००	००	००	००	००	००	००
००	००	००	००	००	००	००

(३४) वर्षेशादिबलम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	·१	००	००	००	००	००
३०	१५	००	४५	००	००	००
००	००	००	००	००	००	००

(३५) कालबलम्। तृ०

र.	चं.	मं.	बु.	बृ.	शु.	श.
·१	·२	·१	·२	·१	·१	·१
·३	४१	१९	११	४१	४१	१९
·४	५६	००	·२	००	००	००

अथ वर्षेशमासेशयोरानयनमुक्तं नीलकण्ठपद्धतौ—"कलिगतदिनवृन्दस्त्र्यद्रिरामैर्विहीनो नखशरकरतष्टो द्विःस्थितोऽभ्रांगरामैः। खशिखिभिरथ लब्धे त्रिद्विनिघ्ने सरूपे तदनु तुरगतष्टे वर्षमासाधिपौ स्तः॥" इति॥ एवं सूर्य्यसिद्धान्तोक्त्याऽऽनीतवर्षेशमासेशावेवागच्छतः। यत्तु ब्रह्मसिद्धान्तमतेनानयनं केशवदैवज्ञेन स्वपद्धतिटीकायामुक्तन्तत्सम्प्रदायानुरोधान्नाङ्गीकृतमित्यवगन्तव्यम्। यत्र वारे रव्यादिके जन्म स एव दिनेश इति स्पष्टम्॥ होरेशानयनमपि नीलकण्ठपद्धतौ—"स्वर्णं कृत्वेष्टकाले चरदलविघटीर्याम्यसौम्यार्कगोले रेखायाः प्राक्परस्तादृणमथ च धनं स्वस्वदेशान्तरं हि। शिष्टा वारप्रवृत्तेरिह गतघटिकास्ता द्विनिघ्नाः शराप्ता वारेशात्कालहोरा रविसितशशिजेन्द्वार्किजीवारनाथाः इति"॥ केचित्तु—"तत्कालार्कन्यूनलग्नांशपिण्डो भक्तः पञ्चत्रोणिभिर्भुक्तहोरा इत्यनेन होरेशमाहुस्तन्न ग्राह्यं सकलशिष्टसम्प्रदायविरोधात्, इति।

(३६) क्रान्त्यंशाः।

र.	चं	मं.	बु.	बृ.	शु.	श.
१०	१८	·५	१२	२२	२२	१८
२७	२८	५६	२९	२६	५१	२७
२६	·२	२८	१५	३४	५६	५८
द	द	उ	द	उ	द	उ

तत्साधनं ग्रहलाघवे-"चत्वारिंशदशीतिरद्रिकुभुवः कलेन्दवो भूधृती षट्खात्त्रीणि जिनाश्विनोऽङ्कविकृती खाब्ध्यश्विनःसायनात्। खेटाद्दोर्लवदिग्लवप्रमगतैर्कोऽसौ-

तदूनागताच्छेषघ्नाद्दशलब्धियुग्द-शहृतोंशाद्योपमः स्यात्स्वदिक्'' इति

(३७)

आयनबलम् ।

र.	चं.	मं.	बु.	बृ	शु	श.
००	००	००	००	००	००	००
१६	५३	३७	४५	५८	०१	०५
५६	०५	२६	३७	०	१५	५५

अत्र सुगमोपायः स्पष्टक्रान्तेर्बलानयननिराशश्च पद्धतिप्रकाशे- "याम्योत्तरैः स्वांघ्रियुतापमांशैर्युतायुताः पूर्णगुणाः शनीन्द्वोः । व्यस्तं परेषामनिशं बुधस्य युता भवेदायनवीर्यमेतत् । गणेशदामोदरसूर्यमुख्यैः स्पष्टापमात्साधितमात्मतन्त्रे । उपेक्षितत्वाद् गुरुकेशवाद्यैरयुक्तमेवेति सुधीभिरुह्यम् ॥ २ ॥ इति

(३८)

चेष्टाकेन्द्रम् ।

र.	चं.	मं	बु.	बृ.	शु.	श.
००	००	१०	११	·८	·८	·६
००	००	·८	२९	१७	९	२४
००	००	१९	३१	४७	१९	४५
००	००	४४	५६	३३	३९	१५

अत्र केशवोक्तावयमभिसन्धिः सन्धिसाधनवदेव बोध्यः ॥

(३९)

चेष्टाबलम् ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
१६	३२	१७	००	३४	३६	५१
५६	५८	१२	०९	४	५३	४५

(४०)

स्पष्टचेष्टाबलम् । चतु०

र.	चं.	मं	बु.	बृ.	शु.	श
००	·१	००	००	·१	००	००
३३	२७	५४	४९	३२	३८	५८
५२	·३	३९	४६	·७	१८	४०

अत्र भजनविधिः सुगमोपायश्चोच्चबलानयनवदवगम्यः ।

(४१)

नैसर्गिकबलम् । पञ्च०

र.	चं	मं.	बु	बृ.	शु.	श.
·१	००	००	००	००	००	००
००	५१	१७	२५	३४	४२	८
००	२६	·९	४३	१७	५१	३४

अत्र सुगमोपायो मयोच्यते । वियन्नागाश्चतुस्त्रिंशद्घना एभिर्युताः पुनः । पुनरेव भवेद्वीर्य्यम्मन्दारादिक्रमाद्द्रुतमिति ॥ १ ॥

(४२)

दृग्बलम् । षष्ठम्

र.	चं.	मं.	बु	बृ.	शु.	श.
००	००	००	८०	००	००	००
·६	२७	००	·७	·९	·७	·४
२३	११	·८	५९	४९	४०	००
ध	ऋ	ऋ	ध	ऋ	ध	ध

(४३)

षड्लैक्यम् ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
५	·७	·५	·६	७	·७	६
४६	४८	५१	१०	२८	२८	१२
२५	१८	३७	२५	·४	·१	५०

अत्रेदं तत्त्वं यस्य दृग्बलमानीयते तं प्रति या दृष्टयः सन्ति तन्मध्ये शुभदृष्टीनां योगस्य पापदृष्टीनां योगस्य च चतुर्थांशः पृथक्कार्य्यः तयोरन्तरं दृग्बलं स्यात् तच्च शुभदृष्टिचतुर्थांशात्पापदृग्योगचतुर्थांशे शुद्धे धनात्मकमितरथार्णमिति ।

स्थानदिक्कालनिसर्गचेष्टादृग्बलानां योगे कृते षड्बलैक्यं स्यात् तदेवात्र बलशब्देन व्यवह्रीयते, अथ जन्मसमये ग्रहयुद्धे विशेषः ॥ आदौ सर्वेषां षड्बलैक्यं प्रसाध्य ययोः ग्रहयोर्युद्धम्भवति तयोः षड्बलैक्ययोरन्तरं रूपादिफलात्मशरयोरन्तरेण भाज्यम् । दक्षिणदिक्स्थग्रहस्य षड्बलैक्ये शोध्यमेवंकृते तयोः षड्बलैक्ये स्फुटे स्तः । शरान्तरन्तु समदिशोश्शरयोरन्तरेण भिन्नदिशोर्योगेन भवति । यस्योत्तरः शरः स उत्तरदिक्स्थो ग्रहो दक्षिणशरो दक्षिणदिक्स्थो, दिक्साम्ये यस्याल्पशरः सोन्यदिक्स्थ इति, शरानयनप्रकारो ग्रहलाघवे—'खाम्बुधयः खयमाः खभुजङ्गाः खाङ्कमिताः खदश क्रमशः स्युः । पातलवाः कुसुताद्बुधभृग्वोर्मध्यमचञ्चलकेन्द्रविहीनाः । कुद्वित्र्यब्धियुगाश्विनो दलचयश्चेत्षड्भपुष्टं चलं केन्द्रञ्चक्रविशुद्धमस्यभमिताद्धैक्य लवघ्नागतात्। त्रिंशल्लब्धयुतं कुजात् कुयमलाब्धीन्द्वद्रिभक्तं क्रमात्तद्धीना धृतिरिष्विला गुणभुवो गोब्जा इना द्राक्श्रुतिः ॥ मन्दस्पष्टखगात्स्वपातरहितात्क्रांत्यंशकाः केवलात्कर्णात्ताख्रियमाहतो अथ गुरोश्चेल्लोचनाप्ताः पुनः । स्वाङ्घ्रयूना असृजोंगुलादिकशरः पातोनदिक्स्यादसौ त्रिघ्नः स्यात् कलिकादिकः स्फुटतरस्तत्संस्कृतश्चापमः" ॥ इति ॥ अत्र त्रिज्यैकादश । अथ युद्धलक्षणं समागमास्ताभावकालीनभौमादिपञ्चकान्यतमयोः स्पष्टग्रहयोराश्यंशकलासाम्यं युद्धम्, समागमस्तु अंशाधिके याम्योत्तरान्तरे यदा द्वावपि त्रिज्याल्पकर्णका तदा भवतीति ज्ञेयम् ।

(४४)

भावानां स्वामिबलम् । प्र.

त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
·७	·५	·७	·६	·६	·७	·५	·७	·६	·७	·९	·६
११	५१	२८	१२	१२	२८	५१	१२	१०	४८	४६	१०
·१	३६	·४	९२	५२	·४	३७	·१	२९	१८	२५	२९

(४५)

दृग्बलम् । द्वि.

त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
००	·१	००	·१	००	००	००	००	००	००	·१	·१
१०	·१	५३	·५	१६	·८	१६	२६	१५	४६	२९	००
२४	५३	३७	१६	२०	४६	५७	४८	००	१९	५२	३६
ऋ	ध	ध	ध	ध	ध	ध	ध	ध	ध	ध	ध

(४६)

दृग्बलम् । तृ.

त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
·१	००	००	·१	००	००	००	००	००	००	००	००
००	१०	१०	००	१९	४०	२६	३९	२०	००	५०	५०
००	२०	२०	००	२०	४०	·१	२०	४०	००	२०	२०

नृचतुष्पदादिज्ञानं रत्नकलापे—"नृयुक्कुम्भतुलाकन्याचापाद्यार्द्धश्च मानुषाः । चापान्त्यार्द्धं मृगाद्यार्द्धं गोसिंहाजाश्चतुष्पदाः । मृगांत्यार्धं कर्किमीनावाप्याःकीटश्च वृश्चिक" इति अत्र कुम्भो जलचरः कर्कः कीट इत्यबहुसम्मतत्वान्नादरणीयम् ।

(४७)

भावानां स्फुटबलम् ।

त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
·८	·७	·८	·८	·६	·८	·६	·८	·६	·८	·८	·८
·१	·३	३२	१८	५१	१७	३७	२१	४६	३४	·६	·१
३७	५०	·१	४८	३२	३०	३५	·९	·५	३७	३७	२१

(४८)
चेष्टाकेन्द्रम्।

र.	०२।०३।२१।३१
चं.	०।१८।०६।३७

(४९)
चेष्टावलम्।

र.	००।२१।०७
चं.	००।३३।५८

(५०)
उच्चरश्मयः।

र.	चं.	मं.	बु.	बृ.	शु.	श.
॰५	॰१	॰४	॰२	॰५	॰३	॰३
॰५	॰३	॰७	१५	२९	५७	०६
५५	४१	॰५	२६	०५	२७	१६

(५१)
चेष्टारश्मयः।

र.	चं.	मं.	बु.	बृ.	शु.	श
॰३	॰४	॰३	॰१	॰४	॰४	०६
॰६	२३	४३	००	२४	४१	१०
४३	४७	२१	५६	२५	२१	२९

अत्रोच्चचेष्टावलयोरङ्कचतुष्टयं प्रगृह्य केशवोक्तोच्चचेष्टारश्मी साध्यौ अन्यथा श्रीपत्युक्तानीतरश्मेस्तृतीयाङ्केन विसंवादः स्यात्। अत्र श्रीपतिप्रकारे सुगमोपाय उक्तः कृष्णदैवज्ञैः—''नीचोनितस्पष्टतरो ग्रहेंद्रः षड्भाधिको मण्डलतो विशोध्यः। राशौ सरूपे द्विगुणे लवाद्ये भवेयुरुच्चाख्यमरीचयोऽत्र। चेष्टाकेन्द्रेऽधिके षड्भाच्चक्रात्तत्प्रविशोधयेत्। राशौ सैके लवाद्ये तु द्विघ्ने चेष्टामरीचयः। पद्धतीया रश्मयश्चेष्टोच्चगुणकसाधनार्थं ज्ञेया न तु फलादेशार्थमिति सम्यङ्निरूपितं केशवपद्धतिटीकायां श्रीधर्म्मेश्वरदैवज्ञेन। इति।

(५२)
उच्चफलम्।

र.	चं.	मं.	बु.	बृ.	शु.	श
००	००	००	००	००	००	००
४०	००	४१	१०	४४	२९	२९
०९	३९	११	३४	५९	३४	२३

(५३)
चेष्टाफलम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
२१	३३	१७	००	३४	३६	५१
॰७	५८	१३	०९	४४	५३	४५

अत्र रूपोनरश्मयः पदं (गच्छमानं) ततः सैकपदघ्नपदार्थमथैकाद्यंकयुतिः किल सङ्कलिताख्येति लीलावत्युक्तप्रकारेण साधितसङ्कलितमेव श्रेढीफलं स्यात्। अत्र सुगमोपायस्तत्र मामकं पद्यम्। व्येकौ चेष्टोच्चकिरणौ षड्भिर्भक्तौ तदाह्वये। फले लाघवरीत्या स्तः श्रीपत्युक्तप्रकारतः॥ इति वस्तुतस्तु पूर्वसाधितोच्चचेष्टावले एवोच्चचेष्टाफले इति।

(५४)
चेष्टोच्चबलघातः।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
१४	००	११	००	२५	१८	२५
२१	२१	४९	०२	३२	१०	२१

(५५)
चेष्टोच्चबलोनैकघातः।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
१२	२५	१३	४७	·६	११	·४
१६	४५	२९	१९	२९	४४	१३

अत्र गोमूत्रिकागुणनप्रकारो मयोच्यते—"आदौ रूपाद्यवयवात्मकं गुण्यं विलिख्य तस्य षष्ट्यंशाद्यवयवाधस्तात्तस्यैव रूपाद्यवयवान् पुनर्लिखेदेवं तदधोपि-विलिख्य गुणकस्य रूपाद्यवयवैः क्रमेण गुणयेत् ततो गुणितांकानामधो रेखां कृत्वा यत्रोर्द्ध्वाधः क्रमेणांकयोरङ्कानां वा पंक्तिर्भवेत् तत्र तद्योगं विधायान्यत्र यथास्थितं तदधो लिखेत्ततोन्त्याङ्के षष्ट्या विभक्तलब्धमुपान्तिमांके योजयेत्तमपि षष्ट्या विभज्य लब्धिं स्वपृष्ठांके योजयेदेवं प्रथमांकं यावदेवं य आदितस्त्रिष्ठांकस्तद्गुणनफलं स्यात्। अत्र मत्पद्यम्। चेष्टोच्चबलयोगोना सरूपा च तयोर्हतिः। चेष्टोच्चबलहीनैकघाततुल्या प्रजायते॥

(५६)
इष्टम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
२९	·४	२६	·१	३९	३३	३९
२५	४२	३८	३०	·९	·३	·०

(५७)
कष्टम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	००	००	००	००	००	००
२७	३९	२८	५२	१९	२६	१५
१२	१९	२३	१७	४३	३२	५४

अत्र मूलानयनविधिः सिद्धान्ततत्त्वविवेके-"षष्टिवर्गगुणादङ्कान्मूलं ग्राह्यं यदागतम्। सैकशेषं षष्टिगुणं द्वियुग्द्विघ्नपदोद्धृतम्। लब्धमागतमूलस्यावयवश्चेति तत्पदम्। इति षष्टिवर्गगुणादङ्कादित्यत्र प्रथमाङ्कः षष्टिगुणो द्वितीयांके युक्तः पुनरप्येवमेवेति सवर्णनं लब्धार्थं कर्तव्यम्॥ निरग्रमूलानयनमपि तत्रैव—'अन्त्यं यावदिहाद्यंकादूर्ध्वतिर्य्यक्स्वरेखया। संज्ञा स्थानांककानाञ्च विषमाख्यसमक्रमात्। त्यक्त्वान्त्याद्विषमाद्वर्गं द्विघ्नतन्मूलहृत्समः लब्धवर्गश्च विषमादाद्याच्छोध्यः पुनः पुनः क्रियैवं सर्वमूलाङ्कं यावत्तत्र पदानि च॥ अन्त्यस्थानात्क्रमेनैवं मूलं स्वीयमुदाहृतम्" इति अत्र मूलं न ग्राह्यमिति मतं तथा चेष्टोच्चबलयोगार्द्धमिष्टं तदूनैकं कष्टमिति च मतं सम्प्रदायविरोधादग्राह्यमेव॥ इति॥

(५८)

इष्टघ्नषड्बलैक्यम् ।

र.	चं.	मं.	बु.	वृ.	शु.	श.
·२	००	·२	००	४	·३	·४
४९	३६	३६	·९	५२	५७	·२
५०	४१	·५	१६	२२	५४	२२

(५९)

कष्टघ्नषड्बलैक्यम् ।

र.	चं.	मं.	बु.	वृ.	शु.	श.
·२	·५	·२	·५	·२	·३	·१
१७	·६	४६	२८	२७	११	३८
·३	५२	२०	५७	१४	·३	४९

(६०)

इष्टघ्नग्रहदृष्टिचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	वृ.	शु.	श.
र.	००।००।००	००।१०।१६	००।०२।४९	००।००।००	००।२०।२१	००।००।००	००।०९।०४
चं.	००।०३।०४	००।००।००	००।००।३१	००।०३।१७	००।०३।५८	००।००।५८	००।०१।४१
मं.	००।००।००	००।२३।४२	००।००।००	००।००।००	००।०५।६०	००।०६।२३	००।१६।०५
बु.	००।००।००	००।००।२७	००।००।१३	००।००।००	००।००।५८	००।००।००	००।९०।३३
बृ.	००।१६।३८	००।१४।३०	००।००।००	००।२२।१२	००।००।००	००।३१।१५	००।०९।११
शु	००।०४।४५	००।००।००	००।२४।०५	००।०३।११	००।०३।११	००।००।००	००।२६।५३
श	००।३०।५६	००।२५।०३	००।२३।३६	००।३२।४७	००।००।००	००।०२।५१	००।००।००

(६१)

कष्टग्रहदृष्टिचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
र.	००।००।००	००।०९।३०	००।०२।३६	००।००।००	००।१८।४९	००।००।००	००।०४।४२
चं.	००।२५।३५	००।००।००	००।०४।२०	००।२७।२७	००।३३।०७	००।०८।०५	००।१४।०४
मं.	००।००।००	००।२५।१५	००।००।००	००।००।००	००।०६।०२	००।०६।४८	००।१७।११
बु.	००।००।००	००।१६।०४	००।०७।३७	००।००।००	००।३४।२०	००।००।००	००।१९।१६
बृ.	००।०८।२३	००।०७।१८	००।००।००	००।११।१२	००।००।००	००।१५।४४	००।०४।३८
शु.	००।०३।४६	००।००।००	००।१९।२०	००।०२।३३	००।०२।३३	००।००।००	००।२१।३५
श.	००।१२।३७	००।१०।१३	००।०९।३७	००।१३।२२	००।००।००	००।०४।०१	००।००।००

(६२)

इष्टग्रभावदृष्टिचक्रम्—

ग्र.	त.	ध.	स.	सु.	सु.	रि.	जा.	मृ.	ध.	क.	आ:	व्य.
र.	००।१३।२०	००।०५।४०	००।००।००	००।००।००	००।००।००	००।०१।३७	००।१०।०६	००।२०।२७	००।१०।५९	००।८।२५	००।२७।३३	००।२०।२७
चं.	००।००।००	००।००।००	००।००।४६	००।०२।४७	००।०२।४६	००।००।५४	००।०२।४५	००।३।५९	००।०२।४६	००।०१।३२	००।००।२५	००।००।००
मं.	००।२६।३८	००।१५।२९	००।०७।३१	००।००।३९	००।००।००	००।००।००	००।००।००	००।०५।३४	००।२४।०३	००।१४।३६	००।०१।४४	००।२२।१८
बु.	००।००।३७	००।००।१३	००।००।००	००।००।००	००।००।००	००।००।०९	००।००।३९	००।००।५८	००।००।२५	००।००।४३	००।०१।२०	००।००।५८
बृ.	००।०१।४८	००।३८।२९	००।२९।३३	००।३७।३५	००।०९।३५	००।००।०८	००।००।००	००।००।००	००।००।१२	००।१०।५०	००।२९।३३	००।३९।०१
शु.	००।०१।५८	००।००।००	००।००।००	००।००।००	००।०६।५०	००।२१।२४	००।१८।२९	००।०३।२३	००।२७।२२	००।२५।१६	००।१७।५७	००।०९।५८
श.	००।२५।०७	००।१८।३४	००।०३।०९	००।३७।५४	००।२८।२८	००।२०।२६	००।३८।२६	००।००।००	००।००।५०	००।००।००	००।०३।०३	००।३८।३२

(६३)

कष्टघ्नभावदृष्टिचक्रम् ।

ग्र.	त.	ध.	स.	सु.	सु.	रि.	जा.	मृ.	ध.	क.	आ.	व्य.
र.	००।१२।१९	००।०५।१८	००।०० ००	००:००।००	००।००.००	०० ०१।३०	००।०९।२१	००।१८।५४	००।१०।०९	००।०७।४७	००।२५।२९	००।१८।९४
चं.	००।००:००	००।००:००	००।०६।२३	००।२३।१५	००।२३।०६	००।७ ।३२	००।२२।५७	००।३३।१९	००।२३:०६	००।१२।५६	००।०३।२६	००।००:००
मं.	००।२८।२३	००।१६।२०	००।०८।०१	००।००।४१	००।००।००	००।००।००	००।००।००	००।०५।५६	००।२५।३७	००।१५।३४	००।०१।५१	००।२३।४०
बु.	००।२१।३७	००।०७।५२	००।००।००	००।००।००	००।००:००	००।०५।२८	००।२३।२१	००।३४।२०	००।१४।५१	००।२५।२५	००।४७।२४	००।३४।२०
बृ.	००।००।९४	००।१९।२८	००।१४।५३	००।१८।५६	००।०४।५०	००।००।०४	००।००।००	००।००।००	००।००।०६	००।०५।२७	००।१४।९३	००।१९।३९
शु.	००।०१।३५	००।००:००	००।००:००	००।००:००	००।०५।२९	००।१७।११	००।१४।५१	००।०२।४३	००।२१.५८	००।२०।४९	००।१४।२५	००।०८।००
श.	००।११।५२	००।०७।३४	००।०१।१७	००।१५।२७	००।११।३६	०० ०८।२०	००।१५।४०	००।००:००	००।००:००	००।००।००	००।१ ।१७	००।१५।४३

अत्र दृश्येष्टकष्टाभ्यां स्वं प्रति ग्रहदृशो गुणनीया इति विश्वनाथप्रभृत्युक्तिः । एतन्मतं दूषितं श्रीकृष्णदैवज्ञैः । दृश्यानां भावानामिष्टकष्टयोरभावात् तद्दृष्टीनामिष्टकष्टवशेन स्फुटीकरणमशक्यमेव स्यात्किञ्चिद्व्युत्पत्तिबलादप्ययमेवार्थो लभ्यते तथा हि सर्वग्रहाणाञ्च दृशः फलाभ्यामित्यत्र कस्य षष्ठ्यन्तस्योभयत्र सम्बन्धाद्यस्य दृष्टिस्तस्येष्टकष्टाभ्यां गुणिता स्फुटा भवतीत्यर्थः सम्पद्यते तत्र षष्ठ्यन्तस्य द्रष्टृत्वं दृश्यत्वञ्चेति परं विचारस्तत्र राज्ञो दृष्टिर्गुरोर्दृष्टिरित्यादौ षष्ठ्यन्तस्य द्रष्ट्रर्थे च व्युत्पन्नत्वात् राज्ञः कृपादृष्टिरिति वत्सेवकस्य कृपादृष्टिरिति प्रयोगाभावाच्च प्रकृतेपि सर्वग्रहाणां द्रष्टृणामित्येवार्थो व्युत्पत्तिबलाल्लभ्यत इति बलदृग्गुणनं व्यर्थमेवेति सुन्दरमिश्रमतं सर्वथा विरुद्धमेव ।

(६४)

॥ शुभचक्रम् ॥

ग्र	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	००।०१।५२	००।००।००	००।२२।३०	००।०३।४५	००।०१।५२	००।०३।४५	००।०१।५२
हो	००।१५।००	००।१५।००	००।११।१५	००।०३।४५	००।११।१५	००।०३।४५	००।००।५६
द्रे.	००।०१।५२	००।०१।५२	००।१५।००	००।०१।५२	००।०३।४५	००।०३।४५	००।००।५६
स.	००।०३।४५	००।०७।३०	००।०१।५२	००।०७।३०	००।१५।००	००।११।१५	००।०३।४५
न.	००।००।५६	००।१५।००	००।१ ।५२	००।०७।३०	००।०३।४५	००।०७।३०	००।०७।३०
द्वा	००।११।१५	००।०१।५२	००।११।१५	००।०७।३०	००।१५।००	००।१५।००	००।१५।००
त्रिं	००।११।१५	००।०७।३०	००।०१।५२	००।०१।५२	००।१५।००	००।१५।००	००।३७।३०
यो.	००।४५।५५	००।४८।४४	१।०५।३६	००।३३।४४	०१।०५।३७	०१।००।००	००।३७।२९

(६५)

अशुभचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	वृ.	शु.	श.
गृ.	००।५८।०८	०१।००।००	००।३७।३०	००।५६।१५	००।५८।०८	००।५६।१५	००।५८।०८
हो.	००।१५।००	००।१५।००	००।१८।४५	००।२६।१५	००।१८।४५	००।२६।१५	००।२९।०४
द्रे.	००।२८।८	००।२८।८	००।१५।००	००।२८।८	००।२६।१५	००।०६।१५	००।२९।०४
स.	००।२६।१५	००।२२।३०	००।२८।०८	००।२२।३०	००।१५।००	००।१८।४५	००।२६।१५
न.	००।२३।०४	००।१५।००	००।२८।०८	००।२२।३०	००।२६।१५	००।२२।३०	००।२२।३०
द्वा.	००।१८।४५	००।२८।०८	००।१८।४५	००।२२।३०	००।१५।००	००।१५।००	००।१५।००
त्रि.	००।१८।४५	००।२२।३०	००।२८।०८	००।२८।०८	००।१५।००	००।१५।००	००।२२।३०
यो.	०३।१४।०५	०३।११।१६	०२।५४।२४	०३।२६।१६	००।५४।२३	०३।००।००	०३।२२।३१

अत्र विशेषः। यत्र स्वोच्चं नीचं मूलत्रिकोणं वा सम्भवति तत्र मित्रादिजं शुभं न ग्राह्यमिति । सुगमोपायस्तु शुभैक्यं चतुर्भ्यः शोधितमशुभैक्यम्भवतीति, अत्र वर्गेशः स्वोच्चादिषु यत्र तिष्ठति तत्रत्यं फलं ग्राह्यमिति वहुसम्मतमपि सम्प्रदायानुरोधान्नाङ्गीकृतम् । यत्तु "गृह एव स्थापितस्य शुभाशुभस्य चार्द्धं होरादौ सममेव स्थाप्यमिति सुन्दरमिश्रमतं युक्तियुक्तम्"—प्रौढ़मनोरमायामुक्तं तदग्राह्यं "होरादौ गृहवदागतशुभशुभयोर्दलं स्थाप्यमिति" केशवोक्तेः सम्प्रदायपरिगृहीतत्वात्। यत्तु नीलकण्ठपद्धतौ सुन्दरमिश्रमताभिप्रायेण शुभाशुभैक्यमभिधाय शुभाशुभपंक्तौ केशवोक्तिवत्स्थापितं तद्वासनाशून्यं सम्प्रदायविरुद्धं च ॥

(६६) शुभ-पंक्तिः ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	००।११।२९	००।१२।११	००।१६।२५	००।८।२	००।१६।२३	००।१५।००	००।०९।२२
हो.	००।०५।४४	००।०६।०५	००।०८।१२	००।०४।१३	००।८।१२	००।०७।३०	००।०४।४१
द्रे.	००।०५।४४	००।०६।०५	००।०८।१२	००।०४।१३	००।०८।१२	००।०७।३०	००।०४।४१
स	००।०५।४४	००।०६।०५	००।०८।१२	००।०४।१३	००।०८।१२	००।०७।३०	००।०४।४१
न.	००।०५।४४	००।०६।०५	००।०८।१२	००।०४।१३	००।०८।१२	००।०७।३०	००।०४।४१
द्वा.	००।०५।४४	००।०६।०५	००।०८।१२	००।०४।१३	००।०८।१२	००।०७।३०	००।०४।४१
त्रिं.	००।०५।४४	००।०६।०५	००।०८।१२	००।०४।१३	००।०८।१२	००।०७।३०	००।०४।४१

(६७) अशुभपंक्तिः ।

ग्र.	र.	चं.	मं.	बु.	बृ	शु.	श.
गृ	००।४८।३१	००।४७।४९	००।४३।३६	००।५१।३४	००।४३।३६	००।४५।००	००।५०।३८
हो.	००।२४।१५	००।२३।५४	००।२१।४८	००।२५।४७	००।२१।४८	००।२२।३०	००।२५।१९
द्रे.	००।२४।१५	००।२३।५३	००।२१।४८	००।२५।३७	००।२१।४८	००।२२।३०	००।२५।१९
स.	०।२४।१५	००।२३।५४	००।२१।४८	००।२५।४७	००।२१।४८	००।२२।३०	००।२५।१९
न.	००।२४।१५	००।२३।५४	००।२१।४८	००।२५।४७	००।२१।४८	००।२२।३०	००।२५।१९
द्वा.	००।२४।१५	००।२३।५४	००।२१।४८	००।२५।४७	००।२१।४८	००।२२।३०	००।२५।१९
त्रिं.	००।२४।१५	००।२३।५४	००।२१।४८	००।२५।४७	००।२१।४८	००।२२।३०	००।२५।१९

अत्र सुगमोपायः—चतुर्भक्तं शुभैक्यं रूपाच्छुद्धं चतुर्भक्ताशुभैक्यं स्यादिति यद्यप्यत्र स्वोच्चे रूपमित्यादिना गृहस्थापितस्यैव शुभाशुभस्य चतुर्थांशः स्थाप्य इति वासनासिद्धतया युक्तमिति प्रौढ़मनोरमाकारोक्तिस्साध्वी तथापि पद्धतिकृतामनभिमुक्तत्वान्नास्माभिस्तथा कृतम्। न च ये खेचरोच्चादीत्यादिना श्रीपतिना गृहशुभाशुभस्यैव चतुर्थांशः स्थापितो न तु योगस्येति वाच्यम्, तट्टीकाकृता कृष्णदैवज्ञेन खेचरोच्चदिफले शुभाशुभे इत्यस्य पूर्वोक्ते शुभाशुभयोरैक्ये इति व्याख्यानात्तथोदाहृतत्वाच्च।

(६८)

वर्गांशशुभयुतिगुणितशुभपंक्तिचक्रम्।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	००।०७।१०	००।१३।१९	००।१७।५६	००।०५।१६	००।१६।२४	००।१६।२४	००।०७।३६
हो.	००।०४।२३	००।०४।५६	००।०६।१७	००।०३।०४	००।०६।१७	००।०६।०५	००।०३।३५
द्रे.	००।०३।१३	००।०६।३९	००।०८।५८	००।०२।१८	००।०४।३७	००।०५।४४	००।०५।०७
स.	००।०५।४४	००।०६।०५	००।०५।०७	००।०४।३७	००।०८।५८	००।०४।१३	००।०४।४१
नं.	००।०३।३९	००।०४।५६	००।०५।०७	००।०४।३७	००।०४।३७	००।०८।१२	००।०५।०७
द्वा.	००।०४।३९	००।०६।३९	००।०८।५८	००।०६।५७	००।०८।५८	००।०७।३०	००।०२।५६
त्रि	००।०६।१६	००।०६।०५	००।०५।०७	००।०२।३८	००।०८।५८	००।०७।३०	००।०५।०७

(६६)

वर्गांशाशुभयुतिगुणिताशुभपंक्तिचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	०२।४३।४५	०२।१८।५९	०२।०६।४३	०२।५४।०३	०२।१०।४८	०२।१०।४७	०२।४१।२४
हो.	०१।१८।२७	०१।१६।११	०१।१०।३१	०१।२३।२५	०१।१०।३१	०१।११।४३	०१।२१।५४
द्रे.	०१।२२।२२	०१।०९।२८	०१।०८।२२	०१।२७।०२	०१।१६।५७	०१।१२।४७	०१।१३।३५
स.	०१।१२।४५	०१।११।४२	०१।१३।३५	०१।१४।५६	०१।०३।२२	०१।१७।२१	०१।१५।५७
न.	०१।२१।५१	०१।१६।११	०१।१३।३५	०१।१४।५६	०१।१४।५६	०१।०५।२४	०१।१३।३५
द्वा.	०१।१७।१८	०१।०९।२८	०१।०३।२२	०१।१४।५७	०१।०३।२२	०१।०७।२०	०१।२५।२७
त्रिं.	०१।१०।२९	०१।११।४२	०१।०७।३०	०१।२७।०२	०१।०३।२२	०१।०७।३०	०१।१३।३५

अत्र केशवोक्तौ सदा सदसद्युती स्वोच्चे रूपमित्यादिना स्थापितयोश्शुभाशुभयोरैक्ये इष्टाशुभे "पंक्त्योस्स्वस्वसु कोष्ठयोरि"त्यादिना स्थापिते ज्ञेये । अत्र सुगमोपायो मयोच्यते। अत्रत्यप्रथमचक्रीयगृहांकस्य चतुर्युतस्य गृहेशतत्स्थग्रहयोः सद्युतेर्युतेश्चान्तरं द्वितीयचक्रीयगृहांकः स्यादेवं प्रथमचक्रीयहोरादिषड्वर्गांकस्य द्वियुतस्य होरादिवर्गेशतत्स्थग्रहयोः सद्युत्योर्युत्यर्धस्य चान्तरं द्वितीयचक्रीयहोरादिवर्गांकः स्यादिति। अत्रापि वर्गस्थवर्गेशयोरिष्टसद्युत्योर्योगाऽर्धमिष्टम् । अशुभासद्युत्योर्योगार्द्धं कष्टमिति सुन्दरमिश्रोक्तं प्रकारान्तरं त्याज्यम् ॥

अत्रेष्टकष्टबलयोर्घातः श्रीपतिसुन्दरादिविरुद्धः किन्तु केवलयोरेव बलयोर्घातः कार्य्य इति दिवाकरोक्तिर्हेया ।

(७०)

वर्गेशतत्स्थग्रहयोरिष्टघ्नषड्बलैक्ययोर्घातः ।

ग्र.	र.	च.	मं.	बु.	बृ.	शु.	श.
गृ.	११।२६।०२	०१।३५।२६	१२।४०।३४	००।३७।२६	१९।१९।३१	१९।१९।३४	०२।२८।११
हो.	०८।००।३	००।२२।२६	०७।२१।४८	०७।२६।१४	१३।४७।३४	०२।२५।२९	११।२६।०२
द्रे.	००।२६।१४	०१।३५।२६	०६।४६।०२	००।३७।२६	००।४५।०९	११।१३।३५	१०।२०।२९
स.	११।१३।३५	०२।२५।२९	१०।३०।२९	००।४५।०९	२३।४४।३८	००।०६।४५	१६।०१।१५
न.	११।२६।०२	००।२२।२६	१०।३०।२९	००।४५।०९	००।४५।०९	१०।०९।०३	१९।४१।००
द्वा.	०१।४३।५०	०१।३५।२६	१२।४०।३४	००।२४ ०६	२३।४४।३८	१५।४३।३८	१६।१९।०२
त्रिं.	१३।४७।३४	०१।२५।२९	१०।३० २९	००।३७।२६	२३।४४।३८	१५।४३।३८	१९।४१।००

(७१)

वर्गेशतत्स्थग्रहयोः कष्टघ्नषड्बलैक्ययोर्घातः ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	०४।१८।३६	१४।१०।४२	०६।४८।१०	०६।०१।४६	०७।४८।४९	०७।४८।४९	०८ २५।२४
हो.	०६।५१।०५	२६।०९।२७	०७।१५।२३	१४।२१।०२	०६।२५।३३	१६।१७।०७	०४।१८।३९
द्रे.	१४।२१।०२	१४।१०।४२	०७।४१।०७	०६।०१।४६	१३।२७।१२	८।२०।४	०४ ३३ ५६
स.	०८।२०।०४	१६।१७।०७	०४।३३।५६	१३।२७।१२	०६।०१।१८	१७।२७ २१	०५।१४ ३९
न.	०४।१८।३९	२६।०९।२७	०४।३३।५६	१३ २७।१२	१३ २७।१२	०८।४९।३८	०४। २।२९
द्वा.	१३।२३।१३	१४।१०।४२	२६।४८।१०	१५ ११।५५	०६।०१ १८	१०।०८ २०	०२।४२।४५
त्रिं.	०६।२५।२३	१६।१७।०७	०४।३३।५६	०९।०१ ४६	०६।०१ १८	१०।०८ २०	०४।०२।२९

अत्र प्रौढ़मनोरमाकारेण ऽर्थमित्युक्तं धर्म्मेश्वरेण तु "वस्तुतस्तु यत्र ययोर्घातमूलं पूर्वमताभिप्रायेणोक्तं तत्र तयोर्योगार्धमेव ग्राह्यमि" त्युक्तन्तदुभयमपि सम्प्रदायविरोधात्प्रत्याख्येयम्।

(७२)

वर्गांशतत्स्थग्रहयोरिष्टघ्नषड्बलैक्ययोर्घातमूलम्।

ग्र.	र.	च.	मं.	बु.	बृ.	शु.	श.
गृ.	०३।२२।५३	०१।१५।४०	०३।३३।३७	००।४७।२४	०४।२३।४६	०४।२३।४६	०१।३४।२८
हो.	०२।४९।५०	००।३६।४१	०२।४२।४९	००।३९।४०	०३।४२।५०	०१।३३।२६	०३।२२।१३
द्रे.	००।३९।४०	०१।१५।४०	०२।३६।०५	००।४७।२४	००।५२।०३	०३।२१।०२	०३।१४।३०
स.	०३।२१।०२	०१।३३।२६	०३।१४।३०	००।१२।०३	०४।५२।२२	००।४६।५७	०४।००।०९
न.	०३।२२।५३	००।३६।४१	०३।१४।३०	००।५२।०३	००।९२।०३	०३।१२।४४	०४।२६।१२
द्वा.	०१।१८।५६	०१।१५।४०	०३।३३।३७	००।३८।०२	०४।५२।२२	०३।५७।१८	०४।०२।२२
त्रिं.	०३।४२।५०	०१।३३।२६	०३।१४।३०	००।४७।२४	०४।५२।२२	००।५७।५८	०४।२६।१२

(७३)

वर्गांशतत्स्थग्रहयोः कष्टघ्नषड्बलैक्ययोर्घातमूलम्।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	०२।०४।३९	०३।४५।५५	०२।३६।३०	०३।००।१८	०२।४७।४३	०२।४७।४३	०२।५४।०८
हो.	०२।३७।०३	०५।०६।५२	०२।४१।३८	०३।३७।१८	०२।३२।०४	०४।०२।०८	०२।४।३५
द्रे.	०३।४७।१८	०३।४५।५५	०२।४६।२०	०३।००।१८	०२।४०।०४	०२।९३।१३	०२।८।१२
स.	०२।९३।१३	०४।०२।०८	०२।०८।१२	०३।४०।०४	०२।२७।१४	०४।१०।४१	०२।१७।२४
न.	०२।०४।३९	०५।०६।५२	०२।०८।१२	०३।४०।०४	०३।४०।०४	०२।५८।१६	०२।००।३७
द्वा.	०३।३९।३२	०३।४५।५५	०२।३६।३०	०३।५३।५९	०२।२७।१४	०३।११।०३	०३।३८।४९
त्रिं.	०२।३२।०४	०४।०२।८	०२।०८।१२	०३।००।१८	०६।२७।१४	०३।११।०३	०२।००।३७

अत्र नीलकण्ठपद्धतौ 'फलद्वययुतिः स्पष्टेष्टकष्टाभिधे" त्युक्तं तच्चिन्त्यं श्रीपत्यादिभिरनुक्तत्वात्स्फुटशुभाशुभस्य सप्तवर्गफलनिर्णयोपयोगित्वाच्च तथा चोक्तं प्रौढ़मनोरमायाम् चेष्टोच्चबलोत्पन्नेष्ट कष्टप्रकरणे—"सप्तवर्गफलादन्यत्सर्वमेतेन चिन्तयेत्। सप्तवर्गफलं वाच्यं वक्ष्यमाणेन केवलमिति" कृष्णदैवज्ञादिस्वरसोऽप्येवमेव।

(७४)

स्फुटशुभम्।

ग्र.	र.	चं.	मं.	बु.	बृ	शु.	श.
गृ.	००।२४।१४	०।१६।४८	०१।०३।५१	००।०४।१०	०१।१२।०६	०१।१२।६	००।११।५९
हो.	००।१२।२४	००।०३।०१	००।१७ ०३	००।०२।०८	००।२३।२०	००।०३।२८	००।१२।०७
द्रे.	००।०२।०८	००।०८।२३	००।२३।२०	००।०२।०५	००।१४।००	००।१९।१३	००।१६।३५
स.	००।१९।१३	००।०९।२८	००।१६।३०	००।० ।००	००।४३।४२	००।०३।१८	००।१८।४५
न.	००।१२।०७	००।०३।०१	००।१६।३५	००।०४।००	००।४।००	००।२६।२०	००।२२।४२
द्वा.	००।०६।०७	००।०८।२३	००।३१।५६	०० ०२।५६	००।४३।४२	००।२९।४५	००।११।५१
त्रिं.	००।२३।१६	००।०९।२८	००।१६।३५	००।०२।०१	००।४३।४२	००।२९।४५	००।०२।४२

(७५)

स्फुटाशुभम्।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	०५।४०।०१	०८।४३।१९	०५।३०।३१	०८।४३।०१	०६।०५।३७	०६।०२ ३९	०७।४८।२५
हो.	०३।२५।२१	०६।२९।३८	०३।०९।५८	०५।१५।५७	०२।९८।४३	०४।४९।२५	०२।५०।०३
द्रे.	०५।१९।४९	०४।२१।३४	०२।५५।४०	०४।२१।३२	०४।३४।५४	०३।३०।०७	०२।३७।१३
स.	०३।३०।०२	०४।४६।२१	०२।३७।१३	०४।३४।५०	०२।३५।३०	०५।२३।१०	०२।५३।५६
न.	०२।४९।५७	०६।२९।३८	०२।३७।१३	०४।३४।५०	०४।३४।५४	०३।१४।१९	०२।२७।५५
द्वा.	०४।४२।५०	०४।२१।३४	०२।४५।१७	०४।९२।१२	०२।३५।३०	०३।३४।५६	०२।२०।४४
त्रिं.	०२।५८।३८	०४।४९।०३	०२।३७।१३	०५।२१।३०	०२।३५।३०	०३।३४।५६	०२।२७।५५

(७६)

चेष्टागुणकः

र.	चं.	मं.	बु.	बृ.	शु.	श.
०१	०१	००	००	०१	०१	०२
०३	४१	५५	३०	४२	५०	३५
२१	५३	६०	१४	१२	४०	१४

(७७)

उच्चगुणकः

र.	चं.	मं.	बु.	बृ.	शु.	श.
०१	००	०२	००	०२	०१	०१
०२	३०	०३	४८	१४	२८	२८
६७	५८	३२	२१	५७	४३	०८

चेष्टोच्चरश्मिज्ञानं विनापि सुगमोपायेन गुणद्वयसाधनमुक्तं धर्म्मेश्वरदैवज्ञेन—"त्रिगुणचैष्टिकतुंगबलं गुणो यदि तु खाद्विकलाल्पबलं दलम्। त्रिगुणमभ्रहुताशकलान्वितं भवति सोत्र गुणः क्रियतेन्यथा" ॥ इति ॥

(७८)

स्फुटगुणकः।

र.	चं.	मं.	बु.	बृ.	शु.	श.
०१	००	०१	००	०१	०१	०१
२८	५६	२३	३८	५७	३९	५६
१६	११	०३	२६	२६	०८	५८

(७९)

*ग्रहाणां सप्तवर्गजगुणकचक्रम्। चन्द्रकुजयो राशिगुणो भसंज्ञगुणितः।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	१/८	०३/४२	११/१४	१/६	१/८	१/६	१/८
हो.	१/१६	१/४	१/४	१/१२	१/१६	१/१२	१/१६
द्रे.	१/२६	१/४	१/४	१/१२	१/२६	१/१२	१/१६
स.	१/१६	१/४	१/४	१/१२	१/१६	१/१२	१/१६
न.	१/१६	१/४	१/४	१/१२	१/१६	१/१२	१/१६
द्वा.	१/१६	१/४	१/४	१/१२	१/१६	१/१२	१/१६
त्रिं.	१/१६	१/४	१/४	१/१२	१/१६	१/१२	१/१६

* अतोऽग्रे चक्रचतुष्टयं श्रीपतिप्रकारेण सिद्धयति तत्प्रकारस्तु (१६) श्लोकसम्बन्धिन्यां टिप्पण्यां विलोक्यः ॥ इति ॥

(८०)

ग्रहाणां सप्तवर्गजानन्तरताड़कचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	१/३	५/९	५/३	५/९	१/३	५/९	१/३
हो.	·२	·२	५/३	·१	५/३	·१	१/३
द्रे.	५/९	५/९	·२	५/९	·१	·१	१/३
स.	·१	१३/९	५/९	१३/९	·२	५/३	·१
न.	१/३	·२	५/९	१३/९	·१	१३/९	१३/९
द्वा.	५/३	५/९	५/३	१३/९	·२	·२	·२
त्रिं.	५/३	१३/९	५/९	५/९	·२	·२	१३/९

(८१)

अनन्तरताडकघ्नगुणकचक्रम् ।

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	१/२४	४५/४६८	५५/४२	५/५४	१/२४	५/५४	१/२४
हो.	१/८	१/२	५/१२	१/१२	५/४८	१/१२	१/४८
द्रे.	५/१४४	४/३६	१/२	५/१०८	१/५४	१/१२	१/४८
स.	१/५६	१३/३६	५/३६	१३/५०८	१/८	५/३६	१/१६
न.	१/४८	१/२	५/३६	१३/१०८	१/१६	१३/१०८	१३/१४४
द्वा.	५/४८	४/३६	५/१२	१३/१०८	१/८	१/६	१/८
त्रिं.	५/४८	१३/३६	५/३६	५/१०८	१/८	१/६	१३/१४४

भागानुवन्धभागापवाहविधिर्लीलावत्याम्—"छेदघ्नरूपेषु लवा-धनर्णमेकस्य भागा अधिकोनकाश्चेदिति" यत्र च्छेदद्वयम्भवति तत्र तद्घातश्छेदो लेख्यः यत्र भाज्यच्छेदा केनापि समाङ्केन भक्तौ निश्शेषौ तत्र तेनापवर्त्यैव लेख्यौ भिन्नाङ्कगुणनप्रकारोपि लीलावत्यां, "अंशाहतिश्छेदवधेन भक्ता लब्धं विभिन्ने गुणने फलं स्यात्।"

अत्रानन्तरताडकघ्नगुणानां समच्छेदेन योगेनाप्याश्रयगुणको यद्यपि स्यात्तथापि लाघवार्थं गुणितांशान् स्वस्वहारेण विभज्य फलानि स्वस्वकोष्ठेषु विलिख्य योगः कृतः॥

(८२)

ग्र.	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	००।०२।३०	००।१०।१९	०१।१८।३४	००।०५।३३	००।०२।३०	००।०५।३२	००।०२।३०
हो.	००।०७।३०	००।३०।००	००।२९।००	००।०५।००	००।०६।१५	००।०५।००	००।११।१५
द्रे.	००।०२ ०५	००।०८।२०	००।३०।००	००।०२।४७	००।०३।४५	००।०५।००	००।११।१५
स	००।०३।४५	००।२१।४०	००।०८।२०	००।०७।३०	००।०७।३०	००।०८।२०	००।०३।४५
न.	००।११।१५	००।३०।००	००।०८।२०	००।०७।१३	००।०३।४५	००।०७।१३	००।०५।२५
द्वा.	०० ०५।१५	००।०८।२०	००।२५।००	००।०७।१३	००।०७।३०	००।१० ००	००।०७।३०
त्रिं.	०० ०६।१५	०० २१।४०	००।०८।२०	००।०२।४७	००।०७।३०	००।१०।००	००।०५।२५
यो.	००।[illegible]।३५	०२।१०।१९	०३।०३।३४	००।३७।४६	००।३८।४५	००।४१।०६	००।२७।०५

(८३)

॥ आश्रयगुणकचक्रम् ॥

ग्र.	र.	चं.	मं.	बु.	बृ	शु.	श.
गृ.	.६	१०	३०	१०	.६	१०	.६
हो.	१८	१८	१५	.९	१५	.९	.३
द्रे.	.५	.५	१८	.५	.९	.९	.३
स.	.९	१३	.५	१३	१८	१५	.९
न.	.३	१८	.५	१३	.९	१३	१३
द्वा.	१५	.५	१५	१३	१८	१८	१८
त्रिं.	१५	१३	.५	.५	१८	१८	१३
यो.	७१	८२	९३	६८	९३	६२	६५
ह.	१४४	३६	३६	१०८	१४४	१०८	१४४

(८४)

॥ आश्रयगुणकः ॥

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	०२	२	००	००	००	००
२९	१६	३५	३७	३८	५१	२७
३५	४०	००	४६	४५	०६	०५

(८५)

॥ संक्रुस्ताश्रयगुणकः ॥

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	०२	०३	००	००	००	००
२९	१०	०३	३७	३८	५१	२७
३५	१९	३४	४६	४५	०६	०६

अत्रारिष्टभेऽब्धिनवकाप्त्येत्यत्र वस्तुतोऽब्धिनवकस्थाने सार्द्ध-चतुर्नवतिर्भवत्यतो द्विगुणगृहाङ्कान्नवाष्टैकाप्तोनयुगाश्रयगुणः कार्यः। उक्तश्च कृष्णदैवज्ञैः—"मित्रगृहेकरशरा नवाष्टेन्दुहृता धनम्। शत्रोर्गृहे पूर्णपक्षा नवाष्टेन्दुहृता ऋणमिति" ॥

(८६)

❀ लाघवेनैतत्सिद्धयर्थं सारिणी लिख्यते ❀

गृह	स्व	अमि	मि	स	श	अ.श
०	०१।००।००	००।३७।३०	००।२८।५३	००।१९।००	००।०५।३३	००।०२।३०
स्व	००।३०।००	००।२२।३०	००।१०।००	००।१५।००	००।१०।००	००।०७।३०
अमि	००।२५ ००	००।१८।४५	००।१६ ४०	००।१२।३०	००।०८।२०	००।०६।१५
मि	००।२१।४०	०० १६।१९	००।१४।२७	००।१०।५०	००।०७।१३	००.०५।२५
स	००।१९।००	००।११।१५	०० १०.००	०० ०७।३०	००।०५।००	००.०३।४५
श	००।०८।२०	००।०६।१५	००।०५।३३	००।०४ १०	००।०२।४७	००।०२।२
अ.श	००।५।००	००।०३।४५	००।०३।२०	००।०२।३०	००।१ ।४०	००।०१।१५

(८७)

वर्गोत्तमादित्रितयस्थे तु ।

०	स्व	आ. मि	मि.	स.	श.	अ. श.
गृहे	०१।००।००	०१।१८।३४	००।५९।२०	००।३०।००	००।१०।१९	००।०४।१७
होरादौ	००।३०।००	००।२५।००	००।२१।४०	००।१५।००	००।०८।२०	००।५।००

आनयनश्लोकौ च मदीयौ—"गृहे गृहवशादङ्का गृहहोरादिवर्गयोः। वशाद्धोरादिके स्थाप्यास्तद्योगो गुण आश्रयः ॥ यदि वर्गोत्तमस्वांशत्र्यंशस्थो गगनेचरः। गृहे होरादिवर्गे च स्वर्धानास्थापयेत्तदा ॥ अत्र गणितं श्रीपतीयप्रकारनिःपन्नसप्तवर्गाङ्कस्वरूपमेवेति द्रष्टव्यम् ।

(८८)

कर्म्मयोग्यगुणः ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
००	०१	०२	००	०१	०१	००
५१	२५	०३	३८	०७	११	५६
०६	३४	२८	१६	२८	१०	१७

(८९)

अंशायुःकलाः ।

र.	चं.	मं.	बु	बृ.	शु.	श.	ल.
१९७७।२८	६६४।१५	२०६७।१८	१६३७।०९	५६७।३०	१५४३।१८	१६८८।१६	२३१४।४६

(९०)

अंशायुरंशाः ।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
३२	११	३४	२७	०९	२९	२८	३८
५७	०४	२७	१७	५७	४३	०८	३४
३८	१६	१८	०९	३०	१८	१६	४६

(९१)
चक्रार्धहानिहरः।

बृ.	०९।५४।२९।०४
श	०३।००।५३।००

(९२)
चक्रार्धहानिगुणकः।

बृ.	००।५३।५६।३९।३६
श	००।४० ०५।५१।३६

अत्र श्रीपत्युक्तौ शुभग्रहस्य रूपाल्पहरे हरार्द्धं रूपाच्छोध्यं गुणो भवतीति विशेषः। एकराशौ द्विबहुषु ग्रहेषु सत्सु किं कर्त्तव्यमित्यपेक्षायां श्रीपतिप्रदर्शितविविधमतेषु सत्याचार्यमतमेव वरं वराहादिभिः स्वीकृतत्वात्, यदा त्वेकराशिस्थानां बलसाम्यं स्यात्तदा सर्वेषां गुणः कार्य्य इति सुन्दरमिश्रः, यस्य निसर्गबलमधिकं तस्यैव गुणः साध्य इति प्रौढ़मनोरमाकारमतम्, कमलनयनमिश्रस्तु "बलसाम्ये समुत्पन्ने ग्राह्यो भुक्त्यधिको ग्रहः। भुक्तिसाम्ये समायाते यो ग्रहः प्रथमोदितः" इत्याह। अस्माकं प्रौढ़मनोरमाकारमतमेव प्रियम्। सुगमोपायस्तु नीलकण्ठपद्धतौ—"प्रोक्ता चक्रार्द्धहानिर्यदि खगवियुतं लग्नकं षड्गृहाल्पं भागीभूतं भुजघ्नं तदनु खरसहृत्स्याद्धरो रूपतोल्पः। शोध्योसौ रूपतः स्याद्गुणक इह खलानां सतां चेद् द्विनिघ्नो हारो रूपाल्पकश्चार्धित इह पतितो रूपतः स्याद् गुणोऽसौ ॥१॥ इति ॥ यत्तु "नायाताः खण्डकाः स्युर्दशरवितिथयो विंशतिः खाग्निषष्टिः खं प्राग्भावोनखेटो भवनविवरहृत् खण्डविश्लेषनिघ्नः। प्राक्खण्डे युग्विहीनः शुभखगजनितस्त्वर्द्धितः षष्टिशुद्धो द्व्यादावेकत्र संस्थे बलिन इह गुणस्तेन गुण्यायुरंशाः ॥" इति भाववशाद्धर्म्मेश्वरैस्तु चक्रार्धहानिः कृता साऽसती वराहकल्याणवर्म्मादिभिः प्रामाणिके राशिपर्य्यायपदोपादानात् ॥

(९३)
चक्रार्धहानिसंस्कृता
आयुःकलाः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
१९७७।३८	०६६४।१५	२०६७।१८	१६३७।०९	०५३७।१२	१५४३।१८	११२८।१६	२३१४।४६

(९४)
चक्रार्धहानिसंस्कृता
आयुरंशाः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
३२	११	३४	२७	०८	२५	१८	३८
५७	०४	२७	१७	५७	४३	४८	३४
३८	१५	१८	०९	१२	१८	१६	४६

(९५)

अंशायुर्वर्षाद्यम् ।

र.	च.	मं.	बु.	बृ.	शु.	श.	ल.	यो.
८	०४	२१	०५	०३	०१	०५	१८	७५
०५	०८	०३	०२	००	०१	०३	०२	०३
०१	२५	०७	११	०७	२४	१५	०९	१२
४२	०८	१७	१५	१७	४७	०५	३२	१५
३६	२४	२४	००	२४	३६	२४	००	४८

अत्रायं विधिः चक्रार्धहानिसंस्कृतदायांशकलाः स्वकर्म्मगुणकेन गुणिता द्विशत्या भक्ता लब्धं वर्षाणि स्युः । शेषं सविकलं द्वादशभिः संगुण्य विकलास्थानात् षष्ट्याप्तं कलासु संयोज्य द्विशत्या भक्ते मासाः । पुनः शेषं सावयवं त्रिंशता गुणयित्वा विकलातः षष्टिलब्धमुपरि प्रक्षिप्य शतद्वयेन भागे गृहीते दिनानि स्युः ॥ पुनः शेषं षष्ट्या निहत्याधःस्थाङ्कं युतं द्विशत्या भजेत् लब्धं घटिका भवेयुः पुनः शेषं षष्ट्या संगुण्य द्विशत्या भक्ते पलानि भवंत्येवं लग्नायुःसाधनेऽप्यूहनीयम् । अथ दायांशेभ्य एवायुःसाधनमुक्तं नीलकण्ठपद्धतौ—"दायांशा निजकर्म्मयोग्यगुणकाभ्यस्तास्त्रिनिघ्ना हृता दिग्भिः स्यात्किल वर्षमासदिवसाद्यंशोद्भवायुः स्फुटम् ॥" इति । अत्र बलवल्लग्नं षड्रूपाधिकं बलं बोध्यम् ॥ अत्र श्रीपत्युक्तावनुपातो यथा ऐकस्मिन्राशावेकं वर्षमिह भवति तत्र राशेरंशास्त्रिंशद्वर्षस्य मासा द्वादश तथा त्रिंशद्भिर्भागैः द्वादश मासा लभ्यंते तदा लग्नस्यांशादिना किमित्यनुपातः ॥

(९६)

पिण्डादित्रिकायुः ।

र.	चं.	मं.	बु.	बृ.	शु.	श.
१८१७७।३८	१०९१५।४५	१८२१२।४२	१३०६२।५१	१६९९०।१३	१६१२३।१८	१०७५१।४२

(९७)

पिण्डायुर्वर्षाद्यम् ।

र.	चं.	मं.	बु	बृ	शु.	श.
१५	१२	१२	०७	११	१५	०९
११	०७	०७	०३	०९	०८	११
२६	१८	२३	०२	१७	०३	१३
१५	१३	१०	३४	३३	०९	५४
०२	४५	३०	१२	१५	१८	००

(९८)

निसर्गायुर्वर्षाद्यम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
१६	००	०१	०५	१४	१४	२४
०९	०६	०८	०५	०१	११	१०
२९	०१	०७	०९	२७	०४	१९
१२	५९	०५	२५	०३	२६	४९
४०	४५	३४	३९	५४	००	००

(९९)

जीवायुर्वर्षाद्यम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
१४	०८	१४	०७	१३	१२	०८
०५	०७	०५	०३	०५	०९	०६
०४	२९	१४	०२	२४	१७	१२
१२	०८	१३	३४	५४	११	१६
३८	४८	०१	१२	३४	२९	११

(१००)

पिण्डादित्रिकायुरंशाः।

र.	चं.	मं.	बु.	बृ.	शु.	श.
३०२।५७।३८	१८१।२५।४५	३०३।३२।४२	२१७।४२।५१	३१४।५७।३०	२६८।४३।१८	२६८।०८।२६

(१०१)

हानित्रयकृतपिण्डादित्रिकायुः।

र.	चं.	मं.	बु.	बृ.	शु.	श.
२०१।५८।२५।२०	१८१।५३।४५	३०३।३२।४२	१०८।२१।२५।३०	१८८।४६।४८।४०	२६८।४३।१८	१७९।११।४२

अत्र शत्रुभ इत्यत्र नैसर्गिकशत्रुर्ज्ञेयो न तु तात्कालिकः—यत्तु वक्रगमिति केशवोक्तौ वक्रो भौम इति विश्वनाथेन व्याख्यातं तदसत्। श्रीधरश्रीपतिदामोदरकेशवादिभिर्वक्रगतिपर्य्यायपदस्य स्पष्टाभिधानात्, यच्च त्र्यंशार्धहानिद्वितये प्राप्ते हानिद्वितयमपि स्यादिति सुन्दरमिश्रमतं तदप्यग्राह्यम्। "खेचरो जायते योऽर्द्धत्र्यंशयोरपहारकः। आयुषः स हरेदर्धं त्र्यंशं शुक्रशनैश्चराविति" यवनमुनेर्विशेषवाक्यबलात्। नेति तनुपेस्मिन्निति केशवोक्तौ प्रौढ़मनोरमाकार इति उक्तं यत्परमतं तन्न रमणीयमित्यर्थः, अस्मिँल्लग्नगे क्रूरे लग्नेशे सत्यसौ हानिरूपा क्रिया कार्य्येति व्याख्यातवान् तदेव युक्तं वराहश्रीपतिनीलकण्ठादिग्रन्थपर्य्यालोचनया तथैव पर्य्यवसानात्। अत्रोदाहरणे रविगुर्व्वोश्शत्रुगृहगतत्वात्त्र्यंशहानिः शनिर्य्यद्यपि शत्रुगृहेस्ति तथा वक्रगतिरस्तीति न त्र्यंशहानिः, बुधस्यास्तङ्गतत्वादर्धहानिः, गुरुशन्योस्तु चक्रार्धहानिरप्याद्यावंशायुर्दायवदेव कार्य्या लग्ने क्रूराभावात्तज्जनिता हानिर्नास्त्येवेति हानित्रयसंस्कृतायुरंशेभ्यः केशवोक्तानीतं पूर्व्वानीतवर्षाद्यायुस्त्र्यंशार्द्धहानिसंस्कृतं वा जातमायुस्त्रयम्॥

(१०२) यथा पिण्डायुवर्षाद्यम्।		(१०३) निसर्गायुर्वर्षाद्यम्।		(१०४) जीवायुर्वर्षाद्यम्।	
र.	१०।०७।२७।३०।०१	र.	११।०२।१९।२८।२७	र.	०९।०७।१२।४८।२५
चं.	१२।०७।१८।१३।४५	चं.	००।०६।०१।५९।४५	चं.	०८।०७।२९।०८।४८
मं.	१२।०७।२३।१०।३०	मं.	०१।०८।०७।०५।१४	मं.	१४।०५।१४।१३।५१
बु.	०३।०७।१६।१७।०६	बु	०२।०८।१९।४२।४९	बु.	०५।०२।०६।२०।१४
बृ.	०७।१०।११।४२।१०	बृ.	०९।०५।०८।०२।३६	बृ.	०८।११।२६।३६।२३
शु.	१५।०८।०३।०९।१८	शु.	१४।११।०४।२६।००	शु.	०२।०९।१७।११।२५
श.	०९।११।१३।५४।००	श	२४।१०।१९।४५।००	श	०८।०६।१२।१६।११
ल.	०५।०६।२६।३४।४८	ल.	०५।६।२६।३४।४८	ल.	०५।६।२६।३४।४८
यो.	७८।०७।२०।३१।३८	यो.	७०।११।१७।००।४९	यो.	७३।०९।२५।१०।०५

अत्र सुगमोपाय उक्तो धर्म्मेश्वरेण-"गुणघ्नराश्यादिकदायभागैः सञ्चालितैर्य्यद्भगणादिकं स्यात्। ज्ञेयं तदेवात्र समादिकायुः सदैव विद्भिः किल दैवविद्भिः"। अयमर्थो राश्यादिकृता दायांशा आयुर्गुणकैर्गुणिताः षष्ट्यादिहारैर्लब्धयः स्वस्वोपरिष्ठाङ्केषु योजिता एवं यद्भगणाद्यं तदेव वर्षायुः स्यात्॥ इति॥

तथा केशवोक्ताविभस्थाने वस्तुतोयं ८।२४ हर उत्पद्यते इति निरवयवहरसिद्ध्यर्थं भाज्यहारौ पञ्चभिर्गुण्यौ तथा चोक्तं सुन्दरमिश्रेण-"लवतःशरघ्नाद्गुह्निवेदभागाप्तघटीभिराढ्यमिति॥ आयुःष्वथाप्येषु बलाढ्यलग्न" इत्यत्रापिशब्दो भिन्नक्रमस्तेन बलाढ्यलग्नेऽपि अबले बलवत्यपि न लग्न इत्यर्थः। बलाढ्यलग्नेऽपीति कथनमंशायुर्वल्लग्ने बलवत्यपि किञ्चिल्लग्नायुषि न देयमित्येतदर्थं लग्नायुर्निर्मितं योज्यं संग्राह्यमित्यर्थ इति सुन्दरोक्त्या श्रीपतिकेशववाक्ययोरेकार्थकता सम्यक् सम्पद्यते। अन्येषाम्मतं केशवेनैव प्रदर्श्य ग्राह्यमुक्तं किं बहुनोक्तेन॥ इति॥

(१०५)

लग्नबलघ्नं दिनीकृतांशायुः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
२४३३।५।२२।०४	१३६७।०३।५१	६१४४।३८।२९	१५०२०।२५।११	८७२७।३६।५९	२६४४८।२७।३९	१५२९२।०३।०६	५२९७२।४४।२५

(१०६)

चन्द्रबलघ्नं दिनीकृतनिसर्गायुः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
३१५२८।०५।४५	१४१९।१७।२६	४७३८।२०।१५	७६४६।३९।५३	२६५२१।४३।४२	४१९४७।२७।०८	६९९३०।५०।५५	१५६६१।२१।२५

(१०७)

अनयोर्योगः सवर्णितः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
२०११०८४६९	५४३८५२७१	२३८३३०७२४	८१६०१५०४६	१२६८९७४१	२४६२२०२८७	३०६८०२४४१	२४५६४२७५०

(१०८)

दिनादिमिश्रायुः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.
३८२८।३१।४२	९५४।१२।४१	४१८१।३६।२७	१४३१।४३।५१	२२२६।२८।११	४३२०।०७।१५	५३८२।५८।१६	४३०९।३४।००

(१०९)

मिश्रायुर्वर्षाद्यमस्यैवात्र प्रामाण्यमवगन्तव्यम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.	ल.	यो.
०९	०२	११	०३	०६	१२	१४	११	७३
०९	०७	०७	११	०२	००	११	११	०१
१८	२४	११	२१	०६	००	१२	१९	२५
३१	१२	३६	४३	२८	०७	५८	५४	३२
४२	४१	२७	५१	११	१५	१६	००	२३

अत्र त्रयाणां बलसाम्ये यथा त्र्यायुंषि त्रिबलैर्निहत्येत्यादिना मिश्रायुरुक्तं तथैव द्वयोः समबलत्वेपि ज्ञेयम् ॥ आयुषोर्युतिदलं तु त्रिजायुर्युत्या त्रिलववदेव । प्रकारान्तरमुक्तं च ह्यालुगिपद्धतौ—"यदा त्रयाणामपि वीर्यसाम्यमेषां द्वयोः स्याद्यदि वीर्य्यसाम्यम् । तदा-तदायुः स्वबलेन निघ्नमेकीकृतं तद्बलयोगभक्तम् । पृथक् पृथग्व्योम-सदां तदायुः श्रीनीलकण्ठादय आहुरेवम् । यद्यायुरैक्यं ग्रहसंख्यया-प्तं तच्छ्रीधराचार्यमतन्निरुक्तमिति" किञ्च दामोदरपद्धतौ प्रथमप्रकार एवोक्तः "लग्नार्कचन्द्रा यदि वीर्य्ययुक्तास्तदा विलग्नस्य बलेन हन्यात् । अंशायुरर्कस्य बलेन पैण्डं नैसर्गिकं चन्द्रमसो बलेन ॥ सर्वाण्यथैकत्र-विधायतानि बलैक्यभक्तानि समादिकं यत् । फलं विमिश्रायुरिदं द्वयोर्वा बलैक्यतश्चोभयवीर्यसाम्ये । मध्यं बुधैःस्पष्टमिदं जगाद श्रीजीवशर्म्मा मतिमानथैवम् ।" इति ॥ अस्मात् स एव मुख्यः ॥ अत्र विषष्ट्यंश-पर्य्यन्तं बलसमत्वं विवक्षितमिति केनचिदुक्तं तदसंगतं यतस्तादृश-तुल्यबलत्वे प्रकारद्वयसाधितमिश्रायुषस्तुल्यत्वोपालम्भेन लाघवाद्-द्वितीयप्रकार एवोक्तः स्यात् तस्माद्धीनत्वं मध्यमत्वमुत्तमत्वमादा-य तुल्याधिकता मन्तव्या वस्तुतस्तु सर्व्वावयवेन बलसमत्वे लाघ वार्थं प्रकारान्तरेण मिश्रायुः साध्यमुत्तमत्वेन मध्यमत्वेन वा सम तायां मुख्यप्रकारेणैव साम्यमितिप्रकारद्वयं प्रतिपादयतामाचार्य्याणा-माशयोवगम्य इत्यलम्पल्लवितेन ॥ इति ॥

श्रीपतीयरिष्टकरहरचक्रम् (११०)

०	र.	चं.	मं.	बु.	बृ.	शु.	श.
गृ.	००।१९।५३	०६।३५।९२	००।१९।३०	०८।१६।३८	०१।२१।१९	०१।२७ ३७	०१।४०।०४
हो.	००।०२।१४	०४।२३।३३	००।०७।२५	०३।३०।३९	०१।४४।४२	००।४५।४७	००।४३।३२
द्रे.	००।०९।१४	०३।१७।५३	००।०७।३१	०४।०८।१६	०१।२१।३७	००।३३।२२	००।४५।०६
स.	००।११।३१	०४।२३।०८	००।०७।१६	०४।३८।२०	०२।१५।२५	००।३६।१३	०२।०९।०७
न.	००।०९।५७	०४।२३।३३	००।०७।५९	०४।३८।००	०२।५१।५७	००।३४।२३	०२।१३।१५
द्वा.	००।१०।२९	०३।१७।५३	००।०२।३९	०३।५३।०१	०२।१५।२५	००।४२।१४	००।५१।२७
त्रि.	००।११।५७	०४।०३।०८	००।०७।५९	०४। ८।१६	०२।१५।२५	००।४२।१४	०२।२३।५५
योगबल	०१।२४।५९	३०।०५।००	०१।०७।३८	३४।१४।२६	१६।२६।०६	०५।२२।२०	१६।३७।०६

केशवीयरिष्टकरहरबलचक्रम् । (१११)

०	र.	चं.	मं.	बु.	बृ	शु.	श.	ल.	ल. वर्ग
गृ.	८।५८।१०	११।२६।३	१० ५६।२५	०३।२९।२७	१३।२६।३३	१३।२६।३१	१२। ७।३३	१४।२०।१५	शु.
हो.	०४।१०।००	००।३१।५१	०४।१३।४५	००।२७।१९	०१।२३।१९	०१।०१।२८	०३।२०।३	०७।४९।१२	चं.
द्रे.	०४।२९।१९	०५।४३।०१	०३।१७।२४	०४।४७।४५	०५।४५।४३	०५।११।४६	०३।३३।५	०६।१४।१	कु.
स.	०५।११।४६	०७।०१।२७	०४।३३।०७	०५।४५।४५	०६।५८।५२	०५।३३।२२	०३।३५।३२	०६।१४।७	श.
न.	०४।२९।०५	०७।३६।११	०३।३३।०७	०५।४५।४५	०५।४९।४३	०३।१६।२७	०३।४८।००	०७।२९।३४	बृ.
द्वा.	०५।३७।९७	५।४३।०१	०३।२८।१३	००।३१।२०	०६।१८।१२	०६।२८।४९	०३।४९।३६	०७।१३।२७	शु.
त्रि.	०५।२३।२१	०७।०१।२७	०४।३३।०७	०४।४७।४४	०६।५८।१२	०६।२८।४९	०३।४८।००	६।११।३९	बु.
योगबल	३८।१७।३८	५२।०८।४१	३८।३५।१८	३९।४१।०४	५११।५१।५२	४९।०७।१२	४३।१०।२९	५५।३९।४१	०

यद्यपीदमयुक्तमिति केशवदैवज्ञेन स्वपद्धतौ तट्टीकायाञ्च सम्यगुक्तं तथाप्युदाहरणार्थं साधितमित्यवगन्तव्यम् ॥

यत्तु लघुपद्धतौ "मूलमतस्ततोत्र निखिलं चैकत्र सम्पीडयेदिति" मूलितानां सप्तवर्गस्याङ्कानामैक्यं बलमुक्तं तन्नादरणीयं श्रीधराद्यतिप्राचीनानुक्तेः ॥ तथा च श्रीधराचार्यः "गृहादिका वर्गसंख्या रूपयुक्ताधिता तया। रिष्टाधिपबलं भक्तं भङ्गनाथबलञ्च यत्। स्याद्राश्याख्यं तथान्येषां वर्गाणां तद्दलं बलम्। राश्यादिवर्गनाथानां बलैराहत्य तद्वम्। सर्ववर्गबलन्तत्स्याद्रिष्टतद्भङ्गनाथयोरिति" अरिष्टकररिष्टहरयोर्बलसाम्ये सति भङ्क्तु रिष्टकृत इत्यादिना निर्णयः कार्यः। तथा च यवनेश्वरः-"उच्चनीचशुभक्रूरहिताहितविचिन्तनात्। समानबलयोः कार्य्यं रिष्टारिष्टादिनिश्चितम्"। इति। यत्र तु बहवो ग्रहा एकमरिष्टं जनयन्ति रिष्टभङ्गं वा कुर्वन्ति तदा तेषां बलानामैक्यं कृत्वा तद्बलान्निर्णयः कार्यः। यद्येकग्रहो रिष्टकर्त्ता रिष्टभङ्क्ता च स्यात्तदा स ग्रह इष्टबलाधिकोरिष्टहर्त्ता कष्टबलाधिकोरिष्टकर्त्ता स्यादित्यपि चिन्तनीयम्।

(११२)

ग्रहाणा दशाक्रमबलम्।

र.	चं.	मं.	बु.	बृ.	शु.	श.
०२	०१	०३	००	०१	०३	०४
४४	३०	५३	३१	१६	४८	५०
५१	४८	१३	२१	५२	११	४०

(११३)

वर्षादिदशा।

ल	श.	बृ.	र.	चं.	बु.	शु.	मं.
११	१४	०६	०९	०२	०३	१२	११
११	११	०२	०९	०७	११	००	०७
१९	१२	०६	१८	२४	२१	००	११
५४	५८	०८	३१	१२	४३	०७	३६
००	१६	११	४०	४१	५१	१५	२७

अत्र लग्नार्कचन्द्राणां मध्ये यस्याङ्कतः षड्बलमधिकं तस्याद्या दशा। एषां त्रयाणां द्वयोर्वा षड्बलसाम्ये सति चेदोजःसमतेत्यादिवक्ष्यमाणक्रम एवात्र बोध्यः। यथोक्तं रामकृष्णपद्धतौ—'रवीन्दुलग्नोद्भवषड्बलानां तौल्यै त्रयाणामथवा द्वयोश्च। पूर्वोक्तमिश्रायुषि साधिते स्याद्बह्वायुषः पूर्वदशा तु तत्र। तत्राब्दसाम्ये प्रथमोदितस्य ततः परं पूर्वविधेः क्रमात्स्यादिति प्रथमोदितस्येत्यत्रोदयः प्रात्यहिक इति केचित् वस्तुतस्तु प्रथम उदित उक्तः पठित इति यावत्। अथ केन्द्रादिगानां सूर्य्यवशादुदयसाम्ये तु निसर्गबलवशाद्दशाक्रमः स्यात्तदुक्तं झालुगिपद्धतौ—"समोदितानामप्येषां निसर्गबलिनो भवेदिति यत्तदुदयसाम्ये पाठक्रमाद्दशा स्यादिति सम्यक् प्रौढमनोरमायामुपपादितं

तत्सम्प्रदायिका नाङ्गी कुर्वते। अत्र केन्द्रादिविचारो लग्नकुण्डल्याः शकाशान्न तु भावकुण्डल्या इति विश्वनाथोक्तिः सम्प्रदायानुरोधेन मयापि स्वीकृता, अत्र श्रीपत्युक्तदशाक्रमबलसाम्यार्थमङ्कचतुष्टयात्मकभावफलेन षड्बलैक्यं गुणनीयमिति तत्त्वम्।

अथान्तर्दशा लिख्यते।

(११४) तत्रादौ लग्नदशायाम्। (११५) शनिदशायाम्। (११६) गुरुदशायाम्।

ल. ल.	ल. बु.	ल. बृ.	श. श.	श. मं.	श. चं.	श. ल.	श. बु.	बृ. बृ.	बृ. चं.	बृ. शु.
०७	०२	०१	०६	०२	०२	०१	०१	०४	००	०१
०६	०६	१०	१०	०३	०३	०८	०८	०५	०७	०१
२२	०७	२०	२४	१८	१८	२१	२१	०८	१८	०९
०२	२०	३०	२६	०८	०८	०६	०६	२९	२१	३७
३२	५०	३८	५४	५८	५८	४३	४३	२८	२१	२२

(११७) रविदशायाम्। (११८) चन्द्रदशायाम्।

र. र.	र. बु.	र. ल.	र. बृ.	चं. चं.	चं. श.	चं. मं.	चं. बृ.	चं. बु.	यो.
०४	०२	०१	०१	०१	००	००	००	००	०२
०८	०४	०६	०२	०३	०५	०५	०२	०३	०७
१३	०६	२४	०३	१३	०४	०४	०६	२५	२४
४१	६०	३३	२५	१८	२६	२६	११	४९	१२
३७	४८	६२	२४	५९	२०	२०	१७	४५	४१

(११९) बुधदशायाम्। (१२०) शुक्रदशायाम्। (१२१) कुजदशायाम्।

बु. बु.	बु. र.	बु. ल.	बु. बृ.	शु. शु.	शु. श.	शु. मं.	मं. मं.	मं. श.	मं. चं.	मं. ल.
०१	००	००	००	०८	०२	०२	०६	०२	०२	०१
१०	११	०७	०५	००	००	००	००	००	००	०६
२७	१३	१९	२१	००	००	००	२१	०७	०७	०५
१३	३६	०४	४८	०४	०१	०१	४३	१४	१४	२५
५१	५५	३७	२८	५०	१२	१२	३०	१०	१०	३०

अत्र "मूलपाकपतिः पूर्वन्ददात्यन्तर्दशां तत" इति गर्गोक्तेः प्रथमं दशापतेरन्तर्दशा ततो दशापतेरेकर्क्षादिगतानां भवन्ति, तत्रान्तर्दशाक्रमः पाठक्रमेणैवावगम्यः बहुषु प्रामाणिकग्रन्थेषु तया रीत्या पाठादन्तर्दशाक्रमस्य प्रकारान्तरानभिधानाच्च। यत्रैकराशौ द्वित्र्यादयो भवन्ति तदा तन्मध्ये षड्बलाधिक एव पक्वा न सर्वे, यत्तु प्रौढ़मनोरमायां—"पक्वैकभे स्याद्बली" त्यत्र पक्वैकभे तेऽखिला इति पठितव्यमित्युक्तं तथा "दशाक्रमवशादन्तर्दशाक्रम इत्येव पक्षो ज्यायानिति" गुरुमतमुक्तं तदुभयमपि सम्प्रदायविरोधात्प्रत्याख्येयम्। ननु "खचारिणस्तस्य दशाग्रतः स्यादन्तर्दशा वा विदशाह्वया वे" त्यत्र तथा "यस्याधिकं वीर्य्यमिहावशिष्टं वाच्या दशा चान्तरजा हि तस्य" त्यत्र च दशान्तर्दशादीनां क्रम एक एवोक्तोस्तीति पाठक्रमेणान्तर्दशाक्रममङ्गीकुर्वतां श्रीपतिविरोधः स्यादिति चेन्न नवमपञ्चमयोस्तथा चतुर्थाष्टमस्थितयोर्मध्ये कस्य पूर्वान्तर्दशा कस्य परेति सन्देहे श्रीपत्युक्तेः साफल्यात्। अथ "पाचयत्यथ फलैर्निजैर्ग्रह" इत्यत्र ग्रह इत्युपलक्षणं तेन लग्नस्याप्यन्तर्दशाभागित्वम्। तथा वृहज्जातकटीकायां गर्गः "लग्नेन सहिताः सर्वे ह्यन्योन्यं फलदायका" इति वराहोपि "सहोरास्त्वेवं परस्परगताः परिपाचयन्ति" नीलकण्ठपद्धतावपि "एकर्क्षेपि गता विलग्नखचरा" इति। अत एव यवनजातकादौ लग्नान्तर्दशाफलमप्युक्तम् यत्तु ग्रहः पाचयतीति ग्रहशब्दाद्ग्रहा एवान्तर्दशापाचका भवन्ति न लग्नमिति विश्वनाथेनोक्तं तदसदेवेति बोध्यम्—समच्छेदविधानं लीलावत्यां, "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवमिति"। अत्र सुगमोपायमाह धर्मेश्वरः 'दशापतेश्छेदगुणो वधोस्मात्स्वहारभक्ता गुणकाः परेषाम्। गुणैर्विनिघ्न्याः स्वदशा गुणैक्यभक्ताः पृथक् चान्तरजा दशाः स्युः। यद्वा दशेशस्य विभागमेवं ज्ञात्वा ततो हारहतात्परेषाम्। अन्तर्दशासाधनमुक्तमत्र विना समच्छेदविधानमार्गमिति"। प्रकारान्तरेण दशेशान्तर्दशाज्ञानार्थं मत्कृतश्लोकः "वेदेभाः पक्वहारेभ्यो भक्ता आप्तैर्युक्ताश्च तैः। वेदेभघ्नी दशा भक्ता दशेशान्तर्दशा भवेदिति।" अस्मात्प्राग्वदेवान्येषामूह्यम्।

(१२२)

गुरुदशान्तर्गतविद्यमानगुर्वन्तर्दशामध्ये विदशा ।

वृ.वृ.वृ	वृ.वृ च	वृ.वृ.शु	यो.
०३ ०२ ०७ ३८ ०५	०० ०९ १३ ५६ ५२	०० ०९ १६ ५४ २१	०४ ०५ ०८ २९ २८

(१२३)

गुरुदशान्तर्गतगुर्वन्तर्दशामध्ये विद्यमानगुरुविदशायामुपदशा

वृ.वृ.वृ.वृ.	वृ.वृ.वृ चं.	वृ.वृ वृ.शु.	यो.
०२ ०३ १३ ५६ ३४	०० ०३ २७ ४२ २२	०० ०६ २५ ५९ ०१	०३ ०१ ०७ ३८ ०१

अन्यासां विदशोपदशानां साधनं विस्तारभयान्न कृतम् ।

(१२४)

दशारम्भमध्यमार्का कलिगताब्दशकाब्दोपलक्षिताः ।

ल.	श.	बृ.	र.	चं.	बु.	शु	मं.
४९५९	४९७१	४९८६	४९९२	५००२	५००५	५००९	५०२१
१७८०	१७९२	१८०७	१८१३	१८२३	१८२६	१८३०	१८४२
१० ११ ११ ४३	१० ०१ ०१ ४३	०९ १४ ०३ ५९	११ २० ३२ १०	०९ ०९ ०३ ५२	०५ ०३ १६ ३३	०४ २५ ०० २४	०४ २५ ०७ ३९

अथ विद्यमानगुरुदशारम्भकालिकसलग्नग्रहेभ्यो दशायाः शुभाशुभफलावगमाय तदुपकरणान्यादौ लिख्यन्ते तत्र जन्मकालिकाहर्गणः—१८११६३३।५४।५४ सावनिका दशा ६८३४।२७।३६ दशारम्भकालिकोहर्गणः १८२१४६८।२२।३३ अत्र जन्मकालिकाहर्गणज्ञानार्थं मदीयं पद्यम् । "देशान्तरेष्टमिश्राख्यवियुत्योर्ध्या युतिस्तया । युतोहर्निचयः स स्याद्वीजोक्त्या जन्मकालिकः । इति अहर्निचयः जन्म-

दिनजार्धरात्रिकाहर्गणः वीजोक्त्या योगे युतिः स्यात्तयोः स्वयोर्वा धनर्णयोरन्तरमेव योग इत्युक्त्या। अथ तृतीयादिदशारम्भकालिकाहर्गणावगमे गतदशायुतिं दशां प्रकल्प्य सावनिका दशा साध्येति विशेषः। केशवोक्तसावनिका दशा दशाब्दयङ्भागतुल्येन पलेन युता सती वास्तविककला भवतीति ज्ञेयम्। अत्र सूक्ष्मसुगमप्रकारो मदीयः--नाकघ्नपाकवेदांशैर्दिनाद्यैस्तद्दिगंशकैः। घट्याद्यैर्वासरीभूतदशा युक्ता कहात्मिकेति। अत्र श्रीपत्युक्तौ सूर्य्यभगणाः सौरसावनाश्च सूर्य्यसिद्धान्तीयाः "युगे सूर्य्यज्ञशुक्राणां खचतुष्करदार्णवा। उदयादुदयं भानोर्भूमिसावनवासराः। वसुद्व्यष्टाद्रिरूपङ्क्तिसप्ताद्रितिथयो युगे" इति ज्ञातव्याः।

(१२५)

दशारम्भकालिकमध्यमाः।

र.	चं.	मं.	बु.	बृ.	शु.	श.	रा.	के.	चंउ
०९	०६	०४	०७	०५	०३	०२	०४	१०	०९
१४	०८	०४	२४	०४	०४	१३	२८	२८	१८
०३	४४	४३	३३	०२	००	३७	१०	१०	४७
५९	३८	३६	०१	०७	२०	४२	३६	३९	१२

(१२६)

स्पष्टास्सगतिकाः।

र.	चं.	मं	बु.	बृ.	शु.	श.
०९	०६	०३	०८	०५	१०	०२
१५	१३	०१	२८	१५	११	१२
०३	४२	३१	३०	०७	१०	३१
३४	४६	२७	०१	१७	३६	५३
६१	८०२	०८	१००	००	०७	०४
१७	५३	२१	२२	३२	०७	२२
			अ	व	व	व

मकरन्दोक्तप्रकारेण निरवयवाहर्गणात्साधिता देशान्तरसंस्कृतमध्या-हर्गणावयवेन चालिता इति। अथवात्र विशेषः--दशारम्भसमयाहर्गणः सप्ततष्टः शुक्राद्वारः स्यात् अहर्गणाधोवयवाद्देशान्तरसंस्कृतरात्र्यर्द्धं शोध्यं शेषः सूर्य्योदयादिष्टकालो भवति यदि, न शुद्ध्यति तदा शोध्ये षष्टिघटिकाः संयोज्य शोध्यं तदा वारो निरेकःकार्यः। तिथ्यानयनं ग्रहलाघवे--"भक्ता व्यर्कविधोर्लवा यमकुभिर्य्याता तिथिः स्यात्फलं शेषं यातमिदं हरात्प्रपतितं भोग्यं विलिप्तास्तयोः। भुक्त्योरन्तरभाजिताश्च घटिका यातैष्यकाःस्युः क्रमादिति।" अत्रेदमवधेयम्—यातघटी दशारम्भेष्टघटीभ्यो यदि न्यूना तदा तदन्तरतुल्ययाततिथिघटिका विलिख्य परतो वर्तमानतिथिर्लेख्या यद्यधिकास्तदैष्यघटीयुक्त-

दशारम्भेष्टघटीतुल्या वर्त्तमानतिथेर्घट्यो लेख्या यत्रैष्यघटिकायुक्तदशारम्भेष्टघट्यः षष्ट्यधिका भवन्ति तत्र षष्टिघटिका एव वर्त्तमानतिथिघट्यो लेख्या, या तिथिरानीयते सा यदि पञ्चदशेभ्यो न्यूना तदा शुक्लपक्षोऽन्यथा कृष्णपक्ष इति । अथ गततिथ्यूना त्रिंशदैष्यतिथिर्भवति गतैष्यतिथिस्तु चतुःषष्ट्यंशोनवर्त्तमानयातैष्यघटीभ्यां युक्तः क्रमेण दशारम्भसमयात्पूर्व्वापरदशान्तावधिदिनाद्ये भवतः, स्पष्टसूर्य्यस्य भुक्तभोग्यांशकलाः स्पष्टार्कगत्या भाज्या लब्धे क्रमेण दशारम्भसमयात्पूर्व्वापरसंक्रान्त्यवधिदिनाद्ये भवतः, आभ्यां यदि पूर्व्वापरदशान्तावधिदिनाद्ये क्रमेणाधिकोने भवतस्तदा यस्मिन् शुक्लादिमासे दशारम्भस्तत्र सूर्य्याधिष्ठितराशिसंक्रान्तिर्भवेत् वैपरीत्ये सूर्य्याक्रान्तराश्यग्रिमराशिसंक्रान्तिः स्यात् तयोन्यूनत्वेऽधिमासोधिकत्वे क्षयमासश्च ज्ञेयस्ततो मासज्ञानम्—"मेषादिस्थे सवितरि यो यो मासः प्रपूर्य्यते चांद्रः । चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वेऽधिमासोन्त्यः" इति ब्रह्मसिद्धान्तवाक्येन सुलभम्, परमत्रेयान्विशेषः—अनया रीत्या यन्मासीयकृष्णपक्षः सिद्ध्यति तदग्रिममासीयकृष्णपक्षो-व्यवहारि कृष्णादिमासाभिप्रायेण स्याच्छुक्लस्त्वविकृत एवेति । अथैव ज्ञातो दशारम्भसमयो लिख्यते शाके १८०७ माघकृष्णषष्ठ्यां बुधे घट्यः ४३ पलानि ८ इह दिवसे सूर्य्योदयादिष्टघटिकासु ७ पलेसु २८ गुरुदशारम्भस्तत्र दिनमानम् २६।४२॥ रात्रिमानम् ३३।१८ अयनांशाः २०।४८।०७ लग्नं राश्याद्यम् ११।१३।११।४० शुभमस्तु ॥

॥ लग्नकुण्डली ॥ (११७)

अथोदाहरणोपयोगीन्यङ्कचतुष्टयात्मकानि रूपात्मकभावफलोच्चबलचेष्टाबलानि लिख्यन्ते ॥

(१२८)

र.	००।२८।३३।१०	००।४०।५९।१३	००।२१।०७।१०
चं.	००।११।३८।००	००।००।३८।३५	००।३३।५७।४८
मं.	००।३९।४३।४४	००।४१।१०।५४	००।१७।१३।२६
बु.	००।०९।०४।४०	००।१२।३४।१७	००।००।०९।२१
बृ.	००।५८।३०।०२	००।४४।५९।१०	००।३४।४०।४८
शु.	००।४०।०१।२८	००।२९।३४।२६	००।३६।५३।२७
श.	००।४६।४६।१८	००।२६।२२।१५	००।५१।४४।५६

दशारम्भसमयात् पूर्व्वापरदशान्तमाने दिनाद्ये २२।५८॥७।२६।०५ संक्रान्तिमाने च १४।४७।०३॥१४।४०।१२

एवमन्यस्मिन्नपि दशारम्भसमये ग्रहादिकं साध्यं केशवाचार्य्येण दशादिलग्नजफलन्निरस्तमपि शिष्याणान्तदीयप्रकारावगमाय मयैतत्सर्व्वं प्रदर्शितम्।

चिरन्तनोदाहरणेन रीतिं सम्यङ्न जानन्ति हि पद्धतीयाम्।
शिष्यास्ततो पूर्व्वविदा ततेयं शुभाशुभोद्बोधकरी सुयन्त्री ॥ इति ॥

यः करोति स्वनाम्नाज्ञः परस्योत्कृष्टकल्पनाम्।
स शीघ्रफलमाप्नोति जनिः स्यादल्पजोनिषु ॥१॥

इति श्रीमदपूछशमकृतकेशवीयोदाहरणम्।

शुभम्।

दैवज्ञपूछशर्म्भ्यः श्रीश्रीनन्दनशर्म्मभिः।
लब्ध्वैतज्ज्योतिषाचार्यैः सीतारामाभिधाय मे ॥
स्वशिष्याय प्रदत्तं तन्मया नीतं प्रकाशताम्।
शस्त्रवेदाष्टभूतुल्ये शकाब्दे दैवविन्मुदे ॥

મેઘાણી ઉતારગો૦

ગુજરાતી ચીવણાસ્વા